В. А. Кочергина

# КНИГА ДЛЯ ЧТЕНИЯ НА САНСКРИТЕ

संस्कृतामृतम्

ДОБРОСВЕТ

В. А. Кочергина

# КНИГА ДЛЯ ЧТЕНИЯ НА САНСКРИТЕ

# संस्कृतामृतम्

ДОБРОСВЕТ
Издательство «КДУ»
Москва 2010

УДК 81.26
ББК 81.2
К75

Рецензенты: доктор филологических наук В. В. Вертоградова,
профессор Б. А. Захарьин

Кочергина В. А.
К75 Книга для чтения на санскрите — М.: «Добросвет», «Издательство "КДУ"», 2010. — 240 с.
ISBN 978-5-98227-688-9

Книга адресована читателю, обладающему устойчивым начальным знанием санскрита, и желающему продолжить его изучение. За немногими исключениями, в книгу вошли редкие тексты, что делает ее особенно полезной при написании курсовых и дипломных работ. Приводимые образцы текстов позволяют наблюдать характерные черты языка эпоса, языка народной повествовательной литературы, своеобразие авторского языка. Тексты приводятся в филологически необработанном виде. Каждый из пяти разделов книги предваряется вводным очерком, содержащим сведения, необходимые для начала работы над текстом.

ББК 81.2

ISBN 978-5-98227-688-9

© «Добросвет», 2010.

*СОДЕРЖАНИЕ*

**ПРЕДИСЛОВИЕ** . . . . . . . . . . **7**

**СПИСОК ИСТОЧНИКОВ** . . . . . . . . . . **10**

РАЗДЕЛ 1

**ПАМЯТНИКИ НА ЭПИЧЕСКОМ САНСКРИТЕ**

**Вводный очерк** . . . . . . . . . . **13**

**Махабхарата. Mahābhārata** . . . . . . . . . . **17**

Книга первая . . . . . . . . . . 17

Книга Лесная . . . . . . . . . . 26

*Сказания о Нале. Nalopākhyānam* . . . . . . . . . . 26

*Сказание о Савитри. Sāvitryupākhyānam* . . . . . . . . . . 35

Книга Бшихмы . . . . . . . . . . 57

*Песнь Бога. Bhagavadgītā* . . . . . . . . . . 57

**Рамаяна. Rāmāyaṇam** . . . . . . . . . . **65**

Город Айодхья. Ayodhyā . . . . . . . . . . 65

Сватовство Рамы. Rāmavivāhaḥ . . . . . . . . . . 65

Похищение Ситы. Sītāharaṇam . . . . . . . . . . 69

Хануман. Hanumān . . . . . . . . . . 71

## РАЗДЕЛ 2

## ПАМЯТНИКИ ЭТИКО-ПРАВОВОЙ ТРАДИЦИИ

**Вводный очерк** . . . . . . . . . . **79**

**Законы Ману. Mānavadharmaçāstram** . . . . . . . . . . **83**

**Яджнавалкья. Yājñavalkyadharmaçāstram** . . . . . . . . . . **105**

**Артхашастра Каутильи. Kauṭilīyam arthaçāstram** . . . . . . . . . . **111**

## РАЗДЕЛ 3

## НАРОДНАЯ ПОВЕСТВОВАТЕЛЬНАЯ ЛИТЕРАТУРА

**Вводный очерк** . . . . . . . . . . **119**

**Панчатантра. Pañcatantram** . . . . . . . . . . **123**

Разъединение друзей. Mitrabhedaḥ . . . . . . . . . . 123

Приобретение друзей. Mitrasaṁprāptiḥ . . . . . . . . . . 125

Рассказ о воронах и совах. Kākolūkiyam . . . . . . . . . . 136

Утрата приобретенного. Labdhapraprаṇāçām . . . . . . . . . . 143

Безрассудные поступки. Aparokṣitakārakam . . . . . . . . . . 146

**Хитопадеща. Hitopadecaḥ** . . . . . . . . . . **148**

## РАЗДЕЛ 4

## ИНДИВИДУАЛЬНОЕ ТВОРЧЕСТВО НА САНСКРИТЕ. КАЛИДАСА

**Вводный очерк** . . . . . . . . . . **155**

**Узнаниая (по кольцу) Щакунтала. Abhijñānaçākuntalam** . . . . . . . . . . **159**

Первое действие. Prathamo 'n kaḥ . . . . . . . . . . 159

Четвертое действие. Caturtho 'n kaḥ . . . . . . . . . . 169

**Облако-вестник. Meghadūtam** . . . . . . . . . . **175**

## РАЗДЕЛ 5

## САНСКРИТ В РАЗНЫХ ЖАНРАХ ЛИТЕРАТУРЫ ПОСЛЕДУЮЩИХ ВЕКОВ

**Вводный очерк. Дандин** . . . . . . . . . . **197**

**Приключения десяти юношей. Daçakumāracaritam** . . . . . . . . . . **199**

Приключения Симадатты. Sīmadattacaritam . . . . . . . . . . 199

Приключения Упахаравармы. Upahāravarmacaritam . . . . . . . . . . 201

Рассказ Нимбавати. Nimbavatīkathā . . . . . . 202
**Вводный очерк. Кшамендра . . . . . . 203**
**Разоблачение самодовольства. Darpadalanam (начало) . . . . . . 204**
**Рассуждение о дарении. Dānavicāraḥ . . . . . . 204**
**Вводный очерк. Джайядева . . . . . . 209**
**Гитаговинда. Gītagovindakāvyam . . . . . . 210**
Первая глава. Prathamaḥ sargaḥ . . . . . . 210
Вторая глава. Dvitīyaḥ sargaḥ . . . . . . 214
Третья глава. tr̥tīyaḥ sargaḥ . . . . . . 216
Четвертая глава. Caturthaḥ sargaḥ . . . . . . 218
Пятая глава. Pañcamaḥ sargaḥ . . . . . . 220
**ПРИЛОЖЕНИЕ: ОБРАЗЦЫ СОВРЕМЕННЫХ ТЕКСТОВ НА САНСКРИТЕ . . . . . . 226**
**ПОЯСНЕНИЯ К ИЛЛЮСТРАЦИЯМ . . . . . . 243**

## ПРЕДИСЛОВИЕ

Книга для чтения на санскрите является последней в трилогии моих работ, посвященных санскриту. Первая из них — «Санскритско-русский словарь»[1], вторая «Учебник санскрита»[2].

Дополненные, по возможности, сведениями из новейших грамматик санскрита, созданных за последние годы индийскими учеными[3], они подводят к чтению текстов на санскрите в оригинале. Такие тексты и предлагаются в последней работе трилогии в «Книге для чтения на санскрите» — संस्कृतामृतम् 'Бессмертие санскрита'.

Напомним, что термин «санскрит» употребляется в широком и в узком смысле. В шроком смысле он употребляется как синоним древнеиндийского (включая ведийский язык). В узком смысе санскрт — язык эпоса и классической древней и средневековой индийской литературы. Мы употребляем слово «санскрит» в узком смысле.

Книга для чтени содержит тексты на эпическом санскрите и на классическом языке разных веков и разных жанров. В Приложении приводятся образцы современной прозы на санскрите.

Не все произведения, важные для понимания развития литературного процесса в древней и средневековой Индии, включены в Книгу. Создание хрестоматии по древней и средневековой литературе Индии — дело будущего. Предлагаемая Книга не является хрестоматией, у нее иные задачи.

Книга предназначена для лиц, прослушавших двух- или трехгодичный курс санскрита и желающих продолжить его исследование. Это могут быть курсовые, дипломные работы, а в отдельных случаях и диссертации. Однако желающие продолжить работу над санскритом сталкиваются с проблемой текстов. Их мало, они повторяются из работы в работу. Чувство новизны исследуемого материала утрачивается.

---

[1] «Санскритско-русский словарь». Изд. «Русский язык», М., 1978, М., 1987; изд. «Филология», 1996; изд. «Академический Проект», 2005.

[2] «Учебник санскрита». Изд. «Филология», 1994, 1998; Изд. ИОСО РАО 2001; изд. «Академический Проект», М., 2007.

[3] напр. M. K. Pathak The Introduction to Sanskrit Grammar. Delhi, 2004 или Dr. Ratnakar Narale Sanskrit for English Speaking People, Nai Dilli, 2004.

Представить тексты для самостоятельной исследовательской работы — основная цель предлагаемой Книги. Тексты представляют собой достаточно крупные отрывки из эпических произведений, из произведений этико-правового характера, из народной прозы и авторских текстов разных жанров — отрывков из драматического произведения, образцов поэзии и прозы на классическом санскрите.

Одним из условий включения текста в Книгу являлась его новизна: большинство текстов в подобные работы (и в хрестоматии) не включалось (например, вступление к Панчатантре, Кшемендра, Гитаговинда). Однако в I раздел Книги включены такие всемирно известные отрывки как «Песня о Нале» и «Савитри». С первым из них европейцев познакомил Франц Бопп и по традиции этот отрывок из Махабхараты нельзя было не включить в Книгу. Текст «Савитри» также включен ввиду его сравнительно (с другими эпизодами эпоса) небольшого объема и, поэтому, возможности использовать его целиком.

Тексты не адаптированы (исключение составляют две басни из Панчатантры).

Приводимые в Книге образцы позволяют наблюдать жанровые особенности текста, позволяют установить характерные черты языка эпоса, языка народной повествовательной литературы, своеобразие языка авторских текстов.

Тексты приводятся в филологически необработанном виде — нет исторических комментариев, пояснений к именам собственным и названиям реалий и т. п. Все то, что составляет филологическую обработку текста, отсутствует. Требуется, чтобы учащийся сам проделал эту работу, обращаясь к вспомогательной литературе. Таким образом, тексты служат для выработки навыков их филологического исследования.

Большинство из включенных в Книгу текстов было проверено в работе со студентами и аспирантами филологического, исторического, философского факультетов и факультета журналистики МГУ.

Каждому из разделов Книги, а всего их пять, предшествует Вводный очерк, содержащий сведения, необходимые перед началом работ над текстом. Автор Вводного очерка ко II разделу — историк Мария Подъяпольская. Каждый очерк завершается указанием дополнительной литературы на русском языке. Это обеспечит получение указанных работ в учебных библиотеках. Эти же работы содержат, для интересующихся, библиографию на иностранных языках. Кроме того, мне хотелось в первую очередь познакомить с работами отечественных индологов, в частности, ленинградских ученых — по эпическому языку и с работами И. Д. Серебрякова по позднему санскриту.

Сплошной текст на санскрите местами прерывается иллюстрациями. Скульптура, древнеиндийские храмы являлись своеобразными аналогами эпических произведений.

## СПИСОК ИСТОЧНИКОВ

श्रीमहाभारतं श्रीमन्महर्षिवेदव्यासविरचिता श्रीमन्महाभारतसंहिता । खवण्डाः प्रथम चतुर्थः । साधारणविद्यावृध्यर्थकश्रीयुक्तसमाजाधिपतीनामनुमत्यनुसारेण तत्सम्बन्धीयपण्डितैः संशोधिताः ।कलिकाताराजधान्यां ।इङुकेशनाख्यमुद्रायन्त्रालये मुद्रिताः ।शकाब्दा १८५६—१८६१ ।

रामायाणं of Çrīmad Vālmīki, Bombay, 1905.

Mānava Dharma-çāstra. Ed. with the comm. by Mandlik. Bombay, 1886. vol. 1-3.

Yājñavalkyasmṛti. With the comm. «Mitākşara». Ed. R. Sh. Moghe. Bombay, 1892. The Kauṭilīya Arthaçāstra. P. 1. A critical Edition with a Glossary. Ed. R. P. Kangle. Bombay, 1869.

Panc atantra of Vishnu Çarma With yotsana Sanskrit & Mridula Hindi commentaries edited & translated by Dr. Sudhakar Malaviya M.A.Jh.D., Sahityacarya Department of Sanscrit. Arts Faculty Banaras Hindu University, Varanasi, 1993.

हितोपदेशः विष्णुशर्म्म सङ्कलितः तारानाथ तर्कवाचस्पति महाचार्य्यकृतसंक्षिप्तटीकासमेतः जीवानन्दविद्यासागर महाचार्य्येण प्रकाशितः कलिकाता, १८७६

महकवि-कालिदास-विरचितम् अभिज्ञानशाकुन्तलम् मूल, संस्कृत-हिन्दी ख्यारव्या, भुमिका एवं छात्रेपयोगी टिप्पण सहित प्रथम संस्करणः वाराणसी, १९९५

The Megha-dūta of Kālidāsa. Critically edited by S. K. De. New Delhi, 1957.

Über Kshemendra's Darpadalana von B. A. Hirszbant, St. Petersburg, 1892.

महाकाविश्रोजयदेवविरचितं गीतगोविन्दकाव्यम् प्रकाशक-भार्गवपुस्तकालय, गायधाट, बनारस १

Учебник санскритского языка. Грамматика. Хрестоматия. Словарь; составил Ф. И. Кнауэр. Лейпциг, 1908.

Oldřich Friš. Sanskritská Čitanka, Praha, 1954.

महाराष्ट्र राज्य माध्यमिक व उच्च माध्यमिक शिक्षण मंडळ पुने संस्कृत-प्रदीपिका प्रथमावृत्तीः १९८४ पुनर्मदणः १९८६

Intermediate Sanskrit Selections, Revised Edition. University of Calcutta, 1958.

संस्कृतामृतम्-संस्कृत विभाग, हिन्दू कालज्, दिल्ली वश्वविद्यालय, दिल्ली १८५६

# Раздел 1

# Памятники на эпическом санскрите

Эпический санскрит — это язык эпических поэм «Махабхарата» (Mahābhārata) — «Сказание о великих потомках Бхараты», и «Рамаяна» (rāmāyaṇa) — «Странствия Рамы», а также пуран (purāṇá — древний) — священных книг индуизма, неоднородных по содержанию.

«Махабхарата» складывалась с середины 1 тысячелетия до н. э. по IV–V вв. н. э. Поэма состоит из 18 книг (parvan, 19-я книга — дополнение — «Родословная Хари» (harivaṅça).

«Для всех жителей Индии — мужчин и женщин, богатых и бедных, из высших и низших слоев, образованных и неграмотных — Махабхарата остается источником мудрости, эстетического наслаждения, вдохновения и нравственного руководства. В годину испытаний и лишений Махабхарата была утешением и светочем надежды и для неграмотного деревенского жителя, и для умудренного опытом государственного мужа». — писал виднейший индолог XX века Р. Н. Дандекар[1].

Сюжетной основой «Махабхараты» послужил рассказ о борьбе за власть внутри рода Бхарата — борьбе потомков рода Куру, кауравов, и сыновей Панду, пандавов. Царь Вичитравирья из рода Куру имел двух сыновей. Старший, Дхритараштра, был слепым, и поэтому царством управлял его младший брат Панду. После смерти Панду его пять сыновей воспитывались с сыновьями Дхритараштры. Сыновья Панду успехами в науках и в военном искусстве превосходили кауравов, вызывая их зависть и ненависть. Дурьодхана, старший из ста сыновей Дхритараштры, властолюбивый и коварный, не раз пытался погубить пандавов. Развертывающиеся далее события и составляют содержание «Махабхараты».

«Махабхарата» начинается с краткого пересказа этого повествования благочестивым Угращравой на жертвоприношении в священном лесу Наймиша. Это — начало I книги поэмы, Адипарвы (a diparva), приводимое нами(I, 1–66 и I, 162–210).

Все эпическое повествование в «Махабхарате» складывается из перемежающих основную сюжетную линию вставных эпизодов — многочисленных новелл и притч, космогонических мифов, легенд правового и дидактического характера. В эпосе «Махабхарата» столь часто встречаются сенетенции этико-правового и дидактического характера, что древняя традиция была склонна рассматривать «Махабхарату» как своего рода дхармашастру (см. Раздел II)

[1]«Махабхарата: ее происхождение и развитие» — В сб. Р. Н.Дандекар «От Вед к индуизму. Эволюционирующая мифология», М., 2002

Вставные эпизоды в «Махабхарате» объединены по принципу обрамления основной сюжетной линии. Они рассказываются обычно как параллели и назидательные примеры к событиям, развертывающимся в основной линии повествования.

Спасаясь от злых козней Дурьодханы, пандавы во главе со старшим братом, Юдхиштхирой, скитались по лесам. Один из пандавов, великий лучник Арджуна, побеждает в состязаниях женихов за руку Драупади, дочери царя Друпады, и она становится женой пандавов. Дхритараштра, узнав, что пандавы живы и породнились с царем Друпадой, совершает раздел царства между своими сыновьями и пандавами. При этом пандавы получают пустынную часть страны. Там мудро правит старший из братьев пандавов, царь Юдхиштхира. Коварный Дурьодхана склоняет Юдхиштхиру сыграть в кости. По уговору проигравший лишается своего царства и должен удалиться на 12 лет в изгнание, а 13-й год провести неузнанным. Выигрывает Дурьодхана, и Юдхиштхира с братьями и супругой Драупади изгнаны на 12 лет. Они живут в лесу. Мудрец Брихадащва в утешение царю пандавов рассказывает повесть о Нале (III, 50–79). Юдхиштхире, сокрушающемуся о горькой судьбе своей супруги, чтобы успокоить его, мудрец Маркандейя рассказывает повесть о Савитри, верной жене, стойкой и мудрой женщине (III, 277–283). Эти рассказы из третьей, «Лесной книги» (āraṇyaka-parva) «Махабхараты» приведены ниже — из рассказов о Нале пять глав (sargaḥ), рассказ о Савитри приводится полностью.

Проведя 13 лет в изгнании, пандавы возвращаются, чтобы по договору с кауравами получить обратно свое царство, но кауравы нарушают договор и отказываются вернуть царство. Армии кауравов и пандавов готовятся к битве и встречаются на поле Куру (kurukṣetra). Оба войска выстраиваются в боевом порядке, и в момент напряженного ожидания битвы начинается та часть поэмы, отрывок из которой приводится в нашей Книге. Он представляет собой диалог Арджуны и Кришны. Кришна является земным воплощением бога Вишну, решившего вмешаться в спор пандавов и кауравов для восстановления дхармы, мирового закона, ради спасения справедливости и истины, ради наказания зла. Беседа Кришны и Арджуны — это религиозно-философское наставление, известное как самостоятельное произведение «Бхагавадгита» — Песнь Бога (bhagavadgītā), входящее в шестую парву «Махабхараты» — «Бхишмапарва» (bhīṣmaparva), главы 25–42 (по критическому изданию главы 23–40). В нашей Книге приводится I песня и половина II песни, так называемое «ядро Гиты».

Очень краткое изложение сюжетной канвы «Махабхараты» можно найти в статье В. И. Кальянова «Краткие сведения о Махабхарате» (в изд. Махабхарата. Адипарва, книга первая. Изд. АН СССР, М-л, 1950).

Более полное литературное изложение содержит книга В. Г. Эрмана и Э. Н. Темкина «Махабхарата, или сказание о великой битве потомков Бхараты. Древнеиндийский эпос», Изд. Восточной литературы, М. 1963.

При чтении Бхагавадгиты полезно ознакомиться с книгой рано умершего молодого исследователя этого памятника: В. С. Семенцов. «Бхагавадгита» в традиции и современной научной критике. М. «Наука», 1985. Послесловие академика Г. М. Бонгард-Левина.

Эпическая поэма «Рамаяна» (rāmāyaṇa) была создана между IV в. до н. э. и II в н. э. Она значительно меньше поэмы «Махабхарата» — семь книг — и представляет собой произведение, объединенное единым сюжетом и имеющее стройную композицию. Мифическим автором «Рамаяны», по мнению индийцев, является поэт Вальмики.

В поэме излагается история эпического героя Рамы и его братьев, сыновей царя Дашаратхи, правителя Айодхьи. Описание города Айодхья (1, 5, 5–23) — одно из красивейших мест поэмы, включено в нашу Книгу. Включен и один из центральных эпизодов начала поэмы — победа Рамы в испытании претендентов на руку Ситы, дочери царя Джанаки (1, 67, 1–27), и женитьба на ней.

Среди превратностей судьбы, обрушивающихся на Раму и его верную супругу Ситу, величайшей является похищение Ситы царем ракшасов (злых демонов) Раваной, обитающим на острове Ланка. В поисках ее Раме помогает царь обезьян Хануман, который летит на остров Ланка. Описание полетаХанумана (V, 1, 1–8) приведено в Книге. В борьбе обезьян с ракшасами и в единоборстве Рамы с Раваной побеждает справедливость. Сита освобождена, но следуют новые испытания и последняя разлука Рамы и Ситы.

С общим содержанием поэмы в кратком изложении на русском языке можно познакомиться по книге «Рамаяна. Древнеиндийский эпос». Изд. Наука, М., 1965 — литературное изложение В. Г. Эрмана и Э. Н. Темкина.

См. также В. Г. Эрман, Э. Н. Темкин. «Три великих эпических сказания древней Индии». М., 1978.

Работающим над языком эпических поэм «Махабхарата» и «Рамаяна» будет интересно ознакомиться с книгой П. А. Гринцера «Древнеиндийский эпос» М., «Наука», 1974, и с монографией С. Л. Невелевой «Махабхарата. Изучение древнеиндийского эпоса». М., «Наука», 1991.

# श्रीमहाभारतम्

## आदिपर्व

लोमहर्षणपुत्र उग्रश्रवाः सूतः पौराणिको नैमिषा-
रण्ये शौनकस्य कुलपतेर्द्वादशवार्षिके सत्रे ॥ १
समासीनानभ्यगच्छद्ब्रह्मर्षीन्संशितव्रतान् ।
विनयावनतो भूत्वा कदाचित्सूतनन्दनः ॥ २
तमाश्रममनुप्राप्तं नैमिषारण्यवासिनः ।
चित्राः श्रोतुं कथास्तत्र परिवव्रुस्तपस्विनः ॥ ३
अभिवाद्य मुनींस्तांस्तु सर्वानेव कृताञ्जलिः ।

अपृच्छत्स तपोवृद्धिं सद्भिश्चैवाभिनन्दितः ॥ ४
अथ तेषूपविष्टेषु सर्वेष्वेव तपस्विषु ।
निर्दिष्टमासनं भेजे विनयाल्लोमहर्षणिः ॥ ५
सुखासीनं ततस्तं तु विश्रान्तमुपलक्ष्य च ।
अथापृच्छदृषिस्तत्र कश्चित्प्रस्तावयन्कथाः ॥ ६
कुत आगम्यते सौते क्व चायं विहृतस्त्वया ।
कालः कमलपत्राक्ष शंसैतत्पृच्छतो मम ॥ ७

सूत उवाच ।

जनमेजयस्य राजर्षेः सर्पसत्रे महात्मनः ।
समीपे पार्थिवेन्द्रस्य सम्यक्पारिक्षितस्य च ॥ ८
कृष्णद्वैपायनप्रोक्ताः सुपुण्या विविधाः कथाः ।
कथिताश्चापि विधिवद्या वैशंपायनेन वै ॥ ९
श्रुत्वाहं ता विचित्रार्था महाभारतसंश्रिताः ।
बहूनि संपरिक्रम्य तीर्थान्यायतनानि च ॥ १०
समन्तपञ्चकं नाम पुण्यं द्विजनिषेवितम् ।
गतवानस्मि तं देशं युद्धं यत्राभवत्पुरा ।
पाण्डवानां कुरूणां च सर्वेषां च महीक्षिताम् ॥ ११
दिदृक्षुरागतस्तस्मात्समीपं भवतामिह ।
आयुष्मन्तः सर्वे एव ब्रह्मभूता हि मे मताः ॥ १२

अस्मिन्यज्ञे महाभागाः सूर्यपावकवर्चसः ।
कृताभिषेकाः शुचयः कृतजप्या हुताग्नयः ।
भवन्त आसते स्वस्था ब्रवीमि किमहं द्विजाः ॥ १३
पुराणसंश्रिताः पुण्याः कथा वा धर्मसंश्रिताः ।
इतिवृत्तं नरेन्द्राणामृषीणां च महात्मनाम् ॥ १४

ऋषय ऊचुः ।

द्वैपायनेन यत्प्रोक्तं पुराणं परमर्षिणा ।
सुरैर्ब्रह्मर्षिभिश्चैव श्रुत्वा यदभिपूजितम् ॥ १५
तस्याख्यानवरिष्ठस्य विचित्रपदपर्वणः ।
सूक्ष्मार्थन्याययुक्तस्य वेदार्थैर्भूषितस्य च ॥ १६
भारतस्येतिहासस्य पुण्यां ग्रन्थार्थसंयुताम् ।
संस्कारोपगतां ब्राह्मीं नानाशास्त्रोपबृंहिताम् ॥ १७
जनमेजयस्य यां राज्ञो वैशंपायन उक्तवान् ।
यथावत्स ऋषिस्तुष्ट्या सत्रे द्वैपायनाज्ञया ॥ १८
वेदैश्चतुर्भिः समितां व्यासस्याद्भुतकर्मणः ।
संहितां श्रोतुमिच्छामो धर्म्यां पापभयापहाम् ॥ १९

सूत उवाच ।

आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम् ।
ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम् ॥ २०
असच्च सच्चैव च यद्विश्वं सदसतः परम् ।
परावराणां स्रष्टारं पुराणं परमव्ययम् ॥ २१
मङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिम् ।
नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम् ॥ २२
महर्षेः पूजितस्येह सर्वलोके महात्मनः ।
प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यामिततेजसः ॥ २३
आचख्युः कवयः केचित्संप्रत्याचक्षते परे ।
आख्यास्यन्ति तथैवान्ये इतिहासमिमं भुवि ॥ २४
इदं तु त्रिषु लोकेषु महज्ज्ञानं प्रतिष्ठितम् ।
विस्तरैश्च समासैश्च धार्यते यद्द्विजातिभिः ॥ २५

अलंकृतं शुभैः शब्दैः समयैर्दिव्यमानुषैः ।
छन्दोवृत्तैश्च विविधैरन्वितं विदुषां प्रियम् ॥ २६
निष्प्रभेऽस्मिन्निरालोके सर्वतस्तमसावृते ।
बृहदण्डमभूदेकं प्रजानां बीजमक्षयम् ॥ २७
युगस्यादौ निमित्तं तन्महद्दिव्यं प्रचक्षते ।
यस्मिंस्तच्छ्रूयते सत्यं ज्योतिर्ब्रह्म सनातनम् ॥ २८
अद्भुतं चाप्यचिन्त्यं च सर्वत्र समतां गतम् ।
अव्यक्तं कारणं सूक्ष्मं यत्तत्सदसदात्मकम् ॥ २९

यस्मात्पितामहो जज्ञे प्रभुरेकः प्रजापतिः ।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ ॥ ३०
प्राचेतसस्तथा दक्षो दक्षपुत्राश्च सप्त ये ।
ततः प्रजानां पतयः प्राभवन्नेकविंशतिः ॥ ३१
पुरुषश्चाप्रमेयात्मा यं सर्वमृषयो विदुः ।
विश्वेदेवास्तथादित्या वसवोऽथाश्विनावपि ॥ ३२
यक्षाः साध्याः पिशाचाश्च गुह्यकाः पितरस्तथा ।
ततः प्रसूता विद्वांसः शिष्टा ब्रह्मर्षयोऽमलाः ॥ ३३

राजर्षयश्च बहवः सर्वैः समुदिता गुणैः ।
आपो द्यौः पृथिवी वायुरन्तरिक्षं दिशस्तथा ॥ ३४
संवत्सरर्तवो मासाः पक्षाहोरात्रयः क्रमात् ।
यच्चान्यदपि तत्सर्वं संभूतं लोकसाक्षिकम् ॥ ३५
यदिदं दृश्यते किंचिद्भूतं स्थावरजङ्गमम् ।
पुनः संक्षिप्यते सर्वं जगत्प्राप्ते युगक्षये ॥ ३६
यथर्तावृतुलिङ्गानि नानारूपाणि पर्यये ।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥ ३७
एवमेतदनाद्यन्तं भूतसंहारकारकम् ।
अनादिनिधनं लोके चक्रं संपरिवर्तते ॥ ३८
त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशच्छतानि च ।

त्रयस्त्रिंशच्च देवानां सृष्टिः संक्षेपलक्षणा ॥ ३९
दिवस्पुत्रो बृहद्भानुश्चक्षुरात्मा विभावसुः ।
सविता च ऋचीकोऽर्को भानुराशावहो रविः ॥ ४०
पुत्रा विवस्वतः सर्वे मह्यस्तेषां तथावरः ।
देवभ्राट् तनयस्तस्य तस्मात्सुभ्राडिति स्मृतः ॥ ४१
सुभ्राजस्तु त्रयः पुत्राः प्रजावन्तो बहुश्रुताः ।
दशज्योतिः शतज्योतिः सहस्रज्योतिरात्मवान् ॥ ४२
दश पुत्रसहस्राणि दशज्योतेर्महात्मनः ।
ततो दशगुणाश्चान्ये शतज्योतेरिहात्मजाः ॥ ४३
भूयस्ततो दशगुणाः सहस्रज्योतिषः सुताः ।
तेभ्योऽयं कुरुवंशश्च यदूनां भरतस्य च ॥ ४४

ययातीक्ष्वाकुवंशश्च राजर्षीणां च सर्वशः ।
संभूता बहवो वंशा भूतसर्गाः सविस्तराः ॥ ४५
भूतस्थानानि सर्वाणि रहस्यं विविधं च यत् ।
वेदयोगं सविज्ञानं धर्मोऽर्थः काम एव च ॥ ४६
धर्मकामार्थशास्त्राणि शास्त्राणि विविधानि च ।
लोकयात्राविधानं च संभूतं दृष्टवानृषिः ॥ ४७
इतिहासाः सवैयाख्या विविधाः श्रुतयोऽपि च ।
इह सर्वमनुक्रान्तमुक्तं ग्रन्थस्य लक्षणम् ॥ ४८
विस्तीर्यैतन्महज्ज्ञानमृषिः संक्षेपमब्रवीत् ।
इष्टं हि विदुषां लोके समासव्यासधारणम् ॥ ४९
मन्वादि भारतं केचिदास्तीकादि तथापरे ।
तथोपरिचराद्यन्ये विप्राः सम्यगधीयते ॥ ५०
विविधं संहिताज्ञानं दीपयन्ति मनीषिणः ।
व्याख्यातुं कुशलाः केचिद्ग्रन्थं धारयितुं परे ॥ ५१
तपसा ब्रह्मचर्येण व्यस्य वेदं सनातनम् ।
इतिहासमिमं चक्रे पुण्यं सत्यवतीसुतः ॥ ५२
पराशरात्मजो विद्वान्ब्रह्मर्षिः संशितव्रतः ।
मातुर्नियोगाद्धर्मात्मा गाङ्गेयस्य च धीमतः ॥ ५३

क्षेत्रे विचित्रवीर्यस्य कृष्णद्वैपायनः पुरा ।
त्रीनग्नीनिव कौरव्याञ्जनयामास वीर्यवान् ॥ ५४
उत्पाद्य धृतराष्ट्रं च पाण्डुं विदुरमेव च ।
जगाम तपसे धीमान्पुनरेवाश्रमं प्रति ॥ ५५
तेषु जातेषु वृद्धेषु गतेषु परमां गतिम् ।
अब्रवीद्भारतं लोके मानुषेऽस्मिन्महानृषिः ॥ ५६
जनमेजयेन पृष्टः सन्ब्राह्मणैश्च सहस्रशः ।
शशास शिष्यमासीनं वैशंपायनमन्तिके ॥ ५७
स सदस्यैः सहासीनः श्रावयामास भारतम् ।
कर्मान्तरेषु यज्ञस्य चोद्यमानः पुनः पुनः ॥ ५८
विस्तरं कुरुवंशस्य गान्धार्या धर्मशीलताम् ।
क्षत्तुः प्रज्ञां धृतिं कुन्त्याः सम्यग्द्वैपायनोऽब्रवीत् ॥ ५९
वासुदेवस्य माहात्म्यं पाण्डवानां च सत्यताम् ।
दुर्वृत्तं धार्तराष्ट्राणामुक्तवान्भगवानृषिः ॥ ६०
चतुर्विंशतिसाहस्रीं चक्रे भारतसंहिताम् ।
उपाख्यानैर्विना तावद्भारतं प्रोच्यते बुधैः ॥ ६१
ततोऽध्यर्धशतं भूयः संक्षेपं कृतवानृषिः ।
अनुक्रमणिमध्यायं वृत्तान्तानां सपर्वणाम् ॥ ६२
इदं द्वैपायनः पूर्वं पुत्रमध्यापयच्छुकम् ।
ततोऽन्येभ्योऽनुरूपेभ्यः शिष्येभ्यः प्रददौ प्रभुः ॥ ६३
नारदोऽश्रावयद्देवानसितो देवलः पितॄन् ।
गन्धर्वयक्षरक्षांसि श्रावयामास वै शुकः ॥ ६४

दुर्योधनो मन्युमयो महाद्रुमः
स्कन्धः कर्णः शकुनिस्तस्य शाखाः ।
दुःशासनः पुष्पफले समृद्धे
मूलं राजा धृतराष्ट्रोऽमनीषी ॥ ६५

युधिष्ठिरो धर्ममयो महाद्रुमः
स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखाः ।
माद्रीसुतौ पुष्पफले समृद्धे
मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च ॥ ६६



तं तथा वादिनं दीनं विलपन्तं महीपतिम् ।
गावल्गणिरिदं धीमान्महार्थं वाक्यमब्रवीत् ॥ १६२
श्रुतवानसि वै राज्ञो महोत्साहान्महाबलान् ।
द्वैपायनस्य वदतो नारदस्य च धीमतः ॥ १६३
महत्सु राजवंशेषु गुणैः समुदितेषु च ।
जातान्दिव्यास्त्रविदुषः शक्रप्रतिमतेजसः ॥ १६४
धर्मेण पृथिवीं जित्वा यज्ञैरिष्ट्वाप्तदक्षिणैः ।
अस्मिँल्लोके यशः प्राप्य ततः कालवशं गताः ॥ १६५
वैन्यं महारथं वीरं सृञ्जयं जयतां वरम् ।
सुहोत्रं रन्तिदेवं च कक्षीवन्तं तथौशिजम् ॥ १६६
बाह्लीकं दमनं शैब्यं शर्यातिमजितं जितम् ।
विश्वामित्रममित्रघ्नमम्बरीषं महाबलम् ॥ १६७
मरुत्तं मनुमिक्ष्वाकुं गयं भरतमेव च ।
रामं दाशरथिं चैव शशबिन्दुं भगीरथम् ॥ १६८
ययातिं शुभकर्माणं देवैर्यो याजितः स्वयम् ।
चैत्ययूपाङ्किता भूमिर्यस्येयं सवनाकरा ॥ १६९
इति राज्ञां चतुर्विंशन्नारदेन सुरर्षिणा ।
पुत्रशोकाभितप्ताय पुरा शैब्याय कीर्तिताः ॥ १७०
तेभ्यश्चान्ये गताः पूर्वं राजानो बलवत्तराः ।
महारथा महात्मानः सर्वैः समुदिता गुणैः ॥ १७१
पूरुः कुरुर्यदुः शूरो विष्वगश्वो महाद्युतिः ।

अनेना युवनाश्वश्च ककुत्स्थो विक्रमी रघुः ॥ १७२
विजिती वीतिहोत्रश्च भवः श्वेतो बृहद्गुरुः ।
उशीनरः शतरथः कङ्को दुलिदुहो द्रुमः ॥ १७३
दम्भोद्भवः परो वेनः सगरः संकृतिर्निमिः ।
अजेयः परशुः पुण्ड्रः शम्भुर्देवावृधोऽनघः ॥ १७४
देवाह्वयः सुप्रतिमः सुप्रतीको बृहद्रथः ।
महोत्साहो विनीतात्मा सुक्रतुर्नैषधो नलः ॥ १७५

सत्यव्रतः शान्तभयः सुमित्रः सुबलः प्रभुः ।
जानुजङ्घोऽनरण्योऽर्कः प्रियभृत्यः शुभव्रतः ॥ १७६
बलबन्धुर्निरामर्दः केतुशृङ्गो बृहद्बलः ।
धृष्टकेतुर्बृहत्केतुर्दीप्तकेतुर्निरामयः ॥ १७७
अविक्षित्प्रबलो धूर्तः कृतबन्धुर्दृढेषुधिः ।
महापुराणः संभाव्यः प्रत्यङ्गः परहा श्रुतिः ॥ १७८
एते चान्ये च बहवः शतशोऽथ सहस्रशः ।
श्रूयन्तेऽयुतशश्चान्ये संख्याताश्चापि पद्मशः ॥ १७९

हित्वा सुविपुलान्भोगान्बुद्धिमन्तो महाबलाः ।
राजानो निधनं प्राप्तास्तव पुत्रैर्महत्तमाः ॥ १८०
येषां दिव्यानि कर्माणि विक्रमस्त्याग एव च ।
माहात्म्यमपि चास्तिक्यं सत्यता शौचमार्जवम् ॥१८१
विद्वद्भिः कथ्यते लोके पुराणैः कविसत्तमैः ।
सर्वर्द्धिगुणसंपन्नास्ते चापि निधनं गताः ॥ १८२
तव पुत्रा दुरात्मानः प्रतप्ताश्चैव मन्युना ।
लुब्धा दुर्वृत्तभूयिष्ठा न ताञ्शोचितुमर्हसि ॥ १८३

श्रुतवानसि मेधावी बुद्धिमान्प्राज्ञसंमतः ।
येषां शास्त्रानुगा बुद्धिर्न ते मुह्यन्ति भारत ॥ १८४
निग्रहानुग्रहौ चापि विदितौ ते नराधिप ।
नात्यन्तमेवानुवृत्तिः श्रूयते पुत्ररक्षणे ॥ १८५

भवितव्यं तथा तच्च नातः शोचितुमर्हसि ।
दैवं प्रज्ञाविशेषेण को निवर्तितुमर्हति ॥ १८६
विधातृविहितं मार्गं न कश्चिदतिवर्तते ।

कालमूलमिदं सर्वं भावाभावौ सुखासुखे ॥ १८७
कालः पचति भूतानि कालः संहरति प्रजाः ।
निर्दहन्तं प्रजाः कालं कालः शमयते पुनः ॥ १८८
कालो विकुरुते भावान्सर्वाँल्लोके शुभाशुभान् ।
कालः संक्षिपते सर्वाः प्रजा विसृजते पुनः ।
कालः सर्वेषु भूतेषु चरत्यविधृतः समः ॥ १८९
अतीतानागता भावा ये च वर्तन्ति सांप्रतम् ।
तान्कालनिर्मितान्बुद्ध्वा न संज्ञां हातुमर्हसि ॥ १९०

सूत उवाच ।

अत्रोपनिषदं पुण्यां कृष्णद्वैपायनोऽब्रवीत् ।
भारताध्ययनात्पुण्यादपि पादमधीयतः ।
श्रद्दधानस्य पूयन्ते सर्वपापान्यशेषतः ॥ १९१
देवर्षयो ह्यत्र पुण्या ब्रह्मराजर्षयस्तथा ।
कीर्त्यन्ते शुभकर्माणस्तथा यक्षमहोरगाः ॥ १९२
भगवान्वासुदेवश्च कीर्त्यतेऽत्र सनातनः ।

स हि सत्यमृतं चैव पवित्रं पुण्यमेव च ॥ १९३
शाश्वतं ब्रह्म परमं ध्रुवं ज्योतिः सनातनम् ।
यस्य दिव्यानि कर्माणि कथयन्ति मनीषिणः ॥ १९४
असत्सत्सदसच्चैव यस्माद्देवात्प्रवर्तते ।
संततिश्च प्रवृत्तिश्च जन्म मृत्युः पुनर्भवः ॥ १९५
अध्यात्मं श्रूयते यच्च पञ्चभूतगुणात्मकम् ।
अव्यक्तादि परं यच्च स एव परिगीयते ॥ १९६

यत्तद्यतिवरा युक्ता ध्यानयोगबलान्विताः ।
प्रतिबिम्बमिवादर्शे पश्यन्त्यात्मन्यवस्थितम् ॥ १९७
श्रद्दधानः सदोद्युक्तः सत्यधर्मपरायणः ।
आसेवन्निममध्यायं नरः पापात्प्रमुच्यते ॥ १९८

अनुक्रमणिमध्यायं भारतस्येममादितः ।
आस्तिकः सततं शृण्वन्न कृच्छ्रेष्ववसीदति ॥ १९९
उभे संध्ये जपन्किंचित्सद्यो मुच्येत किल्बिषात् ।
अनुक्रमण्या यावत्स्यादह्ना रात्र्या च संचितम् ॥ २००
भारतस्य वपुर्ह्येतत्सत्यं चामृतमेव च ।
नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा ॥ २०१
ह्रदानामुदधिः श्रेष्ठो गौर्वरिष्ठा चतुष्पदाम् ।
यथैतानि वरिष्ठानि तथा भारतमुच्यते ॥ २०२
यश्चैनं श्रावयेच्छ्राद्धे ब्राह्मणान्पादमन्ततः ।
अक्षय्यमन्नपानं तत्पितॄंस्तस्योपतिष्ठति ॥ २०३
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ॥ २०४
कार्ष्णं वेदमिमं विद्वाञ्श्रावयित्वार्थमश्नुते ।
भ्रूणहत्याकृतं चापि पापं जह्यान्न संशयः ॥ २०५
य इमं शुचिरध्यायं पठेत्पर्वणि पर्वणि ।
अधीतं भारतं तेन कृत्स्नं स्यादिति मे मतिः ॥ २०६
यश्चेमं शृणुयान्नित्यमार्षं श्रद्धासमन्वितः ।
स दीर्घमायुः कीर्तिं च स्वर्गतिं चाप्नुयान्नरः ॥ २०७
चत्वार एकतो वेदा भारतं चैकमेकतः ।
समागतैः सुरर्षिभिस्तुलामारोपितं पुरा ।
महत्त्वे च गुरुत्वे च ध्रियमाणं ततोऽधिकम् ॥ २०८
महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥ २०९

तपो न कल्कोऽध्ययनं न कल्कः
स्वाभाविको वेदविधिर्न कल्कः ।
प्रसह्य वित्ताहरणं न कल्क-
स्तान्येव भावोपहतानि कल्कः ॥ २१०

इति श्रीमहाभारते आदिपर्वणि अनुक्रमणी नाम प्रथमोऽध्यायः ॥ १ ॥

॥ समाप्तमनुक्रमणीपर्व ॥

# अरण्यकपर्व

## नलोपाख्यनम्

॥ बृहदश्व उवाच ॥
आसीद्राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैरिष्टै[1] रूपवानश्वकोविदः ॥ १ ॥
अतिष्ठन्मनुजेन्द्राणां मूर्ध्नि देवपतिर्यथा ।
उपर्युपरि सर्वेषामादित्य इव तेजसा ॥ २ ॥
ब्रह्मण्यो वेदविच्छूरो[2] निषधेषु महीपतिः ।
अक्षप्रियः सत्यवादी महानक्षौहिणीपतिः ॥ ३ ॥
ईप्सितो नरनारीणामुदारः संयतेन्द्रियः ।
रक्षिता धन्विनां श्रेष्ठः साक्षादिव मनुः स्वयम् ॥ ४ ॥
तथैवासीद्विदर्भेषु भीमो भीमपराक्रमः ।
शूरः सर्वगुणैर्युक्तः प्रजाकामः स चाप्रजः ॥ ५ ॥
स प्रजार्थे परं यत्नमकरोत्सुसमाहितः ।
तमभ्यगच्छद्ब्रह्मर्षिर्दमनो नाम भारत ॥ ६ ॥
तं स भीमः प्रजाकामस्तोषयामास धर्मवित् ।
महिष्या सह राजेन्द्र सत्कारेण सुवर्चसम् ॥ ७ ॥
तस्मै प्रसन्नो दमनः सभार्याय वरं ददौ ।
कन्यारत्नं कुमारांश्च त्रीनुदारान्महायशाः ॥ ८ ॥
दमयन्तीं दमं दान्तं दमनं च सुवर्चसम् ।
उपपन्नान्गुणैः सर्वैर्भीमान्भीमपराक्रमान् ॥ ९ ॥
दमयन्ती तु रूपेण तेजसा वपुषा श्रिया ।
सौभाग्येन च लोकेषु यशः प्राप सुमध्यमा ॥ १० ॥
अथ तां वयसि प्राप्ते दासीनां समलंकृतम् ।
शतं शतं सखीनां च पर्युपासच्छचीमिव ॥ ११ ॥
तत्र स्म राजते भैमी सर्वाभरणभूषिता ।
सखीमध्येऽनवद्याङ्गी विद्युत्सौदामनी यथा ॥ १२ ॥
न देवेषु न यक्षेषु तादृग्रूपवती क्वचित् ।
मानुषेष्वपि चान्येषु दृष्टपूर्वाथवा श्रुता ॥ १३ ॥
नलश्च नरशार्दूलो लोकेष्वप्रतिमो भुवि ।
कन्दर्प इव रूपेण मूर्तिमानभवत्स्वयम् ॥ १४ ॥
तस्याः समीपे तु नलं प्रशशंसुः कुतूहलात् ।
नैषधस्य समीपे तु दमयन्तीं पुनः पुनः ॥ १५ ॥

तयोरदृष्टकामो ऽभूच्छृण्वतोः सततं गुणान् ।
अन्योन्यं प्रति कौन्तेय स व्यवर्धत हृच्छयः ॥ १६ ॥
अशक्नुवन्नलः कामं तदा धारयितुं हृदा ।
अन्तःपुरसमीपस्थे वन आस्ते रहो गतः ॥ १७ ॥
स ददर्श ततो हंसाञ्जातरूपपरिष्कृतान् ।
वने विचरतां तेषामेकं जग्राह पक्षिणम् ॥ १८ ॥
ततो ऽन्तरिक्षगो वाचं व्याजहार नलं तदा ।
हन्तव्यो ऽस्मि न ते राजन्करिष्यामि तव प्रियम् ॥ १९ ॥
दमयन्तीसकाशे त्वां कथयिष्यामि नैषध ।
यथा त्वदन्यं पुरुषं न सा मंस्यति कर्हिचित् ॥ २० ॥
एवमुक्तस्ततो हंसमुत्ससर्ज महीपतिः ।
ते तु हंसाः समुत्पत्य विदर्भानगमंस्ततः ॥ २१ ॥
विदर्भनगरीं गत्वा दमयन्त्यास्तदान्तिके ।
निपेतुस्ते गरुत्मन्तः सा ददर्श च तान्खगान् ॥ २२ ॥
सा तानद्भुतरूपान्वै दृष्ट्वा सखीगणावृता ।
हृष्टा ग्रहीतुं खगमांस्त्वरमाणोपचक्रमे ॥ २३ ॥
अथ हंसा विससृपुः सर्वतः प्रमदावने ।
एकैकशस्तदा कन्यास्तान्हंसान्समुपाद्रवन् ॥ २४ ॥
दमयन्ती तु यं हंसं समुपाधावदन्तिके ।
स मानुषीं गिरं कृत्वा दमयन्तीमथाब्रवीत् ॥ २५ ॥
दमयन्ति नलो नाम निषधेषु महीपतिः ।
अश्विनोः सदृशो रूपे न समास्तस्य मानुषाः ॥ २६ ॥
तस्य वै यदि भार्या त्वं भवेथा वरवर्णिनि ।
सफलं ते भवेज्जन्म रूपं चेदं सुमध्यमे ॥ २७ ॥
वयं हि देवगन्धर्वमनुष्योरगराक्षसान् ।
दृष्टवन्तो न चास्माभिर्दृष्टपूर्वस्तथाविधः ॥ २८ ॥
त्वं चापि रत्नं नारीणां नरेषु च नलो वरः ।
विशिष्टाया विशिष्टेन संगमो गुणवान्भवेत् ॥ २९ ॥
एवमुक्ता तु हंसेन दमयन्ती विशां पते ।
अब्रवीत्तत्र तं हंसं त्वमप्येवं नले वद ॥ 30 ॥
तथेत्युक्त्वाण्डजः कन्यां विदर्भस्य विशां पते ।
पुनरागम्य निषधान्नले सर्वं न्यवेदयत् ॥ ३१ ॥
॥ इति नलोपाख्याने प्रथमो ऽध्यायः ॥ १ ॥
दमयन्ती तु तच्छ्रुत्वा वचो हंसस्य भारत ।
ततः प्रभृति न स्वस्था नलं प्रति बभूव सा ॥ १ ॥
ततश्चिन्तापरा दीना विवर्णवदना कृशा ।

बभूव दमयन्ती तु निःश्वासपरमा तदा ॥ २ ॥
ऊर्ध्वदृष्टिर्ध्यानपरा बभूवोन्मत्तदर्शना ।
पाण्डुवर्णा क्षणेनाथ हृच्छयाविष्टचेतना ॥ ३ ॥
न शय्यासनभोगेषु रतिं विन्दति कर्हिचित् ।
न नक्तं न दिवा शेते हाहेति रुदती मुहुः ॥ ४ ॥
ततो विदर्भपतये दमयन्त्याः सखीजनः ।
न्यवेदयत्तामस्वस्थां दमयन्तीं नरेश्वर ॥ ५ ॥
तच्छ्रुत्वा नृपतिर्भीमो दमयन्तीसखीगणात् ।
चिन्तयामास तत्कार्यं सुमहत्स्वां सुतां प्रति ॥ ६ ॥
स समीक्ष्य महीपालः स्वां सुतां प्राप्तयौवनाम् ।
अपश्यदात्मना कार्यं दमयन्त्याः स्वयंवरम् ॥ ७ ॥
स संनिमन्त्रयामास महीपालान्विशां पते ।
अनुभूयतामयं वीराः स्वयंवर इति प्रभो ॥ ८ ॥
श्रुत्वा तु पार्थिवाः सर्वे दमयन्त्याः स्वयंवरम् ।
अभिजग्मुस्ततो भीमं राजानो भीमशासनात् ॥ ९ ॥
हस्त्यश्वरथघोषेण नादयन्तो वसुंधराम् ।
विचित्रमाल्याभरणैर्बलैर्दृश्यैः स्वलंकृतैः ॥ १० ॥
तेषां भीमो महाबाहुः पार्थिवानां महात्मनाम् ।
यथार्हमकरोत्पूजां ते ऽवसंस्तत्र पूजिताः ॥ ११ ॥
एतस्मिन्नेव काले तु सुराणामृषिसत्तमौ ।
अटमानौ महात्मानाविन्द्रलोकमितो गतौ ॥ १२ ॥
नारदः पर्वतश्चैव महाप्राज्ञौ महाव्रतौ ।
देवराजस्य भवनं विविशाते सुपूजितौ ॥ १३ ॥
तावर्चयित्वा मघवा ततः कुशलमव्ययम् ।
पप्रच्छानामयं चापि तयोः सर्वगतं विभुः ॥ १४ ॥

॥ नारद उवाच ॥

आवयोः कुशलं देव सर्वत्रगतमीश्वर ।
लोके च मघवन्कृत्स्ने नृपाः कुशलिनो विभो ॥ १५ ॥

॥ बृहदश्व उवाच ॥

नारदस्य वचः श्रुत्वा पप्रच्छ बलवृत्रहा ।
धर्मज्ञाः पृथिवीपालास्त्यक्तजीवितयोधिनः ॥ १६ ॥
शस्त्रेण निधनं काले ये गच्छन्त्यपराङ्मुखाः ।
अयं लोको ऽक्षयस्तेषां यथैव मम कामधुक् ॥ १७ ॥
क्व नु ते क्षत्रियाः शूरा न हि पश्यामि तानहम् ।
आगच्छतो महीपालान्दयितानतिथीन्मम ॥ १८ ॥
एवमुक्तस्तु शक्रेण नारदः प्रत्यभाषत ।

शृणु मे मघवन्येन न दृश्यन्ते महीक्षितः ॥ १९ ॥
विदर्भराज्ञो दुहिता दमयन्तीति विश्रुता ।
रूपेण समतिक्रान्ता पृथिव्यां सर्वयोषितः ॥ २० ॥
तस्याः स्वयंवरः शक्र भविता नचिरादिव ।
तत्र गच्छन्ति राजानो राजपुत्राश्च सर्वशः ॥” २१ ॥
एतस्मिन्कथ्यमाने तु लोकपालाश्च साग्निकाः ।
आजग्मुर्देवराजस्य समीपममरोत्तमाः ॥ २२ ॥
ततस्ते शुश्रुवुः सर्वे नारदस्य वचो महत् ।
श्रुत्वैव चाब्रुवन्हृष्टा “गच्छामो वयमप्युत” ॥ २३ ॥
ततः सर्वे महाराज सगणाः सहवाहनाः ।
विदर्भानभिजग्मुस्ते यतः सर्वे महीक्षितः ॥ २४ ॥
नलो ऽपि राजा कौन्तेय श्रुत्वा राज्ञां समागमम् ।
अभ्यगच्छददीनात्मा दमयन्तीमनुव्रतः ॥ २५ ॥
अथ देवाः पथि नलं ददृशुर्भूतले स्थितम् ।
साक्षादिव स्थितं मूर्त्या मन्मथं रूपसंपदा ॥ २६ ॥
तं दृष्ट्वा लोकपालास्ते भ्राजमानं यथा रविम् ।
तस्थुर्विगतसंकल्पा विस्मिता रूपसंपदा ॥ २७ ॥
ततो ऽन्तरिक्षे विष्टभ्य विमानानि दिवौकसः ।
अब्रुवन्नैषधं राजन्नवतीर्य नभस्तलात् ॥ २८ ॥
भो भो नैषध राजेन्द्र नल सत्यव्रतो भवान् ।
अस्माकं कुरु साहाय्यं दूतो भव नरोत्तम ॥ २९ ॥

॥ इति नलोपाख्याने द्वितीयो ऽध्यायः ॥ २ ॥

तेभ्यः प्रतिज्ञाय नलः करिष्य इति भारत ।
अथैतान्परिपप्रच्छ कृताञ्जलिरुपस्थितः ॥ १ ॥
के वै भवन्तः कश्चासौ यस्याहं दूत ईप्सितः ।
किं च तद्वो मया कार्यं कथयध्वं यथातथम् ॥ २ ॥
एवमुक्ते नैषधेन मघवानभ्यभाषत ।
अमरान्वै निबोधास्मान्दमयन्त्यर्थमागतान् ॥ ३ ॥
अहमिन्द्रो ऽयमग्निश्च तथैवायमपां पतिः[1] ।
शरीरान्तकरो नृणां यमो ऽयमपि पार्थिव ॥ ४ ॥
त्वं वै समागतानस्मान्दमयन्त्यै निवेदय ।
लोकपाला महेन्द्राद्याः समायान्ति दिदृक्षवः ॥ ५ ॥
प्राप्तुमिच्छन्ति देवास्त्वां शक्रो ऽग्निर्वरुणो यमः ।
तेषामन्यतमं देवं पतित्वे वरयस्व ह’॥ ६ ॥ ”

एवमुक्तः स शक्रेण नलः प्राञ्जलिरब्रवीत् ।
एकार्थसमुपेतं मां न प्रेषयितुमर्हथ ॥ ७ ॥
कथं नु जातसंकल्पः स्त्रियमुत्सहते पुमान् ।
परार्थमीदृशं वक्तुं तत्क्षमन्तु महेश्वराः ॥ ८ ॥

॥ देवा ऊचुः ॥

करिष्य इति संश्रुत्य पूर्वमस्मासु नैषध ।
न करिष्यसि कस्मात्त्वं व्रज नैषध माचिरम् ॥ ९ ॥

॥ बृहदश्व उवाच ॥

एवमुक्तः स देवैस्तैर्नैषधः पुनरब्रवीत् ।
सुरक्षितानि वेश्मानि प्रवेष्टुं कथमुत्सहे ॥ १० ॥
प्रवेक्ष्यसीति तं शक्रः पुनरेवाभ्यभाषत ।
जगाम स तथेत्युक्त्वा दमयन्त्या निवेशनम् ॥ ११ ॥
ददर्श तत्र वैदर्भीं सखीगणसमावृताम् ।
देदीप्यमानां वपुषा श्रिया च वरवर्णिनीम् ॥ १२ ॥
अतीव सुकुमाराङ्गीं तनुमध्यां सुलोचनाम् ।
आक्षिपन्तीमिव प्रभां शशिनः स्वेन तेजसा ॥ १३ ॥
तस्य दृष्ट्वैव ववृधे कामस्तां चारुहासिनीम् ।
सत्यं चिकीर्षमाणस्तु धारयामास हृच्छयम् ॥ १४ ॥
ततस्ता नैषधं दृष्ट्वा संभ्रान्ताः परमाङ्गनाः ।
आसनेभ्यः समुत्पेतुस्तेजसा तस्य धर्षिताः ॥ १५ ॥
प्रशशंसुश्च सुप्रीता नलं ता विस्मयान्विताः ।
न चैनमभ्यभाषन्त मनोभिस्त्वभ्यपूजयन् ॥ १६ ॥
अहो रूपमहो कान्तिरहो धैर्यं महात्मनः ।
को ऽयं देवो ऽथवा यक्षो गन्धर्वो वा भविष्यति ॥ १७ ॥
न तास्तं शक्नुवन्ति स्म व्याहर्तुमपि किंचन ।
तेजसा धर्षितास्तस्य लज्जावत्यो वराङ्गनाः ॥ १८ ॥
अथैनं स्मयमानं तु स्मितपूर्वाभिभाषिणी ।
दमयन्ती नलं वीरमभ्यभाषत विस्मिता ॥ १९ ॥
कस्त्वं सर्वानवद्याङ्ग मम हृच्छयवर्धन ।
प्राप्तो ऽस्यमरवद्वीर ज्ञातुमिच्छामि ते ऽनघ ॥ २० ॥
कथमागमनं चेह कथं चासि न लक्षितः ।
सुरक्षितं हि मे वेश्म राजा चैवोग्रशासनः ॥ २१ ॥
एवमुक्तस्तु वैदर्भ्या नलस्तां प्रत्युवाच ह ।
नलं मां विद्धि कल्याणि देवदूतमिहागतम् ॥ २२ ॥
देवास्त्वां प्राप्तुमिच्छन्ति शक्रो ऽग्निर्वरुणो यमः ।
तेषामन्यतमं देवं पतिं वरय शोभने ॥ २३ ॥

तेषामेव प्रभावेन प्रविष्टो ऽहमलक्षितः ।
प्रविशन्तं न मां कश्चिदपश्यन्नाप्यवारयत् ॥ २४ ॥
एतदर्थमहं भद्रे प्रेषितः सुरसत्तमैः ।
एतच्छ्रुत्वा शुभे बुद्धिं प्रकुरुष्व यथेच्छसि ॥ २५ ॥
॥ इति नलोपाख्याने तृतीयो ऽध्यायः ॥ ३ ॥
सा नमस्कृत्य देवेभ्यः प्रहस्य नलमब्रवीत् ।
प्रणयस्व यथाश्रद्धं राजन्किं करवाणि ते ॥ १ ॥
अहं चैव हि यच्चान्यन्ममास्ति वसु किंचन ।
तत्सर्वं तव विश्रब्धं कुरु प्रणयमीश्वर ॥ २ ॥
हंसानां वचनं यत्तु तन्मां दहति पार्थिव ।
त्वत्कृते हि मया वीर राजानः संनिपातिताः ॥ ३ ॥
यदि त्वं भजमानां मां प्रत्याख्यास्यसि मानद ।
विषमग्निं जलं रज्जुमास्थास्ये तव कारणात् ॥ ४ ॥
एवमुक्तस्तु वैदर्भ्या नलस्तां प्रत्युवाच ह ।
तिष्ठत्सु लोकपालेषु कथं मानुषमिच्छसि ॥ ५ ॥
येषामहं लोककृतामीश्वराणां महात्मनाम् ।
न पादरजसा तुल्यो मनस्ते तेषु वर्तताम् ॥ ६ ॥
विप्रियं ह्याचरन्मर्त्यो देवानां मृत्युमृच्छति ।
त्राहि मामनवद्याङ्गि वरयस्व सुरोत्तमान् ॥ ७ ॥
विरजांसि च वासांसि दिव्याश्चित्राः स्रजस्तथा ।
भूषणानि च दिव्यानि देवान्प्राप्य तु भुङ्क्ष्व वै ॥ ८ ॥
य इमां पृथिवीं कृत्स्नां संक्षिप्य ग्रसते पुनः ।
हुताशमीशं देवानां का तं न वरयेत्पतिम् ॥ ९ ॥
यस्य दण्डभयात्सर्वे भूतग्रामाः समागताः ।
धर्ममेवानुरुध्यन्ति का तं न वरयेत्पतिम् ॥ १० ॥
धर्मात्मानं महात्मानं दैत्यदानवमर्दनम् ।
महेन्द्रं सर्वदेवानां का तं न वरयेत्पतिम् ॥ ११ ॥
क्रियतामविशङ्केन मनसा यदि मन्यसे ।
वरुणं लोकपालानां सुहृद्वाक्यमिदं शृणु ॥ १२ ॥
नैषधेनैवमुक्ता सा दमयन्ती वचो ऽब्रवीत् ।
समाप्लुताभ्यां नेत्राभ्यां शोकजेनाथ वारिणा ॥ १३ ॥
देवेभ्यो ऽहं नमस्कृत्य सर्वेभ्यः पृथिवीपते ।
वृणे त्वामेव भर्तारं सत्यमेतद्ब्रवीमि ते ॥ १४ ॥
तामुवाच ततो राजा वेपमानां कृताञ्जलिम् ।
दौत्येनागत्य कल्याणि नोत्सहे स्वार्थमीप्सितम् ॥ १५ ॥
कथं ह्यहं प्रतिश्रुत्य देवतानां विशेषतः ।

परार्थे यत्नमारभ्य कथं स्वार्थमिहोत्सहे ॥ १६ ॥
एष धर्मो यदि स्वार्थो ममापि भविता ततः ।
एवं स्वार्थं करिष्यामि तथा भद्रे विधीयताम् ॥ १७ ॥
ततो बाष्पाकुलां वाचं दमयन्ती शुचिस्मिता ।
प्रत्याहरन्ती शनकैर्नलं राजानमब्रवीत् ॥ १८ ॥
उपायो ऽयं मया दृष्टो निरपायो नरेश्वर ।
येन दोषो न भविता तव राजन्कथंचन ॥ १९ ॥
त्वं चैव हि नरश्रेष्ठ देवाश्चेन्द्रपुरोगमाः ।
आयान्तु सहिताः सर्वे मम यत्र स्वयंवरः ॥ २० ॥
ततो ऽहं लोकपालानां संनिधौ त्वां नरेश्वर ।
वरयिष्ये नरव्याघ्र नैवं दोषो भविष्यति ॥ २१ ॥
एवमुक्तस्तु वैदर्भ्या नलो राजा विशां पते ।
आजगाम पुनस्तत्र यत्र देवाः समागताः ॥ २२ ॥
तमपश्यंस्तथायान्तं लोकपाला महेश्वराः ।
दृष्ट्वा चैनं ततो ऽपृच्छन्वृत्तान्तं सर्वमेव तम् ॥ २३ ॥
कच्चिद्दृष्टा त्वया राजन्दमयन्ती शुचिस्मिता ।
किमब्रवीच्च नः सर्वान्वद भूमिपते ऽनघ"॥ २४ ॥

॥ नल उवाच ॥

भवद्भिरहमादिष्टो दमयन्त्या निवेशनम् ।
प्रविष्टः सुमहाकक्षं दण्डिभिः स्थविरैर्वृतम् ॥ २५ ॥
प्रविशन्तं च मां तत्र न कश्चिद्दृष्टवान्नरः ।
ऋते तां पार्थिवसुतां भवतामेव तेजसा ॥ २६ ॥
सख्यश्चास्या मया दृष्टास्ताभिश्चाप्युपलक्षितः ।
विस्मिताश्चाभवन्सर्वा दृष्ट्वा मां विबुधेश्वराः ॥ २७ ॥
वर्ण्यमानेषु च मया भवत्सु रुचिरानना ।
मामेव गतसंकल्पा वृणीते सा सुरोत्तमाः ॥ २८ ॥
अब्रवीच्चैव मां बाला 'आयान्तु सहिताः सुराः ।
त्वया सह नरव्याघ्र मम यत्र स्वयंवरः ॥ २९ ॥
तेषामहं संनिधौ त्वां वरयिष्यामि नैषध ।
एवं तव महाबाहो दोषो न भवितेति ह ॥ ३० ॥
एतावदेव विबुधा यथावृत्तमुदाहृतम् ।
मया शेषे प्रमाणं तु भवन्तस्त्रिदशेश्वराः ॥ ३१ ॥

॥ इति नलोपाख्याने चतुर्थो ऽध्यायः ॥ ४ ॥

॥ बृहदश्व उवाच ॥

अथ काले शुभे प्राप्ते तिथौ पुण्ये क्षणे तथा ।
आजुहाव महीपालान्भीमो राजा स्वयंवरे ॥ १ ॥

तच्छ्रुत्वा पृथिवीपालाः सर्वे हृच्छयपीडिताः ।
त्वरिताः समुपाजग्मुर्दमयन्तीमभीप्सवः ॥ २ ॥
कनकस्तम्भरुचिरं तोरणेन विराजितम् ।
विविशुस्ते नृपा रङ्गं महासिंहा इवाचलम् ॥ ३ ॥
दमयन्ती ततो रङ्गं प्रविवेश शुभानना ।
मुष्णन्ती प्रभया राज्ञां चक्षूंषि च मनांसि च ॥ ४ ॥
तस्या गात्रेषु पतिता तेषां दृष्टिर्महात्मनाम् ।
तत्र तत्रैव सक्ताभून्न चचाल च पश्यताम् ॥ ५ ॥
ततः संकीर्त्यमानेषु राज्ञां नामसु भारत ।
ददर्श भैमी पुरुषान्पञ्च तुल्याकृतीनिह ॥ ६ ॥
तान्समीक्ष्य ततः सर्वान्निर्विशेषाकृतीन्स्थितान् ।
संदेहादथ वैदर्भी नाभ्यजानान्नलं नृपम् ॥ ७ ॥
यं यं हि ददृशे तेषां तं तं मेने नलं नृपम् ।
सा चिन्तयन्ती बुद्ध्याथ तर्कयामास भाविनी ॥ ८ ॥
कथं नु देवाञ्जानीयां कथं विद्यां नलं नृपम् ।
एवं संचिन्तयन्ती सा वैदर्भी भृशदुःखिता ॥ ९ ॥
श्रुतानि देवलिङ्गानि तर्कयामास भारत ।
देवानां यानि लिङ्गानि स्थविरेभ्यः श्रुतानि मे ॥ १० ॥
तानीह तिष्ठतां भूमावेकस्यापि न लक्षये ।
एवं विचिन्त्य बहुधा विचार्य च पुनः पुनः ॥ ११ ॥
शरणं प्रति देवानां प्राप्तकालममन्यत ।
देवेभ्यः प्राञ्जलिर्भूत्वा वेपमानेदमब्रवीत् ॥ १२ ॥
हंसानां वचनं श्रुत्वा यथा मे नैषधो वृतः ।
पतित्वे तेन सत्येन देवास्तं प्रदिशन्तु मे ॥ १३ ॥
मनसा वचसा चैव यथा नातिचराम्यहम् ।
तेन सत्येन विबुधास्तमेव प्रदिशन्तु मे ॥ १४ ॥
यथा देवैः स मे भर्ता विहितो निषधाधिपः ।
तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे ॥ १५ ॥
यथेदं व्रतमारब्धं नलस्याराधने मया ।
तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे ॥ १६ ॥
स्वं चैव रूपं कुर्वन्तु लोकपाला महेश्वराः ।
यथाहमभिजानीयां पुण्यश्लोकं नराधिपम् ॥ १७ ॥
निशम्य दमयन्त्यास्तत्करुणं परिदेवितम् ।
यथोक्तं चक्रिरे देवाः सामर्थ्यं लिङ्गधारणे ॥ १८ ॥
सापश्यद्विबुधान्सर्वानस्वेदान्स्तब्धलोचनान् ।
हृषितस्रग्रजोहीनान्स्थितानस्पृशतः क्षितिम् ॥ १९ ॥

छायाद्वितीयो म्लानस्रग्रजःस्वेदसमन्वितः ।
भूमिष्ठो नैषधश्चैव निमेषेण च सूचितः ॥ २० ॥
सा समीक्ष्य तु तान्देवान्पुण्यश्लोकं च भारत ।
नैषधं वरयामास भैमी धर्मेण पाण्डव ॥ २१ ॥
विलज्जमाना वस्त्रान्ते जग्राहायतलोचना ।
स्कन्धदेशे ऽसृजत्तस्य स्रजं परमशोभनाम् ॥ २२ ॥
वरयामास चैवैनं पतित्वे वरवर्णिनी ।
ततो हाहेति सहसा मुक्तः शब्दो नराधिपैः ॥ २३ ॥
देवैर्महर्षिभिस्तत्र साधु साध्विति भारत ।
विस्मितैरीरितः शब्दः प्रशंसद्भिर्नलं नृपम् ॥ २४ ॥
दमयन्तीं तु कौरव्य वीरसेनसुतो नृपः ।
आश्वासयद्वरारोहां प्रहृष्टेनान्तरात्मना ॥ २५ ॥
यत्त्वं भजसि कल्याणि पुमांसं देवसंनिधौ ।
तस्मान्मां विद्धि भर्तारमेवं ते वचने रतम् ॥ २६ ॥
यावच्च मे धरिष्यन्ति प्राणा देहे शुचिस्मिते ।
तावत्त्वयि भविष्यामि सत्यमेतद्ब्रवीमि ते'॥ २७ ॥
पार्थिवाश्चानुभूयास्य विवाहं विस्मयान्विताः ।
दमयन्त्याश्च मुदिताः प्रतिजग्मुर्यथागतम् ॥ २८ ॥
गतेषु पार्थिवेन्द्रेषु भीमः प्रीतो महामनाः ।
विवाहं कारयामास दमयन्त्या नलस्य च ॥ २९ ॥
॥ इति नलोपाख्याने पञ्चमो ऽध्यायः ॥ ५ ॥



# सावित्र्युपाख्यानम्

## पतिव्रतामाहात्म्यम्

॥ मार्कण्डेय उवाच ॥

शृणु राजन्कुलस्त्रीणां महाभाग्यं युधिष्ठिर ।
सर्वमेतद्यथा प्राप्तं सावित्र्या राजकन्यया ॥ १ ॥[1]
आसीन्मद्रेषु महात्मा राजा परमधार्मिकः ।
ब्रह्मण्यश्च शरण्यश्च सत्यसंधो जितेन्द्रियः ॥ २ ॥
यज्वा दानपतिर्दक्षः पौरजानपदप्रियः ।
पार्थिवोऽश्वपतिर्नाम सर्वभूतहिते रतः ॥ ३ ॥
क्षमावाननपत्यश्च सत्यवान्संयतेन्द्रियः ।
अतिक्रान्तेन वयसा संतापमुपजग्मिवान् ॥ ४ ॥
अपत्योत्पादनार्थं च तीव्रं नियममास्थितः ।
काले परिमिताहारो ब्रह्मचारी जितेन्द्रियः ॥ ५ ॥
हुत्वा शतसहस्रं स सावित्र्या राजसत्तमः ।
षष्ठे षष्ठे तदा काले बभूव मितभोजनः ॥ ६ ॥
एतेन नियमेनासीद्वर्षाणि दश चाष्ट च ।
पूर्णे त्वष्टादशे वर्षे सावित्री तुष्टिमभ्यगात् ॥ ७ ॥
रूपिणी तु तदा राजन्दर्शयामास तं नृपम् ।
अग्निहोत्रात्समुत्थाय हर्षेण महतान्विता ।
उवाच चैनं वरदा वचनं पार्थिवं तदा ॥ ८ ॥

॥ सावित्र्युवाच ॥

ब्रह्मचर्येण शुद्धेन दमेन नियमेन च ।
सर्वात्मना च भक्त्या च तुष्टास्मि तव पार्थिव ॥ ९ ॥
वरं वृणीष्वाश्वपते मद्रराज यथेप्सितम् ।
न प्रमादश्च धर्मेषु कर्तव्यस्ते कथंचन ॥ १० ॥

॥ अश्वपतिरुवाच ॥

अपत्यार्थः समारम्भः कृतो धर्मेप्सया मया ।
पुत्रा मे बहवो देवि भवेयुः कुलभावनाः ॥ ११ ॥
तुष्टासि यदि मे देवि वरमेतं वृणोम्यहम् ।
संतानं परमो धर्म इत्याहुर्मां द्विजातयः ॥ १२ ॥

॥ सावित्र्युवाच ॥

पूर्वमेव मया राजन्नभिप्रायमिमं तव ।

ज्ञात्वा पुत्रार्थमुक्तो वै भगवांस्ते पितामहः ॥ १३ ॥
प्रसादाच्चैव तस्मात्ते स्वयंभूविहिताद्भुवि ।
कन्या तेजस्विनी सौम्य क्षिप्रमेव भविष्यति ॥ १४ ॥
उत्तरं च न ते किंचिद्व्याहर्तव्यं कथंचन ।
पितामहनिसर्गेण तुष्टा ह्येतद्ब्रवीमि ते ॥ १५ ॥

॥ मार्कण्डेय उवाच ॥

स तथेति प्रतिज्ञाय सावित्र्या वचनं नृपः ।
प्रसादयामास पुनः क्षिप्रमेतद्भविष्यति ॥ १६ ॥
अन्तर्हितायां सावित्र्यां जगाम स्वपुरं नृपः ।
स्वराज्ये चावसद्वीरः प्रजा धर्मेण पालयन् ॥ १७ ॥
कस्मिंश्चित्तु गते काले स राजा नियतव्रतः ।
ज्येष्ठायां धर्मचारिण्यां महिष्यां गर्भमादधे ॥ १८ ॥
राजपुत्र्यास्तु गर्भः स मालव्यां भरतर्षभ ।
व्यवर्धत तदा शुक्ले तारापतिरिवाम्बरे ॥ १९ ॥
प्राप्ते काले तु सुषुवे कन्यां राजीवलोचनाम् ।
क्रियाश्च तस्या मुदितश्चक्रे स नृपसत्तमः ॥ २० ॥
सावित्र्या प्रीतया दत्ता सावित्र्या हुतया ह्यपि ।
सावित्रीत्येव नामास्याश्चक्रुर्विप्रास्तथा पिता ॥ २१ ॥
सा विग्रहवतीव श्रीर्व्यवर्धत नृपात्मजा ।
कालेन चापि सा कन्या यौवनस्था बभूव ह ॥ २२ ॥
तां सुमध्यां पृथुश्रोणीं प्रतिमां काञ्चनीमिव ।
प्राप्तेयं देवकन्येति दृष्ट्वा संमेनिरे जनाः ॥ २३ ॥
तां तु पद्मपलाशाक्षीं ज्वलन्तीमिव तेजसा ।
न कश्चिद्वरयामास तेजसा प्रतिवारितः ॥ २४ ॥
अथोपोष्य शिरःस्नाता देवतामभिगम्य सा ।
हुत्वाग्निं विधिवद्विप्रान्वाचयामास पर्वणि ॥ २५ ॥
ततः सुमनसः शेषाः प्रतिगृह्य महात्मनः ।
पितुः समीपमगमद्देवी श्रीरिव रूपिणी ॥ २६ ॥
साभिवाद्य पितुः पादौ शेषाः पूर्वं निवेद्य च ।
कृताञ्जलिर्वरारोहा नृपतेः पार्श्वमास्थिता ॥ २७ ॥
यौवनस्थां तु तां दृष्ट्वा स्वां सुतां देवरूपिणीम् ।
अयाच्यमानां च वरैर्नृपतिर्दुःखितो ऽभवत् ॥ २८ ॥

॥ राजोवाच ॥

पुत्रि प्रदानकालस्ते न च कश्चिद्वृणोति माम् ।
स्वयमन्विच्छ भर्तारं गुणैः सदृशमात्मनः ॥ २९ ॥

प्रार्थितः पुरुषो यश्च स निवेद्यस्त्वया मम ।
विमृश्याहं प्रदास्यामि वरय त्वं यथेप्सितम् ॥ ३० ॥
श्रुतं हि धर्मशास्त्रेषु पठ्यमानं द्विजातिभिः ।
तथा त्वमपि कल्याणि वदतो मे वचः शृणु ॥ ३१ ॥
अप्रदाता पिता वाच्यो वाच्यश्चानुपयन्पतिः ।
मृते भर्तरि पुत्रश्च वाच्यो मातुररक्षिता ॥ ३२ ॥
इदं मे वचनं श्रुत्वा भर्तुरन्वेषणे त्वर ।
देवतानां यथा वाच्यो न भवेयं तथा कुरु ॥ ३३ ॥

॥ मार्कण्डेय उवाच ॥

एवमुक्त्वा दुहितरं तथा वृद्धांश्च मन्त्रिणः ।
व्यादिदेशानुयात्रं च गम्यतां चेत्यचोदयत् ॥ ३४ ॥
साभिवाद्य पितुः पादौ व्रीडितेव तपस्विनी ।
पितुर्वचनमाज्ञाय निर्जगामाविचारितम् ॥ ३५ ॥
सा हैमं रथमास्थाय स्थविरैः सचिवैर्वृता ।
तपोवनानि रम्याणि राजर्षीणां जगाम ह ॥ ३६ ॥
मान्यानां तत्र वृद्धानां कृत्वा पादाभिवादनम् ।
वनानि क्रमशस्तानि सर्वाण्येवाभ्यगच्छत ॥ ३७ ॥
एवं तीर्थेषु सर्वेषु धनोत्सर्गं नृपात्मजा ।
कुर्वती द्विजमुख्यानां तं तं देशं जगाम ह ॥ ३८ ॥

। इति महाभारते सावित्र्युपाख्याने प्रथमः सर्गः । १ ।

॥ मार्कण्डेय उवाच ॥

अथ मद्राधिपो राजा नारदेन समागतः ।
उपविष्टः सभामध्ये कथायोगेन भारत ॥ १ ॥
ततो ऽभिगम्य तीर्थानि सर्वाण्येवाश्रमांस्तथा ।
आजगाम पितुर्वेश्म सावित्री सह मन्त्रिभिः ॥ २ ॥
नारदेन समासीनं दृष्ट्वा सा पितरं शुभा ।
उभयोरेव शिरसा चक्रे पादाभिवादनम् ॥ ३ ॥

॥ नारद उवाच ॥

क्व गताभूत्सुतेयं ते कुतश्चैवागता नृप ।
किमर्थं युवतीं भर्त्रे न चैनां संप्रयच्छसि ॥ ४ ॥

॥ अश्वपतिरुवाच ॥

कार्येण खल्वनेनैव प्रेषिताद्यैव चागता ।
एतस्याः शृणु देवर्षे भर्ता वै यो ऽनया वृतः ॥ ५ ॥

॥ मार्कण्डेय उवाच ॥
सा ब्रूहि विस्तरेणेति पित्रा संचोदिता शुभा ।
तदैव तस्य वचनं प्रतिगृह्येदमब्रवीत् ॥ ६ ॥
॥ सावित्र्युवाच ॥
आसीच्छाल्वेषु धर्मात्मा क्षत्रियः पृथिवीपतिः ।
द्युमत्सेन इति ख्यातः पश्चादन्धो बभूव ह ॥ ७ ॥
विनष्टचक्षुषस्तस्य बालपुत्रस्य धीमतः ।
सामीप्येन हृतं राज्यं छिद्रे ऽस्मिन्पूर्ववैरिणा ॥ ८ ॥
स बालवत्सया सार्धं भार्यया प्रस्थितो वनम् ।
महारण्यं गतश्चापि तपस्तेपे महाव्रतः ॥ ९ ॥
तस्य पुत्रः पुरे जातः संवृद्धश्च तपोवने ।
सत्यवाननुरूपो मे भर्तेति मनसा वृतः ॥ १० ॥
॥ नारद उवाच ॥
अहो बत महत्पापं सावित्र्या नृपते कृतं ।
अजानन्त्या यदनया गुणवान्सत्यवान्वृतः ॥ ११ ॥
सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते ।
ततो ऽस्य ब्राह्मणाश्चक्रुर्नामैतत्सत्यवानिति ॥ १२ ॥
बालस्याश्वाः प्रियाश्चास्य करोत्यश्वांश्च मृन्मयान् ।
चित्रे ऽपि विलिखत्यश्वांश्चित्राश्व इति चोच्यते ॥ १३ ॥
॥ राजोवाच ॥
अपीदानीं स तेजस्वी बुद्धिमान्वा नृपात्मजः ।
क्षमावानपि वा शूरः सत्यवान्पितृवत्सलः ॥ १४ ॥
॥ नारद उवाच ॥
विवस्वानिव तेजस्वी बृहस्पतिसमो मतौ ।
महेन्द्र इव वीरश्च वसुधेव क्षमान्वितः ॥ १५ ॥
॥ अश्वपतिरुवाच ॥
अपि राजात्मजो दाता ब्रह्मण्यश्चापि सत्यवान् ।
रूपवानप्युदारो वाप्यथ वा प्रियदर्शनः ॥ १६ ॥
॥ नारद उवाच ॥
सांकृते रन्तिदेवस्य स्वशक्त्या दानतः समः ।
ब्रह्मण्यः सत्यवादी च शिबिरौशीनरो यथा ॥ १७ ॥
ययातिरिव चोदारः सोमवत्प्रियदर्शनः ।
रूपेणाप्रतिमो ऽश्विभ्यां द्युमत्सेनसुतो बली ॥ १८ ॥
स दान्तः स मृदुः शूरः स सत्यः संयतेन्द्रियः ।
स मैत्रः सो ऽनसूयश्च धृतिमान्द्युतिमांश्च सः ॥ १९ ॥

नित्यशश्चार्जवं तस्मिन्स्थितिस्तस्यैव च ध्रुवा ।
संक्षेपतस्तपोवृद्धैः शीलवृद्धैश्च कथ्यते ॥ २० ॥

॥ अश्वपतिरुवाच ॥

गुणैरुपेतं सर्वैस्तं भगवन्प्रब्रवीषि मे ।
दोषानप्यस्य मे ब्रूहि यदि सन्तीह केचन ॥ २१ ॥

॥ नारद उवाच ॥

एक एवास्य दोषो हि गुणानाक्रम्य तिष्ठति ।
स च दोषः प्रयत्नेन न शक्यमतिवर्तितुम् ॥ २२ ॥
एको दोषोऽस्ति नान्योऽस्य सोऽद्यप्रभृति सत्यवान् ।
संवत्सरेण क्षीणायुर्देहन्यासं करिष्यति ॥ २३ ॥

॥ राजोवाच ॥

एहि सावित्रि गच्छ त्वमन्यं वरय शोभने ।
तस्य दोषो महानेको गुणानाक्रम्य च स्थितः ॥ २४ ॥
यथा मे भगवानाह नारदो देवसत्कृतः ।
संवत्सरेण सोऽल्पायुर्देहन्यासं करिष्यति ॥ २५ ॥

॥ सावित्र्युवाच ॥

सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत् ॥ २६ ॥
दीर्घायुरथ वाल्पायुः सगुणो निर्गुणोऽपि वा ।
सकृद्वृतो मया भर्ता न द्वितीयं वृणोम्यहम् ॥ २७ ॥
मनसा निश्चयं कृत्वा ततो वाचाभिधीयते ।
कर्मणा क्रियते पश्चात्प्रमाणं मे मनस्ततः ॥ २८ ॥

॥ नारद उवाच ॥

स्थिरा बुद्धिर्नरश्रेष्ठ सावित्र्या दुहितुस्तव ।
नैषा वारयितुं शक्या धर्मादस्मात्कथंचन ॥ २९ ॥
नान्यस्मिन्पुरुषे सन्ति ये सत्यवति वै गुणाः ।
प्रदानमेव तस्मान्मे रोचते दुहितुस्तव ॥ ३० ॥

॥ राजोवाच ॥

अविचाल्यमेतदुक्तं तथ्यं च भवता वचः ।
करिष्याम्येतदेवं वै गुरुर्हि भगवान्मम ॥ ३१ ॥

॥ नारद उवाच ॥

अविघ्नमस्तु सावित्र्याः प्रदानं दुहितुस्तव ।
साधयिष्याम्यहं तावत्सर्वेषां भद्रमस्तु वः ॥ ३२ ॥

॥ मार्कण्डेय उवाच ॥

सा ब्रूहि विस्तरेणेति पित्रा संचोदिता शुभा ।
तदैव तस्य वचनं प्रतिगृह्येदमब्रवीत् ॥ ६ ॥

॥ सावित्र्युवाच ॥

आसीच्छाल्वेषु धर्मात्मा क्षत्रियः पृथिवीपतिः ।
द्युमत्सेन इति ख्यातः पश्चादन्धो बभूव ह ॥ ७ ॥
विनष्टचक्षुषस्तस्य बालपुत्रस्य धीमतः ।
सामीप्येन हृतं राज्यं छिद्रे ऽस्मिन्पूर्ववैरिणा ॥ ८ ॥
स बालवत्सया सार्धं भार्यया प्रस्थितो वनम् ।
महारण्यं गतश्चापि तपस्तेपे महाव्रतः ॥ ९ ॥
तस्य पुनः पुरे जातः संवृद्धश्च तपोवने ।
सत्यवाननुरूपो मे भर्तेति मनसा वृतः ॥ १० ॥

॥ नारद उवाच ॥

अहो बत महत्पापं सावित्र्या नृपते कृतं ।
अजानन्त्या यदनया गुणवान्सत्यवान्वृतः ॥ ११ ॥
सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते ।
ततो ऽस्य ब्राह्मणाश्चक्रुर्नामैतत्सत्यवानिति ॥ १२ ॥
बालस्याश्वाः प्रियाश्चास्य करोत्यश्वांश्च मृन्मयान् ।
चित्रे ऽपि विलिखत्यश्वांश्चित्राश्व इति चोच्यते ॥ १३ ॥

॥ राजोवाच ॥

अपीदानीं स तेजस्वी बुद्धिमान्वा नृपात्मजः ।
क्षमावानपि वा शूरः सत्यवान्पितृवत्सलः ॥ १४ ॥

॥ नारद उवाच ॥

विवस्वानिव तेजस्वी बृहस्पतिसमो मतौ ।
महेन्द्र इव वीरश्च वसुधेव क्षमान्वितः ॥ १५ ॥

॥ अश्वपतिरुवाच ॥

अपि राजात्मजो दाता ब्रह्मण्यश्चापि सत्यवान् ।
रूपवानप्युदारो वाप्यथ वा प्रियदर्शनः ॥ १६ ॥

॥ नारद उवाच ॥

सांकृते रन्तिदेवस्य स्वशक्त्या दानतः समः ।
ब्रह्मण्यः सत्यवादी च शिबिरौशीनरो यथा ॥ १७ ॥
ययातिरिव चोदारः सोमवत्प्रियदर्शनः ।
रूपेणाप्रतिमो ऽश्विभ्यां द्युमत्सेनसुतो बली ॥ १८ ॥
स दान्तः स मृदुः शूरः स सत्यः संयतेन्द्रियः ।
स मैत्रः सो ऽनसूयश्च धृतिमान्द्युतिमांश्च सः ॥ १९ ॥

नित्यश्चार्जव तस्मिन्स्थितिस्तस्यैव च ध्रुवा ।
संक्षेपतस्तपोवृद्धैः शीलवृद्धैश्च कथ्यते ॥ २० ॥

॥ अश्वपतिरुवाच ॥

गुणैरुपेत सर्वैस्तं भगवन्प्रब्रवीषि मे ।
दोषानप्यस्य मे ब्रूहि यदि सन्तीह केचन ॥ २१ ॥

॥ नारद उवाच ॥

एक एवास्य दोषो हि गुणानाक्रम्य तिष्ठति ।
स च दोषः प्रयत्नेन न शक्यमतिवर्तितुम् ॥ २२ ॥
एको दोषोऽस्ति नान्योऽस्य सोऽद्यप्रभृति सत्यवान् ।
संवत्सरेण क्षीणायुर्देहन्यासं करिष्यति ॥ २३ ॥

॥ राजोवाच ॥

एहि सावित्रि गच्छ त्वमन्यं वरय शोभने ।
तस्य दोषो महानेको गुणानाक्रम्य च स्थितः ॥ २४ ॥
यथा मे भगवानाह नारदो देवसत्कृतः ।
संवत्सरेण सोऽल्पायुर्देहन्यासं करिष्यति ॥ २५ ॥

॥ सावित्र्युवाच ॥

सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत् ॥ २६ ॥
दीर्घायुरथ वाल्पायुः सगुणो निर्गुणोऽपि वा ।
सकृद्वृतो मया भर्ता न द्वितीयं वृणोम्यहं ॥ २७ ॥
मनसा निश्चयं कृत्वा ततो वाचाभिधीयते ।
कर्मणा क्रियते पश्चात्प्रमाणं मे मनस्ततः ॥ २८ ॥

॥ नारद उवाच ॥

स्थिरा बुद्धिर्नरश्रेष्ठ सावित्र्या दुहितुस्तव ।
नैषा चालयितुं शक्या धर्मादस्मात्कथंचन ॥ २९ ॥
नान्यस्मिन्पुरुषे सन्ति ये सत्यवति वै गुणाः ।
प्रदानमेव तस्मान्मे रोचते दुहितुस्तव ॥ ३० ॥

॥ राजोवाच ॥

अविचाल्यमेतदुक्तं तथ्यं च भवता वचः ।
करिष्याम्येतदेवं वै गुरुर्हि भगवान्मम ॥ ३१ ॥

॥ नारद उवाच ॥

अविघ्नमस्तु सावित्र्याः प्रदानं दुहितुस्तव ।
साधयिष्याम्यहं तावत्सर्वेषां भद्रमस्तु वः ॥ ३२ ॥

॥ मार्कण्डेय उवाच ॥

एवमुक्त्वा समुत्पत्य नारदस्त्रिदिवं गतः ।
राजापि दुहितुः सज्जं वैवाहिकमकारयत् ॥ ३३ ॥

। इति महाभारते सावित्र्युपाख्याने द्वितीयः सर्गः । २ ।

॥ मार्कण्डेय उवाच ॥

अथ कन्याप्रदानाय वैवाहिकमचिन्तयत् ।
समानिन्ये च तत्सर्वं भाण्डं वैवाहिकं नृपः ॥ १ ॥
ततो वृद्धान्द्विजान्सर्वानृत्विजः सपुरोहितान् ।
समाहूय दिने पुण्ये प्रययौ सह कन्यया ॥ २ ॥
मेध्यारण्यं स गत्वा च द्युमत्सेनाश्रमं नृपः ।
पद्भ्यामेव द्विजैः सार्धं राजर्षिं तमुपागमत् ॥ ३ ॥
तत्रापश्यन्महाभागं शालवृक्षमुपाश्रितम् ।
कौश्यां बृस्यां समासीनं चक्षुर्हीनं नृपं तदा ॥ ४ ॥
स राजा तस्य राजर्षेः कृत्वा पूजां यथार्हतः ।
वाचा सुनियतो भूत्वा चकारात्मनिवेदनं ॥ ५ ॥
तस्यार्घ्यमासनं चैव गां चावेद्य स धर्मवित् ।
किमागमनमित्येवं राजा राजानमब्रवीत् ॥ ६ ॥
तस्य सर्वमभिप्रायमितिकर्तव्यतां च ताम् ।
सत्यवन्तं समुद्दिश्य सर्वमेव न्यवेदयत् ॥ ७ ॥

॥ अश्वपतिरुवाच ॥

सावित्री नाम राजर्षे कन्येयं मम शोभना ।
तां स्वधर्मेण धर्मज्ञ स्नुषार्थे त्वं गृहाण मे ॥ ८ ॥

॥ द्युमत्सेन उवाच ॥

च्युताः स्म राज्याद्वनवासमाश्रितश्चराम धर्मं नियतास्तपस्विनः ।
कथं त्वनर्हा वनवासमाश्रमे निवत्स्यते क्लेशमिमं सुता तव ॥ ९ ॥

॥ अश्वपतिरुवाच ॥

सुखं च दुःखं च भवाभवात्मकं यदा विजानाति सुताहमेव च ।
न मद्विधे युज्यति वाक्यमीदृशं विनिश्चयेनाभिगतो ऽस्मि ते नृप ॥ १० ॥
आशां नार्हसि मे हन्तुं सौहृदात्प्रणतस्य च ।
अभितश्चागतं प्रेम्णा प्रत्याख्यातुं न मार्हसि ॥ ११ ॥
अनुरूपो हि युक्तश्च त्वं ममाहं तवापि च ।
स्नुषां प्रतीच्छ मे कन्यां भार्यां सत्यवतः सतः ॥ १२ ॥

॥ द्युमत्सेन उवाच ॥

पूर्वमेवाभिलषितः संबन्धो मे त्वया सह ।
भ्रष्टराज्यस्त्वहमिति तत एतद्विचारितम् ॥ १३ ॥
अभिप्रायस्त्वयं यो मे पूर्वमेवाभिकाङ्क्षितः ।
स निर्वर्ततु मे ऽद्यैव काङ्क्षितो ह्यसि मे ऽतिथिः ॥ १४ ॥

॥ मार्कण्डेय उवाच ॥

ततः सर्वान्समानाय्य द्विजानाश्रमवासिनः ।
यथाविधि समुद्वाहं कारयामासतुर्नृपौ ॥ १५ ॥
दत्त्वा सो ऽश्वपतिः कन्यां यथार्हं च परिच्छदम् ।
ययौ स्वमेव भवनं युक्तः परमया मुदा ॥ १६ ॥
सत्यवानपि तां भार्यां लब्ध्वा सर्वगुणान्विताम् ।
मुमुदे सा च तं लब्ध्वा भर्तारं मनसेप्सितम् ॥ १७ ॥
गते पितरि सर्वाणि संन्यस्याभरणानि सा ।
जगृहे वल्कलान्येव वस्त्रं काषायमेव च ॥ १८ ॥
परिचारैर्गुणैश्चैव प्रश्रयेण दमेन च ।
सर्वकामक्रियाभिश्च सर्वेषां तुष्टिमादधे ॥ १९ ॥
श्वश्रूं शरीरसत्कारैः सर्वैराच्छादनादिभिः ।
श्वशुरं देवसत्कारैर्वाचः संयमनेन च ॥ २० ॥
तथैव प्रियवादेन नैपुणेन शमेन च ।
रहश्चैवोपचारेण भर्तारं पर्यतोषयत् ॥ २१ ॥
एवं तत्राश्रमे तेषां तदा निवसतां सताम् ।
कालस्तपस्यतां कश्चिदपाक्रामत भारत ॥ २२ ॥
सावित्र्या ग्लायमानायास्तिष्ठन्त्याश्च दिवानिशम् ।
नारदेन यदुक्तं तद्वाक्यं मनसि वर्तते ॥ २३ ॥

। इति महाभारते सावित्र्युपाख्याने तृतीयः सर्गः । ३ ।

॥ मार्कण्डेय उवाच ॥

ततः काले बहुतिथे व्यतिक्रान्ते कदाचन ।
प्राप्तः स कालो मर्तव्यं यत्र सत्यवता नृप ॥ १ ॥
गणयन्त्याश्च सावित्र्या दिवसे दिवसे गते ।
यद्वाक्यं नारदेनोक्तं वर्तते हृदि नित्यशः ॥ २ ॥
चतुर्थे ऽहनि मर्तव्यमिति संचिन्त्य भामिनी ।
व्रतं त्रिरात्रमुद्दिश्य दिवारात्रं स्थिताभवत् ॥ ३ ॥
तं श्रुत्वा नियमं तस्या भृशं दुःखान्वितो नृपः ।
उत्थाय वाक्यं सावित्रीमब्रवीत्परिसान्त्वयन् ॥ ४ ॥

॥ द्युमत्सेन उवाच ॥

अतितीव्रो ऽयमारम्भस्त्वयारब्धो नृपात्मजे ।
तिसृणां वसतीनां हि स्थानं परमदुश्चरम् ॥ ५ ॥

॥ सावित्र्युवाच ॥

न कार्यस्तात संतापः पारयिष्याम्यहं व्रतम् ।
व्यवसायकृतं हीदं व्यवसायश्च कारणम् ॥ ६ ॥

॥ द्युमत्सेन उवाच ॥

व्रतं भिन्धीति वक्तुं त्वां नास्मि शक्तः कथंचन ।
पारयस्वेति वचनं युक्तमस्मद्विधो वदेत् ॥ ७ ॥

॥ मार्कण्डेय उवाच ॥

एवमुक्त्वा द्युमत्सेनो विरराम महामनाः ।
तिष्ठन्ती चैव सावित्री काष्ठभूतेव लक्ष्यते ॥ ८ ॥
श्वो भूते भर्तृमरणे सावित्र्या भरतर्षभ ।
दुःखान्वितायास्तिष्ठन्त्याः सा रात्रिर्व्यत्यवर्तत ॥ ९ ॥
अद्य तद्दिवसं चेति हुत्वा दीप्तं हुताशनम् ।
युगमात्रोदिते सूर्ये कृत्वा पौर्वाह्णिकीः क्रियाः ॥ १० ॥
ततः सर्वान्द्विजान्वृद्धाञ्श्वश्रूं श्वशुरमेव च ।
अभिवाद्यानुपूर्वेण प्राञ्जलिर्नियता स्थिता ॥ ११ ॥
अवैधव्याशिषस्ते तु सावित्र्यर्थं हिताः शुभाः ।
ऊचुस्तपस्विनः सर्वे तपोवननिवासिनः ॥ १२ ॥
एवमस्त्विति सावित्री ध्यानयोगपरायणा ।
मनसा ता गिरः सर्वाः प्रत्यगृह्णात्तपस्विनाम् ॥ १३ ॥
तं कालं तं मुहूर्तं च प्रतीक्षन्ती नृपात्मजा ।
यथोक्तं नारदवचश्चिन्तयन्ती सुदुःखिता ॥ १४ ॥
ततस्तु श्वश्रूश्वशुरावूचतुस्तां नृपात्मजाम् ।
एकान्तस्थामिदं वाक्यं प्रीत्या भरतसत्तम ॥ १५ ॥
व्रतं यथोपदिष्टं वै तथा तत्पारितं त्वया ।
आहारकालः संप्राप्तः क्रियतां यदनन्तरम् ॥ १६ ॥

॥ सावित्र्युवाच ॥

अस्तं गते मयादित्ये भोक्तव्यं कृतकामया ।
एष मे हृदि संकल्पः समयश्च कृतो मया ॥ १७ ॥

॥ मार्कण्डेय उवाच ॥

एवं संभाषमाणायां सावित्र्यां भोजनं प्रति ।
स्कन्धे परशुमादाय सत्यवान्प्रस्थितो वनम् ॥ १८ ॥

सावित्री त्वाह भर्तारं नैकस्त्वं गन्तुमर्हसि ।
सह त्वया गमिष्यामि न हि त्वां हातुमुत्सहे ॥ १९ ॥

॥ सत्यवानुवाच ॥

वनं न गतपूर्वं ते दुःखः पन्था भविष्यति ।
व्रतोपवासक्षामा च कथं पद्भ्यां गमिष्यसि ॥ २० ॥

॥ सावित्र्युवाच ॥

उपवासान्न मे ग्लानिर्नास्ति चापि परिश्रमः ।
गमने च कृतोत्साहां प्रतिषेद्धुं न मार्हसि ॥ २१ ॥

॥ सत्यवानुवाच ॥

यदि ते गमनोत्साहः करिष्यामि तव प्रियम् ।
मम त्वामन्त्रय गुरून्न मां दोषः स्पृशेदयम् ॥ २२ ॥

॥ मार्कण्डेय उवाच ॥

साभिवाद्याब्रवीच्छ्वश्रूं श्वशुरं च महाव्रता ।
अयं गच्छति भर्ता मे फलाहारो महावनम् ॥ २३ ॥
इच्छेयमभ्यनुज्ञाता आर्यया श्वशुरेण ह ।
अनेन सह निर्गन्तुं न मे ऽद्य विरहः क्षमः ॥ २४ ॥
गुर्वग्निहोत्रार्थकृते प्रस्थितश्च सुतस्तव ।
न निवार्यो निवार्यः स्यादन्यथा प्रस्थितो वनम् ॥ २५ ॥
संवत्सरः किंचिदूनो न निष्क्रान्ताहमाश्रमात् ।
वनं कुसुमितं द्रष्टुं परं कौतूहलं हि मे ॥ २६ ॥

॥ द्युमत्सेन उवाच ॥

यतः प्रभृति सावित्री पित्रा दत्ता स्नुषा मम ।
नानयाभ्यर्थनायुक्तमुक्तपूर्वं स्मराम्यहम् ॥ २७ ॥
तदेषा लभतां कामं यथाभिलषितं वधूः ।
अप्रमादश्च कर्तव्यः पुत्रि सत्यवतः पथि ॥ २८ ॥

॥ मार्कण्डेय उवाच ॥

उभाभ्यामभ्यनुज्ञाता सा जगाम यशस्विनी
सह भर्त्रा हसन्तीव हृदयेन विदूयता ॥ २९ ॥
सा वनानि विचित्राणि रमणीयानि सर्वशः ।
मयूरगणजुष्टानि ददर्श विपुलेक्षणा ॥ ३० ॥
नदीः पुण्यवहाश्चैव पुष्पितांश्च नगोत्तमान् ।
सत्यवानाह पश्येति सावित्रीं मधुरं वचः ॥ ३१ ॥
निरीक्षमाणा भर्तारं सर्वावस्थमनिन्दिता ।
मृतमेव हि तं मेने काले मुनिवचः स्मरन् ॥ ३२ ॥

अनुव्रजन्ती भर्तारं जगाम मृदुगामिनी ।
द्विधेव हृदयं कृत्वा तं च कालमवेक्षती ॥ ३३ ॥

। इति महाभारते सावित्र्युपाख्याने चतुर्थः सर्गः । ४ ।

॥ मार्कण्डेय उवाच ॥

अथ भार्यासहायः स फलान्यादाय वीर्यवान् ।
कठिनं पूरयामास ततः काष्ठान्यपाटयत् ॥ १ ॥
तस्य पाटयतः काष्ठं स्वेदो वै समजायत ।
व्यायामेन च तेनास्य जज्ञे शिरसि वेदना ।
सो ऽभिगम्य प्रियां भार्यामुवाच श्रमपीडितः ॥ २ ॥

॥ सत्यवानुवाच ॥

व्यायामेन ममानेन जाता शिरसि वेदना ।
अङ्गानि चैव सावित्रि हृदयं दूयतीव च ॥ ३ ॥
अस्वस्थमिव चात्मानं लक्षये मितभाषिणि ।
शूलैरिव शिरो विद्धमिदं संलक्षयाम्यहम् ।
तत्स्वप्तुमिच्छे कल्याणि न स्थातुं शक्तिरस्ति मे ॥ ४ ॥
सा समासाद्य सावित्री भर्तारमुपगम्य च ।
उत्सङ्गे ऽस्य शिरः कृत्वा निषसाद महीतले ॥ ५ ॥
ततः सा नारदवचो विमृशन्ती तपस्विनी ।
तं मुहूर्तं क्षणं वेलां दिवसं च युयोज ह ॥ ६ ॥
मुहूर्तादेव चापश्यत्पुरुषं रक्तवाससम् ।
बद्धमौलिं वपुष्मन्तमादित्यसमतेजसम् ॥ ७ ॥
श्यामावदातं रक्ताक्षं पाशहस्तं भयावहम् ।
स्थितं सत्यवतः पार्श्वे निरीक्षन्तं तमेव च ॥ ८ ॥
तं दृष्ट्वा सहसोत्थाय भर्तुर्न्यस्य शनैः शिरः ।
कृताञ्जलिरुवाचार्ता हृदयेन प्रवेपती ॥ ९ ॥
दैवतं त्वाभिजानामि वपुरेतद्ध्यमानुषम् ।
कामया ब्रूहि देवेश कस्त्वं किं च चिकीर्षसि ॥ १० ॥

॥ यम उवाच ॥

पतिव्रतासि सावित्रि तथैव च तपोऽन्विता ।
अतस्त्वामभिभाषामि विद्धि मां त्वं शुभे यमम् ॥ ११ ॥
अयं ते सत्यवान्भर्ता क्षीणायुः पार्थिवात्मजः ।
नेष्याम्येनमहं बद्ध्वा विद्ध्येतन्मे चिकीर्षितम् ॥ १२ ॥

॥ सावित्र्युवाच ॥
श्रूयते भगवन्दूतास्तवागच्छन्ति मानवान् ।
नेतुं किल भवान्कस्मादागतो ऽसि स्वयं प्रभो ॥ १३ ॥
॥ मार्कण्डेय उवाच ॥
इत्युक्तः पितृराजस्तां भगवान्स्वचिकीर्षितम् ।
यथावत्सर्वमाख्यातुं तत्प्रियार्थं प्रचक्रमे ॥ १४ ॥
अयं हि धर्मसंयुक्तो रूपवान्गुणसागरः ।
नार्हो मत्पुरुषैर्नेतुमतो ऽस्मि स्वयमागतः ॥ १५ ॥
ततः सत्यवतः कायात्पाशबद्धं वशं गतं ।
अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात् ॥ १६ ॥
ततः समुद्धृतप्राणं गतश्वासं हतप्रभम् ।
निर्विचेष्टं शरीरं तद्बभूवाप्रियदर्शनम् ।
यमस्तु तं तथा बद्ध्वा प्रयातो दक्षिणामुखः ॥ १७ ॥
सावित्री चैव दुःखार्ता यममेवान्वगच्छत ।
नियमव्रतसंसिद्धा महाभागा पतिव्रता ॥ १८ ॥
॥ यम उवाच ॥
निवर्त गच्छ सावित्रि कुरुष्वास्यौर्ध्वदेहिकम् ।
कृतं भर्तुस्त्वयानृण्यं यावद्गम्यं गतं त्वया ॥ १९ ॥
॥ सावित्र्युवाच ॥
यत्र मे नीयते भर्ता स्वयं वा यत्र गच्छति ।
मयापि तत्र गन्तव्यमेष धर्मः सनातनः ॥ २० ॥
तपसा गुरुभक्त्या च भर्तुस्नेहाद्व्रतेन च ।
तव चैव प्रसादेन न मे प्रतिहता गतिः ॥ २१ ॥
प्राहुः साप्तपदं मैत्रं बुधास्तत्त्वार्थदर्शिनः ।
मित्रतां च पुरस्कृत्य किंचिद्वक्ष्यामि तच्छृणु ॥ २२ ॥
नानात्मवन्तो हि वने चरन्ति धर्मं च वासं च परिश्रमं च ।
विज्ञानतो धर्ममुदाहरन्ति तस्मात्सन्तो धर्ममाहुः प्रधानम् ॥ २३ ॥
एकस्य धर्मेण सतां मतेन सर्वे स्म तं मार्गमनुप्रपन्नाः ।
मा वै द्वितीयं तृतीयं च वाञ्छेत्तस्मात्सन्तो धर्ममाहुः प्रधानम् ॥ २४ ॥
॥ यम उवाच ॥
निवर्त तुष्टो ऽस्मि तवानया गिरा स्वराक्षरव्यञ्जनहेतुयुक्तया ।
वरं वृणीष्वेह विनास्य जीवितं ददानि ते सर्वमनिन्दिते वरम् ॥ २५ ॥

॥ सावित्र्युवाच ॥

च्युतः स्वराज्याद्वनवासमाश्रितो विनष्टचक्षुः श्वशुरो ममाश्रमे ।
स लब्धचक्षुर्बलवान्भवेन्नृपस्तव प्रसादाज्ज्वलनार्कसंनिभः ॥ २६ ॥

॥ यम उवाच ॥

ददामि ते ऽहं तमनिन्दिते वरं यथा त्वयोक्तं भविता च तत्तथा ।
तवाध्वना ग्लानिमिवोपलक्षये निवर्त गच्छस्व न ते श्रमो भवेत् ॥ २७ ॥

॥ सावित्र्युवाच ॥

कुतः श्रमो भर्तृसमीपतो हि मे यतो हि भर्ता मम सा गतिर्ध्रुवा ।
यतः पतिं नेष्यसि तत्र मे गतिः सुरेश भूयश्च वचो निबोध मे ॥ २८ ॥
सतां सकृत्संगतमीप्सितं परं ततः परं मित्रमिति प्रचक्षते ।
न चाफलं सत्पुरुषेण संगतं ततः सतां संनिवसेत्समागमे ॥ २९ ॥

॥ यम उवाच ॥

मनोऽनुकूलं बुधबुद्धिवर्धनं त्वया यदुक्तं वचनं हिताश्रयम् ।
विना पुनः सत्यवतो ऽस्य जीवितं वरं द्वितीयं वरयस्व भाविनि ॥ ३० ॥

॥ सावित्र्युवाच ॥

हृतं पुरा मे श्वशुरस्य धीमतः स्वमेव राज्यं लभतां स पार्थिवः ।
व च स्वधर्मं प्रजह्यातु मे गुरुर्द्वितीयमेतद्वरयामि ते वरम् ॥ ३१ ॥

॥ यम उवाच ॥

स्वमेव राज्यं प्रतिपत्स्यते ऽचिरान्न च स्वधर्मात्परिहास्यते नृपः ।
कृतेन कामेन मया नृपात्मजे निवर्त गच्छस्व व ते श्रमो भवेत् ॥ ३२ ॥

॥ सावित्र्युवाच ॥

प्रजास्त्वयैता नियमेन संयता नियम्य चैता नयसे स्वकाम्यया ।
ततो यमत्वं तव देव विश्रुतं निबोध चेमां गिरमीरितां मया ॥ ३३ ॥
अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च सतां धर्मः सनातनः ॥ ३४ ॥
एवंप्रायश्च लोको ऽयं मनुष्याः शक्तिपेशलाः ।
सन्तस्त्वेवाप्यमित्रेषु दयां प्राप्तेषु कुर्वते ॥ ३५ ॥

॥ यम उवाच ॥

पिपासितस्येव भवेद्यथा पयस्तथा त्वया वाक्यमिदं समीरितम् ।
विबा पुनः सत्यवतो ऽस्य जीवितं वरं वृणीष्वेह शुभे यदिच्छसि ॥ ३६ ॥

॥ सावित्र्युवाच ॥

ममानपत्यः पृथिवीपतिः पिता भवेत्पितुः पुत्रशतं तथौरसम् ।
कुलस्य संतानकरं च यद्भवेत्तृतीयमेतद्वरयामि ते वरम् ॥ ३७ ॥

॥ यम उवाच ॥

कुलस्य संतानकरं सुवर्चसं शतं सुतानां पितुरस्तु ते शुभे ।
कृतेन कामेन नराधिपात्मजे निवर्त दूरं हि पथस्त्वमागता ॥ ३८ ॥

॥ सावित्र्युवाच ॥

न दूरमेतन्मम भर्तृसंनिधौ मनो हि मे दूरतरं प्रधावति ।
अथ व्रजन्नेव गिरं समुद्यतां मयोच्यमानां शृणु भूय एव ह ॥ ३९ ॥
विवस्वतस्त्वं तनयः प्रतापवांस्ततो हि वैवस्वत उच्यसे बुधैः ।
समेन धर्मेण चरन्ति ताः प्रजास्ततस्तवेहेश्वर धर्मराजता ॥ ४० ॥

आत्मन्यपि न विश्वासस्तावान्भवति सत्सु यः ।
तस्मात्सत्सु विशेषेण सर्वः प्रणयमिच्छति ॥ ४१ ॥
सौहृदात्सर्वभूतानां विश्वासो नाम जायते ।
तस्मात्सत्सु विशेषेण विश्वासं कुरुते जनः ॥ ४२ ॥

॥ यम उवाच ॥

उदाहृतं ते वचनं यदङ्गने शुभे न तादृक्त्वदृते मया श्रुतम् ।
अनेन तुष्टो ऽस्मि विनास्य जीवितं वरं चतुर्थं वरयस्व गच्छ च ॥ ४३ ॥

॥ सावित्र्युवाच ॥

ममात्मजं सत्यवतस्तथौरसं भवेदुभाभ्यामिह यत्कुलोद्वहम् ।
शतं सुतानां बलवीर्यशालिनामिदं चतुर्थं वरयामि ते वरम् ॥ ४४ ॥

॥ यम उवाच ॥

शतं सुतानां बलवीर्यशालिनां भविष्यति प्रीतिकरं तवाबले ।
परिश्रमस्ते न भवेन्नृपात्मजे निवर्त दूरं हि पथस्त्वमागता ॥ ४५ ॥

॥ सावित्र्युवाच ॥

सतां सदा शाश्वती धर्मवृत्तिः सन्तो न सीदन्ति न च व्यथन्ते ।
सतां सद्भिर्नाफलः संगमो ऽस्ति सद्भ्यो भयं नानुवर्तन्ति सन्तः ॥ ४६ ॥
सन्तो हि सत्येन नयन्ति सूर्यं सन्तो भूमिं तपसा धारयन्ति ।
सन्तो गतिर्भूतभव्यस्य राजन्सतां मध्ये नावसीदन्ति सन्तः ॥ ४७ ॥

आर्यजुष्टमिदं वृत्तमिति विज्ञाय शाश्वतम् ।
सन्तः परार्थं कुर्वाणा नावेक्षन्ति प्रतिक्रियाम् ॥ ४८ ॥

न च प्रसादः पुरुषेषु मोघो न चाप्यर्थो नश्यति नापि मानः ।
यस्मादेतन्नियतं सत्सु नित्यं तस्मात्सन्तो रक्षितारो भवन्ति ॥ ४९ ॥

॥ यम उवाच ॥

यथा यथा भाषसि धर्मसंहितं मनोऽनुकूलं सुपदं महार्थवत् ।
तथा तथा मे त्वयि भक्तिरुत्तमा वरं वृणीष्वाप्रतिमं पतिव्रते ॥ ५० ॥

॥ सावित्र्युवाच ॥

न ते ऽपवर्गः सुकृताद्विनाकृतस्तथा यथान्येषु वरेषु मानद ।
वरं वृणे जीवतु सत्यवानयं यथा मृता ह्येवमहं विना पतिम् ॥ ५१ ॥
न कामये भर्तृविनाकृता सुखं न कामये भर्तृविनाकृता दिवम् ।
न कामये भर्तृविनाकृता श्रियं न भर्तृहीना व्यवसामि जीवितुम् ॥ ५२ ॥
वरातिसर्गः शतपुत्रता मम त्वयैव दत्तो ह्रियते च मे पतिः ।
वरं वृणे जीवतु सत्यवानयं तवैव सत्यं वचनं भविष्यति ॥ ५३ ॥

॥ मार्कण्डेय उवाच ॥

तथेत्युक्त्वा तु तं पाशं मुक्त्वा वैवस्वतो यमः ।
धर्मराजः प्रहृष्टात्मा सावित्रीमिदमब्रवीत् ॥ ५४ ॥
एष भद्रे मया मुक्तो भर्ता ते कुलनन्दिनि ।
अरोगस्तव नेयश्च सिद्धार्थः स भविष्यति ॥ ५५ ॥
चतुर्वर्षशतायुश्च त्वया सार्धमवाप्स्यति ।
इष्ट्वा यज्ञैश्च धर्मेण ख्यातिं लोके गमिष्यति ॥ ५६ ॥
त्वयि पुत्रशतं चैव सत्यवाञ्जनयिष्यति ।
ते चापि सर्वे राजानः क्षत्रियाः पुत्रपौत्रिणः ॥ ५७ ॥
ख्यातास्त्वन्नामधेयाश्च भविष्यन्तीह शाश्वताः ।
पितुश्च ते पुत्रशतं भविता तव मातरि ॥ ५८ ॥
मालव्यां मालवा नाम शाश्वताः पुत्रपौत्रिणः ।
भ्रातरस्ते भविष्यन्ति क्षत्रियास्त्रिदशोपमाः ॥ ५९ ॥
एवं तस्यै वरं दत्त्वा धर्मराजः प्रतापवान् ।
निवर्तयित्वा सावित्रीं स्वमेव भवनं ययौ ॥ ६० ॥
सावित्र्यपि यमे याते भर्तारं प्रतिलभ्य च ।
जगाम तत्र यत्रास्य भर्तुः शावं कलेवरम् ॥ ६१ ॥
सा भूमौ प्रेक्ष्य भर्तारमभिसृत्योपगृह्य च ।
उत्सङ्गे शिर आरोप्य भूमावुपविवेश ह ॥ ६२ ॥
संज्ञां च स पुनर्लब्ध्वा सावित्रीमभ्यभाषत ।
प्रोष्यागत इव प्रेम्णा पुनः पुनरुदीक्ष्य वै ॥ ६३ ॥

॥ सत्यवानुवाच ॥

सुचिरं बत सुप्तो ऽस्मि किमर्थं नावबोधितः ।
क्व चासौ पुरुषः श्यामो यो ऽसौ मां संचकर्ष ह ॥ ६४ ॥

॥ सावित्र्युवाच ॥

सुचिरं त्वं प्रसुप्तो ऽसि ममाङ्के पुरुषर्षभ ।
गतः स भगवान्देवः प्रजासंयमनो यमः ॥ ६५ ॥
विश्रान्तो ऽसि महाभाग विनिद्रश्च नृपात्मज ।
यदि शक्यं समुत्तिष्ठ विगाढां पश्य शर्वरीम् ॥ ६६ ॥

॥ मार्कण्डेय उवाच ॥

उपलभ्य ततः संज्ञां सुखसुप्त इवोत्थितः ।
दिशः सर्वा वनान्तांश्च निरीक्ष्योवाच सत्यवान् ॥ ६७ ॥
फलाहारो ऽस्मि निष्क्रान्तस्त्वया सह सुमध्यमे ।
ततः पाटयतः काष्ठं शिरसो मे रुजाभवत् ॥ ६८ ॥
शिरोऽभितापसंतप्तः स्थातुं चिरमशक्नुवन् ।
तवोत्सङ्गे प्रसुप्तो ऽहमिति सर्वं स्मरे शुभे ॥ ६९ ॥
त्वयोपगूढस्य च मे निद्रयापहृतं मनः ।
ततो ऽपश्यं तमो घोरं पुरुषं च महौजसम् ॥ ७० ॥
तद्यदि त्वं विजानासि किं तद्ब्रूहि सुमध्यमे ।
स्वप्नो मे यदि वा दृष्टो यदि वा सत्यमेव तत् ॥ ७१ ॥
तमुवाचाथ सावित्री रजनी व्यवगाहते ।
श्वस्ते सर्वं यथावृत्तमाख्यास्यामि नृपात्मज ॥ ७२ ॥
उत्तिष्ठोत्तिष्ठ भद्रं ते पितरौ पश्य सुव्रत ।
विगाढा रजनी चेयं निवृत्तश्च दिवाकरः ॥ ७३ ॥
नक्तंचराश्चरन्त्येते हृष्टाः क्रूराभिभाषिणः ।
श्रूयते पर्णशब्दश्च मृगाणां चरतां वने ॥ ७४ ॥
एता घोराञ्शिवा नादान्दिशं दक्षिणपश्चिमाम् ।
आस्थाय विरुवन्त्युग्राः कम्पयन्त्यो मनो मम ॥ ७५ ॥

॥ सत्यवानुवाच ॥

वनं प्रतिभयाकारं घोरेण तमसा वृतम् ।
न विज्ञास्यसि पन्थानं गन्तुं चैव न शक्ष्यसि ॥ ७६ ॥

॥ सावित्र्युवाच ॥

अस्मिन्नद्य वने दग्धे शुष्कवृक्षः स्थितो ज्वलन् ।
वायुना धम्यमानो ऽत्र दृश्यते ऽग्निः क्वचित्क्वचित् ॥ ७७ ॥
ततो ऽग्निमानयित्वेह ज्वालयिष्यामि सर्वतः ।
काष्ठानीमानि सन्तीह जहि संतापमात्मनः ॥ ७८ ॥
यदि नोत्सहसे गन्तुं सरुजं त्वां हि लक्षये ।
न च ज्ञास्यसि पन्थानं तमसा संवृते वने ॥ ७९ ॥

श्वः प्रभाते वने दृश्ये यास्यावो ऽनुमते तव ।
वसावेह क्षपामेतां रुचितं यदि ते ऽनघ ॥ ८० ॥

॥ सत्यवानुवाच ॥

शिरोरुजा निवृत्ता मे स्वस्थान्यङ्गानि लक्षये ।
मातापितृभ्यामिच्छामि संगमं त्वत्प्रसादनात् ॥ ८१ ॥
न कदाचिद्विकाले हि गतपूर्वो मयाश्रमः ।
अनागतायां संध्यायां माता मे प्ररुणद्धि माम् ॥ ८२ ॥
दिवापि मयि निष्क्रान्ते संतप्येते गुरू मम ।
विचिनोति हि मां तातः सहैवाश्रमवासिभिः ॥ ८३ ॥
मात्रा पित्रा च सुभृशं दुःखिताभ्यामहं पुरा ।
उपालब्धः सुबहुशश्चिरेणागच्छसीति ह ॥ ८४ ॥
का त्ववस्था तयोरद्य मदर्थमिति चिन्तये ।
अदृश्ये मयि ताभ्यां हि महद्दुःखं भविष्यति ॥ ८५ ॥
पुरा मामूचतुश्चैव रात्रावस्रायमाणकौ ।
भृशं सुदुःखितौ वृद्धौ बहुशः प्रीतिसंयतौ ॥ ८६ ॥
त्वया हीनौ न जीवेव मुहूर्तमपि पुत्रक ।
यावद्धरिष्यसे पुत्र तावन्नौ जीवितं ध्रुवम् ॥ ८७ ॥
वृद्धयोरन्धयोर्दृष्टिस्त्वयि वंशः प्रतिष्ठितः ।
त्वयि पिण्डश्च कीर्तिश्च संतानं चावयोरिति ॥ ८८ ॥
माता वृद्धा पिता वृद्धस्तयोर्यष्टिरहं किल ।
तौ रात्रौ मामपश्यन्तौ कामवस्थां गमिष्यतः ॥ ८९ ॥
निद्रां चैवाभ्यसूयामि यस्या हेतोः पिता मम ।
माता च संशयं प्राप्ता मत्कृते ऽनपकारिणी ॥ ९० ॥
अहं च संशयं प्राप्तः कृच्छ्रामापदमास्थितः ।
मातापितृभ्यां हि विना नाहं जीवितुमुत्सहे ॥ ९१ ॥
व्यक्तमाकुलया बुद्ध्या प्रज्ञाचक्षुः पिता मम ।
एकैकमस्यां वेलायां पृच्छत्याश्रमवासिनम् ॥ ९२ ॥
नात्मानमनुशोचामि यथाहं पितरं शुभे ।
भर्तारं चाप्यनुगतां मातरं परिदुर्बलाम् ॥ ९३ ॥
मत्कृतेन हि तावद्य संतापं परमेष्यतः ।
जीवन्तावनुजीवामि भर्तव्यौ तौ मयेति च ।
तयोः प्रियं मे कर्तव्यमिति जानामि चाप्यहम् ॥ ९४ ॥

॥ मार्कण्डेय उवाच ॥

एवमुक्त्वा स धर्मात्मा गुरुभक्तो गुरुप्रियः ।
उच्छ्रित्य बाहू दुःखार्तः सुस्वरं प्ररुरोद ह ॥ ९५ ॥

ततो ऽब्रवीत्तथा दृष्ट्वा भर्तारं शोकपीडितम् ।
प्रमृज्याश्रूणि नेत्राभ्यां सावित्री धर्मचारिणी ॥ ९६ ॥
यदि मे ऽस्ति तपस्तप्तं यदि दत्तं हुतं यदि ।
श्वश्रूश्वशुरभर्तॄणां मम पुण्यास्तु शर्वरी ॥ ९७ ॥
न स्मराम्युक्तपूर्वां वै स्वैरेष्वप्यनृतां गिरम् ।
तेन सत्येन तावद्य ध्रियेतां श्वशुरौ मम ॥ ९८ ॥

॥ सत्यवानुवाच ॥

कामये दर्शनं पित्रोर्याहि सावित्रि माचिरम् ।
पुरा मातुः पितुर्वापि यदि पश्यामि विप्रियम् ।
न जीविष्ये वरारोहे सत्येनात्मानमालभे ॥ ९९ ॥
यदि धर्मे च ते बुद्धिर्मां चेज्जीवन्तमिच्छसि ।
मम प्रियं वा कर्तव्यं गच्छावाश्रममन्तिकात् ॥ १०० ॥

॥ मार्कण्डेय उवाच ॥

सावित्री तत उत्थाय केशान्संयम्य भाविनी ।
पतिमुत्थापयामास बाहुभ्यां परिगृह्य वै ॥ १०१ ॥
उत्थाय सत्यवांश्चापि प्रमृज्याङ्गानि पाणिना ।
दिशः सर्वाः समालोक्य कठिने दृष्टिमादधे ॥ १०२ ॥
तमुवाचाथ सावित्री श्वः फलानि हरिष्यसि ।
योगक्षेमार्थमेतं ते नेष्यामि परशुं त्वहम् ॥ १०३ ॥
कृत्वा कठिनभारं सा वृक्षशाखावलम्बिनम् ।
गृहीत्वा परशुं भर्तुः सकाशं पुनरागमत् ॥ १०४ ॥
वामे स्कन्धे तु वामोरुर्भर्तुर्बाहुं निवेश्य सा ।
दक्षिणेन परिष्वज्य जगाम गजगामिनी ॥ १०५ ॥

॥ सत्यवानुवाच ॥

अभ्यासगमनाद्भीरु पन्थानो विदिता मम ।
वृक्षान्तरालोकितया ज्योत्स्नया चोपलक्षये ॥ १०६ ॥
आगतौ स्वः पथा येन फलान्यवचितानि च ।
यथागतं शुभे गच्छ पन्थानं मा विचारय ॥ १०७ ॥
पलाशखण्डे चैतस्मिन्पन्था व्यावर्तते द्विधा ।
तस्योत्तरेण यः पन्थास्तेन गच्छ त्वरस्व च ॥ १०८ ॥
स्वस्थो ऽस्मि बलवानस्मि दिदृक्षुः पितरावुभौ ।
ब्रुवन्नेव त्वरायुक्तः संप्रायादाश्रमं प्रति ॥ १०९ ॥

। इति महाभारते सावित्र्युपाख्याने पञ्चमः सर्गः । ५ ।

॥ मार्कण्डेय उवाच ॥
एतस्मिन्नेव काले तु द्युमत्सेनो महाबलः ।
लब्धचक्षुः प्रसन्नायां दृष्ट्यां सर्वं ददर्श ह ॥ १ ॥
स सर्वानाश्रमान्गत्वा शैब्यया सह भार्यया ।
पुत्रहेतोः परामार्तिं जगाम पुरुषर्षभः ॥ २ ॥
तावाश्रमान्नदीश्चैव वनानि च सरांसि च ।
तस्यां निशि विचिन्वन्तौ दंपती परिजग्मतुः ॥ ३ ॥
श्रुत्वा शब्दं तु यं कंचिदुन्मुखौ सुतशङ्कया ।
सावित्रीसहितो ऽभ्येति सत्यवानित्यभाषताम् ॥ ४ ॥
भिन्नैश्च परुषैः पादैः सव्रणैः शोणितोचितैः ।
कुशकण्टकविद्धाङ्गावुन्मत्ताविव धावतः ॥ ५ ॥
ततो ऽभिसृत्य तैर्विप्रैः सर्वैराश्रमवासिभिः ।
परिवार्य समाश्वास्य समानीतौ स्वमाश्रमम् ॥ ६ ॥
तत्र भार्यासहायः स वृतो वृद्धैस्तपोधनैः ।
आश्वासितो विचित्रार्थैः पूर्वराज्ञां कथाश्रयैः ॥ ७ ॥
ततस्तौ पुनराश्वस्तौ वृद्धौ पुत्रदिदृक्षया ।
बाल्यवृत्तानि पुत्रस्य स्मरन्तौ भृशदुःखितौ ॥ ८ ॥
पुनरुक्त्वा च करुणां वाचं तौ शोककर्शितौ ।
हा पुत्र हा साध्वि वधु क्वासि क्वासीत्यरोदताम् ॥ ९ ॥
॥ ब्राह्मणः सुवर्चा उवाच ॥
यथास्य भार्या सावित्री तपसा च दमेन च ।
आचारेण च संयुक्ता तथा जीवति सत्यवान् ॥ १० ॥
॥ गौतम उवाच ॥
वेदाः साङ्गा मयाधीतास्तपो मे संचितं महत् ।
कौमारब्रह्मचर्यं च गुरवो ऽग्निश्च तोषिताः ॥ ११ ॥
समाहितेन चीर्णानि सर्वाण्येव व्रतानि मे ।
वायुभक्षोपवासश्च कृतो मे विधिवत्सदा ॥ १२ ॥
अनेन तपसा वेद्मि सर्वं परचिकीर्षितम् ।
सत्यमेतन्निबोधध्वं ध्रियते सत्यवानिति ॥ १३ ॥
॥ शिष्य उवाच ॥
उपाध्यायस्य मे वक्त्राद्यथा वाक्यं विनिःसृतम् ।
नैव जातु भवेन्मिथ्या तथा जीवति सत्यवान् ॥ १४ ॥
॥ ऋषय ऊचुः ॥
यथास्य भार्या सावित्री सर्वैरेव सुलक्षणैः ।
अवैधव्यकरैर्युक्ता तथा जीवति सत्यवान् ॥ १५ ॥

॥ भारद्वाज उवाच ॥

यथास्य भार्या सावित्री तपसा च दमेन च ।
आचारेण च संयुक्ता तथा जीवति सत्यवान् ॥ १६ ॥

॥ दाल्भ्य उवाच ॥

यथा दृष्टिः प्रवृत्ता ते सावित्र्याश्च यथा व्रतम् ।
गताहारमकृत्वा च तथा जीवति सत्यवान् ॥ १७ ॥

॥ आपस्तम्ब उवाच ॥

यथा वदन्ति शान्तायां दिशि वै मृगपक्षिणः ।
पार्थिवी च प्रवृत्तिस्ते तथा जीवति सत्यवान् ॥ १८ ॥

॥ धौम्य उवाच ॥

सर्वैर्गुणैरुपेतस्ते यथा पुत्रो जनप्रियः ।
दीर्घायुर्लक्षणोपेतस्तथा जीवति सत्यवान् ॥ १९ ॥

॥ मार्कण्डेय उवाच ॥

एवमाश्वासितस्तैस्तु सत्यवाग्भिस्तपस्विभिः ।
तांस्तान्विगणयन्नर्थांस्ततः स्थिर इवाभवत् ॥ २० ॥
ततो मुहूर्तात्सावित्री भर्त्रा सत्यवता सह ।
आजगामाश्रमं रात्रौ प्रहृष्टा प्रविवेश ह ॥ २१ ॥

॥ ब्राह्मणा ऊचुः ॥

पुत्रेण संगतं त्वां च चक्षुष्मन्तं निरीक्ष्य च ।
सर्वे वयं वै पृच्छामो वृद्धिं ते पृथिवीपते ॥ २२ ॥
समागमेन पुत्रस्य सावित्र्या दर्शनेन च ।
चक्षुषश्चात्मनो लाभात्त्रिभिर्दिष्ट्या विवर्धसे ॥ २३ ॥
सर्वैरस्माभिरुक्तं यत्तथा तन्नात्र संशयः ।
भूयो भूयः समृद्धिस्ते क्षिप्रमेव भविष्यति ॥ २४ ॥

॥ मार्कण्डेय उवाच ॥

ततोऽग्निं तत्र संज्वाल्य द्विजास्ते सर्व एव हि ।
उपासांचक्रिरे पार्थ द्युमत्सेनं महीपतिम् ॥ २५ ॥
शैब्या च सत्यवांश्चैव सावित्री चैकतः स्थिताः ।
सर्वैस्तैरभ्यनुज्ञाता विशोकाः समुपाविशन् ॥ २६ ॥
ततो राज्ञा सहासीनाः सर्वे ते वनवासिनः ।
जातकौतूहलाः पार्थ पप्रच्छुर्नृपतेः सुतम् ॥ २७ ॥

॥ ऋषय ऊचुः ॥

प्रागेव नागतं कस्मात्सभार्येण त्वया विभो ।
विरात्रे चागतं कस्मात्कोऽनुबन्धस्तवाभवत् ॥ २८ ॥

संतापितः पिता माता वयं चैव नृपात्मज ।
कस्मादिति न जानीमस्तत्सर्वं वक्तुमर्हसि ॥ २९ ॥

॥ सत्यवानुवाच ॥

पित्राहमभ्यनुज्ञातः सावित्रीसहितो गतः ।
अथ मेऽभूच्छिरोदुःखं वने काष्ठानि भिन्दतः ॥ ३० ॥
सुप्तश्चाहं वेदनया चिरमित्युपलक्षये ।
तावत्कालं न च मया सुप्तपूर्वं कदाचन ॥ ३१ ॥
सर्वेषामेव भवतां संतापो मा भवेदिति ।
अतो चिराचागमनं नान्यदस्तीह कारणम् ॥ ३२ ॥

॥ गौतम उवाच ॥

अकस्माच्चक्षुषः प्राप्तिर्द्युमत्सेनस्य ते पितुः ।
नास्य त्वं कारणं वेत्सि सावित्री वक्तुमर्हति ॥ ३३ ॥
श्रोतुमिच्छामि सावित्रि त्वं हि वेत्थ परावरम् ।
त्वां हि जानामि सावित्रि सावित्रीमिव तेजसा ॥ ३४ ॥
त्वमत्र हेतुं जानीषे तस्मात्सत्यं निरुच्यताम् ।
रहस्यं यदि ते नास्ति किंचिदत्र वदस्व नः ॥ ३५ ॥

॥ सावित्र्युवाच ॥

एवमेतद्यथा वेत्थ संकल्पो नान्यथा हि वः ।
न हि किंचिद्रहस्यं मे श्रूयतां तथ्यमेव यत् ॥ ३६ ॥
मृत्युर्मे पत्युराख्यातो नारदेन महर्षिणा ।
स चाद्य दिवसः प्राप्तस्ततो नैनं जहाम्यहम् ॥ ३७ ॥
सुप्तं चैनं यमः साक्षादुपागच्छत्सकिंकरः ।
स एनमनयद्बद्ध्वा दिशं पितृनिषेविताम् ॥ ३८ ॥
अस्तौषं तमहं देवं सत्येन वचसा विभुम् ।
पञ्च वै तेन मे दत्ता वराः शृणुत तान्मम ॥ ३९ ॥
चक्षुषी च स्वराज्यं च द्वौ वरौ श्वशुरस्य मे ।
लब्धं पितुः पुत्रशतं पुत्राणां चात्मनः शतम् ॥ ४० ॥
चतुर्वर्षशतायुर्मे लब्धो भर्ता च सत्यवान् ।
भर्तुर्हि जीवनार्थाय मया चीर्णं व्रतं स्थिरम् ॥ ४१ ॥
एतत्सत्यं मयाख्यातं कारणं विस्तरेण वः ।
यथावृत्तं सुखोदर्कमिदं दुःखं महन्मम ॥ ४२ ॥

॥ ऋषय ऊचुः ॥

निमज्जमानं व्यसनैरभिद्रुतं कुलं नरेन्द्रस्य तमोमये ह्रदे ।
त्वया सुशीलव्रतपुण्ययुक्तया समुद्धृतं साध्वि पुनः कुलीनया ॥ ४३ ॥

॥ मार्कण्डेय उवाच ॥

तथा प्रशस्य ह्यभिपूज्य चैव ते वरस्त्रियं तामृषयः समागताः ।
नरेन्द्रमामन्त्र्य सपुत्रमञ्जसा शिवेन जग्मुर्मुदिताः स्वमालयम् ॥ ४४ ॥

। इति महाभारते सावित्र्युपाख्याने षष्ठः सर्गः । ६ ।

॥ मार्कण्डेय उवाच ॥

तस्यां रात्र्यां व्यतीतायामुदिते सूर्यमण्डले ।
कृतपौर्वाह्णिकाः सर्वे समेयुस्ते तपोधनाः ॥ १ ॥
तदेव सर्वं सावित्र्या महाभाग्यं महर्षयः ।
द्युमत्सेनाय नातृप्यन्कथयन्तः पुनः पुनः ॥ २ ॥
ततः प्रकृतयः सर्वाः शाल्वेभ्यो ऽभ्यागता नृप ।
आचख्युर्निहतं चैव स्वेनामात्येन तं द्विषम् ॥ ३ ॥
तं मन्त्रिणा हतं श्रुत्वा ससहायं सबान्धवम् ।
न्यवेदयन्यथावृत्तं विद्रुतं च द्विषद्बलम् ॥ ४ ॥
ऐकमत्यं च सर्वस्य जनस्यासीन्नृपं प्रति ।
सचक्षुर्वाप्यचक्षुर्वा स नो राजा भवत्विति ॥ ५ ॥
अनेन निश्चयेनेह वयं प्रस्थापिता नृप ।
प्राप्तानीमानि यानानि चतुरङ्गं च ते बलम् ॥ ६ ॥
प्रयाहि राजन्भद्रं ते घुष्टस्ते नगरे जयः ।
अध्यास्स्व चिररात्राय पितृपैतामहं पदम् ॥ ७ ॥
चक्षुष्मन्तं तु तं दृष्ट्वा राजानं वपुषान्वितम् ।
मूर्ध्ना निपतिताः सर्वे विस्मयोत्फुल्ललोचनाः ॥ ८ ॥
ततो ऽभिवाद्य तान्वृद्धान्द्विजानाश्रमवासिनः ।
तैश्चाभिपूजितः सर्वैः प्रययौ नगरं प्रति ॥ ९ ॥
शैब्या च सह सावित्र्या स्वास्तीर्णेन सुवर्चसा ।
नरयुक्तेन यानेन प्रययौ सेनया वृता ॥ १० ॥
ततो ऽभिषिषिचुः प्रीत्या द्युमत्सेनं पुरोहिताः ।
पुत्रं चास्य महात्मानं यौवराज्ये ऽभ्यषेचयन् ॥ ११ ॥
ततः कालेन महता सावित्र्याः कीर्तिवर्धनम् ।
तद्वै पुत्रशतं जज्ञे शूराणामनिवर्तिनाम् ॥ १२ ॥
भ्रातॄणां सोदराणां च तथैवास्याभवच्छतम् ।
मद्राधिपस्याश्वपतेर्मालव्यां सुमहाबलम् ॥ १३ ॥

एवमात्मा पिता माता श्वश्रूः श्वशुर एव च ।
भर्तुः कुलं च सावित्र्या सर्वं कृच्छ्रात्समुद्धृतम् ॥ १४ ॥
तथैवैषापि कल्याणी द्रौपदी शीलसंमता ।
तारयिष्यति वः सर्वान्सावित्रीव कुलाङ्गना ॥ १५ ॥
॥ वैशम्पायन उवाच ॥
एवं स पाण्डवस्तेन अनुनीतो महात्मना ।
विशोको विज्वरो राजन्काम्यके न्यवसत्तदा ॥ १६ ॥
यश्चेदं शृणुयाद्भक्त्या सावित्र्याख्यानमुत्तमम् ।
स सुखी सर्वसिद्धार्थो न दुःखं प्राप्नुयान्नरः ॥ १७ ॥ । ७

। इति महाभारते सावित्र्युपाख्यानं समाप्तम् ।



भीष्मपर्व

# श्रीमद्भगवद्गीता

## अथ प्रथमोऽध्यायः

*धृतराष्ट्र उवाच*

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय।१।

*सञ्जय उवाच*

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा।
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत्।२।
पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम्।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता।३।
अत्र शूरा महेष्वासा भीमार्जुनसमा युधि।
युयुधानो विराटश्च द्रुपदश्च महारथः।४।
धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः।५।
युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान्।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः।६।
अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम।
नायका मम सैन्यस्य सञ्ज्ञार्थं तान्ब्रवीमि ते।७।
भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च।८।
अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः।९।
अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्।१०।
अयनेषु च सर्वेषु यथाभागमवस्थिताः।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि।११।
तस्य सञ्जनयन्हर्षं कुरुवृद्धः पितामहः।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान्।१२।
ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्।१३।
ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः।१४।
पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः।१५।

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ।१६।

काश्यश्च परमेष्वासः शिखण्डी च महारथः।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ।१७।

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते।
सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक् पृथक् ।१८।

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन्।१९।

अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः।
प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ।२०।

हृषीकेशं तदा वाक्यमिदमाह महीपते।

*अर्जुन उवाच*

सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ।२१।

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान्।
कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ।२२।

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ।२३।

*सञ्जय उवाच*

एवमुक्तो हृषीकेशो गुडाकेशेन भारत।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम्।२४।

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्।
उवाच पार्थ पश्यैतान् समवेतान्कुरूनिति ।२५।

तत्रापश्यत्स्थितान् पार्थः पितॄनथ पितामहान्।
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ।२६।

श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि।
तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान्।२७।

कृपया परयाविष्टो विषीदन्निदमब्रवीत्।

*अर्जुन उवाच*

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्।२८।

सीदन्ति मम गात्राणि मुखं च परिशुष्यति।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ।२९।

गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ।३०।

निमित्तानि च पश्यामि विपरीतानि केशव।

न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ।३१।

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ।
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ।३२।

येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ।३३।

आचार्याः पितरः पुत्रास्तथैव च पितामहाः ।
मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा ।३४।

एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ।३५।

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ।३६।

तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ।३७।

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ।३८।

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ।३९।

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।

धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ।४०।

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ।४१।

सङ्करो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ।४२।

दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ।४३।

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरकेऽनियतं वासो भवतीत्यनुशुश्रुम ।४४।

अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ।४५।

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ।४६।

*सञ्जय उवाच*

एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ।४७।

ॐतत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादेऽर्जुनविषादयोगो नाम प्रथमोऽध्यायः ॥ १ ॥

## अथ द्वितीयोऽध्यायः

*सञ्जय उवाच*

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः। १।

*श्रीभगवानुवाच*

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन। २।
क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप। ३।

*अर्जुन उवाच*

कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन।
इषुभिः प्रति योत्स्यामि पूजार्हावरिसूदन। ४।
गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके।
हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान् रुधिरप्रदिग्धान्। ५।

न चैतद्विद्मः कतरन्नो गरीयो-
यद्वा जयेम यदि वा नो जयेयुः।
यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः। ६।

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसम्मूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्। ७।

न हि प्रपश्यामि ममापनुद्याद्
यच्छोकमुच्छोषणमिन्द्रियाणाम्।
अवाप्य भूमावसपत्नमृद्धं-
राज्यं सुराणामपि चाधिपत्यम्। ८।

*सञ्जय उवाच*

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तप।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह। ९।

तमुवाच हृषीकेशः प्रहसन्निव भारत।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः।१०।

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ।११।

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम् ।१२।

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ।१३।

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ।१४।

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ।१५।

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ।१६।

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ।१७।

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ।१८।

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ।१९।

न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो-
न हन्यते हन्यमाने शरीरे ।२०।

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ।२१।

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ।२२।

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ।२३।

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ।२४।

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ।२५।

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ।२६।

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ।२७।

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव तत्र का परिदेवना ।२८।

आश्चर्यवत्पश्यति कश्चिदेन-
माश्चर्यवद्वदति तथैव चान्यः।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित् ।२९।

देही नित्यमवध्योऽयं देहे सर्वस्य भारत।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ।३०।

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ।३१।

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ।३२।

अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ।३३।

अकीर्तिं चापि भूतानि
कथयिष्यन्ति तेऽव्ययाम्।
सम्भावितस्य चाकीर्ति-
र्मरणादतिरिच्यते ।३४।

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ।३५।

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ।३६।

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ।३७।

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ।३८।

एषा तेऽभिहिता साङ्ख्ये
बुद्धिर्योगे त्विमां शृणु।
बुद्ध्या युक्तो यया पार्थ
कर्मबन्धं प्रहास्यसि ।३९।

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ।४०।

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ।४१।

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ।४२।

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ।४३।

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ।४४।

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ।४५।

यावानर्थ उदपाने सर्वतः सम्प्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ।४६।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।४७।

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ।४८।

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ।४९।

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ।५०।

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ।५१।

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ।५२।

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ।५३।

*अर्जुन उवाच*

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ।५४।

*श्रीभगवानुवाच*

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ।५५।

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ।५६।

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ।५७।

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ।५८।
विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ।५९।
यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ।६०।
तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ।६१।
ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ।६२।
क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।६३।
रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ।६४।
प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ।६५।
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ।६६।
इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ।६७।
तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ।६८।
या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ।६९।
आपूर्यमाणमचलप्रतिष्ठं-
समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ।७०।
विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ।७१।
एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ।७२।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगो नाम द्वितीयोऽध्यायः ॥२॥

# रामायणम्

## अयोध्या नाम नगरी

कोसलो नाम मुदितः स्फीतो जनपदो महान् ।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान् ।। ५
अयोध्या नाम नगरी तत्रासील्लोकविश्रुता ।
मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम् ।। ६
आयता दश च द्वे च योजनानि महापुरी ।
श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा ।। ७
राजमार्गेण महता सुविभक्तेन शोभिता ।
मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः ।। ८
तां तु राजा दशरथो महाराष्ट्रविवर्धनः ।
पुरीमावासयामास दिवि देवपतिर्यथा ।। ९
कपाटतोरणवतीं सुविभक्तान्तरापणाम् ।
सर्वयन्त्रायुधवतीमुषितां सर्वशिल्पिभिः ।। १०
सूतमागधसंबाधां श्रीमतीमतुलप्रभाम् ।
उच्चाट्टालध्वजवतीं शतघ्नीशतसंकुलाम् ।। ११
वधूनाटकसंघैश्च संयुक्तां सर्वतः पुरीम् ।
उद्यानाम्रवणोपेतां महतीं सालमेखलाम् ।। १२
दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदाम् ।
वाजिवारणसंपूर्णां गोभिरुष्ट्रैः खरैस्तथा ।। १३
सामन्तराजसंघैश्च बलिकर्मभिरावृताम् ।
नानादेशनिवासैश्च वणिग्भिरुपशोभिताम् ।। १४

प्रासादै रत्नविकृतैः पर्वतैरिव शोभिताम् ।
कूटागारैश्च संपूर्णामिन्द्रस्येवामरावतीम् ।। १५
चित्रामष्टापदाकारां वरनारीगणायुताम् ।
सर्वरत्नसमाकीर्णां विमानगृहशोभिताम् ।। १६
गृहगाढामविच्छिद्रां समभूमौ निवेशिताम् ।
शालितण्डुलसंपूर्णामिक्षुकाण्डरसोदकाम् ।। १७
दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा ।
नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमाम् ।। १८
विमानमिव सिद्धानां तपसाधिगतं दिवि ।
सुनिवेशितवेश्मान्तां नरोत्तमसमावृताम् ।। १९
ये च बाणैर्न विध्यन्ति विविक्तमपरावरम् ।
शब्दवेध्यं च विततं लघुहस्ता विशारदाः ।। २०
सिंहव्याघ्रवराहाणां मत्तानां नदतां वने ।
हन्तारो निशितैः शस्त्रैर्बलाद्बाहुबलैरपि ।। २१
तादृशानां सहस्रैस्तामभिपूर्णां महारथैः ।
पुरीमावासयामास राजा दशरथस्तदा ।। २२
तामग्निमद्भिर्गुणवद्भिरावृतां द्विजोत्तमैर्वेदषडङ्गपारगैः ।
सहस्रदैः सत्यरतैर्महात्मभिर्महर्षिकल्पैरृषिभिश्च केवलैः ।। २३



## रामविवाहः

जनकस्य वचः श्रुत्वा विश्वामित्रो महामुनिः ।
धनुर्दर्शय रामाय इति होवाच पार्थिवम् ॥ १
ततः स राजा जनकः सचिवान्व्यादिदेश ह ।
धनुरानीयतां दिव्यं गन्धमाल्यानुलेपितम् ॥ २
जनकेन समादिष्टाः सचिवाः प्राविशन्पुरम् ।
तद्धनुः पुरतः कृत्वा निर्जग्मुरमितौजसः ॥ ३
नृणां शतानि पञ्चाशद्व्यायतानां महात्मनाम् ।
मञ्जूषामष्टचक्रां तां समूहुस्ते कथंचन ॥ ४
तामादाय सुमञ्जूषामायसीं यत्र तद्धनुः ।
सुरोपमं ते जनकमूचुर्नृपतिमन्त्रिणः ॥ ५
इदं धनुर्वरं राजन्पूजितं सर्वराजभिः ।
मिथिलाधिप राजेन्द्र दर्शनीयं यदीच्छसि ॥ ६
तेषां नृपो वचः श्रुत्वा कृताञ्जलिरभाषत ।
विश्वामित्रं महात्मानं तावुभौ रामलक्ष्मणौ ॥ ७
इदं धनुर्वरं ब्रह्मञ्जनकैरभिपूजितम् ।
राजभिश्च महावीर्यैरशक्तैः पूरितुं तदा ॥ ८
नैतत्सुरगणाः सर्वे सासुरा न च राक्षसाः ।
गन्धर्वयक्षप्रवराः सकिंनरमहोरगाः ॥ ९
क्व गतिर्मानुषाणां च धनुषोऽस्य प्रपूरणे ।
आरोपणे समायोगे वेपने तोलने तथा ॥ १०
तदेतद्धनुषां श्रेष्ठमानीतं मुनिपुंगव ।
दर्शयैतन्महाभाग अनयो राजपुत्रयोः ॥ ११
विश्वामित्रः सरामस्तु श्रुत्वा जनकभाषितम् ।
वत्स राम धनुः पश्य इति राघवमब्रवीत् ॥ १२
महर्षेर्वचनाद्रामो यत्र तिष्ठति तद्धनुः ।
मञ्जूषां तामपावृत्य दृष्ट्वा धनुरथाब्रवीत् ॥ १३
इदं धनुर्वरं दिव्यं संस्पृशामीह पाणिना ।

यत्नवांश्च भविष्यामि तोलने पूरणेऽपि वा ।। १४
बाढमित्यब्रवीद्राजा मुनिश्च समभाषत ।
लीलया स धनुर्मध्ये जग्राह वचनान्मुनेः ।। १५
पश्यतां नृसहस्राणां बहूनां रघुनन्दनः ।
आरोपयत्स धर्मात्मा सलीलमिव तद्धनुः ।। १६
आरोपयित्वा मौर्वीं च पूरयामास तद्धनुः ।
तद्बभञ्ज धनुर्मध्ये नरश्रेष्ठो महायशाः ।। १७
तस्य शब्दो महानासीन्निर्घातसमनिःस्वनः ।
भूमिकम्पश्च सुमहान्पर्वतस्येव दीर्यतः ।। १८
निपेतुश्च नराः सर्वे तेन शब्देन मोहिताः ।
वर्जयित्वा मुनिवरं राजानं तौ च राघवौ ।। १९
प्रत्याश्वस्ते जने तस्मिन्राजा विगतसाध्वसः ।
उवाच प्राञ्जलिर्वाक्यं वाक्यज्ञो मुनिपुंगवम् ।। २०
भगवन्दृष्टवीर्यो मे रामो दशरथात्मजः ।
अत्यद्भुतमचिन्त्यं च अतर्कितमिदं मया ।। २१
जनकानां कुले कीर्तिमाहरिष्यति मे सुता ।
सीता भर्तारमासाद्य रामं दशरथात्मजम् ।। २२
मम सत्या प्रतिज्ञा सा वीर्यशुल्केति कौशिक ।
सीता प्राणैर्बहुमता देया रामाय मे सुता ।। २३
भवतोऽनुमते ब्रह्मञ्शीघ्रं गच्छन्तु मन्त्रिणः ।
मम कौशिक भद्रं ते अयोध्यां त्वरिता रथैः ।। २४
राजानं प्रश्रितैर्वाक्यैरानयन्तु पुरं मम ।
प्रदानं वीर्यशुल्कायाः कथयन्तु च सर्वशः ।। २५
मुनिगुप्तौ च काकुत्स्थौ कथयन्तु नृपाय वै ।
प्रीतियुक्तं तु राजानमानयन्तु सुशीघ्रगाः ।। २६
कौशिकस्तु तथेत्याह राजा चाभाष्य मन्त्रिणः ।
अयोध्यां प्रेषयामास धर्मात्मा कृतशासनान् ।
यथावृत्तं समाख्यातुमानेतुं च नृपं तथा ।। २७

## सीताहरणम्

रावणेन तु वैदेही तदा पृष्टा जिहीर्षुणा ।
परिव्राजकरूपेण शशंसात्मानमात्मना ॥१॥
ब्राह्मणश्चातिथिश्चैष ह्यनुक्तो हि शपेत माम् ।
इति ध्यात्वा मुहूर्तं तु सीता वचनमब्रवीत् ॥२॥
दुहिता जनकस्याहं मैथिलस्य महात्मनः ।
सीता नाम्नास्मि भद्रं ते रामस्य महिषी शुभा ॥३॥
मम भर्ता महातेजा वयसा पञ्चविंशकः ।
अष्टादश च वर्षाणि मम जन्मनि गण्यते ॥४॥
रामेति प्रथितो लोके सत्यवाञ् शीलवाञ् शुचिः ।
विशालाक्षो महाबाहुः सर्वभूतहिते रतः ॥५॥
रामस्य पुरुषव्याघ्रः सहायः समरेऽरिहा ।
स भ्राता लक्ष्मणो नाम ब्रह्मचारी दृढव्रतः ॥६॥
समाश्वस मुहूर्तं तु शक्यं वस्तुमिह त्वया ।
आगमिष्यति मे भर्ता वन्यमादाय पुष्कलम् ॥७॥
एवं ब्रुवत्यां सीतायां रामपत्न्यां महाबलः ।
प्रत्युवाचोत्तरं तीव्रं रावणो राक्षसाधिपः ॥८॥
येन वित्रासिता लोकाः सदेवासुरमानुषाः ।
अहं स रावणो नाम सीते रक्षोगणेश्वरः ॥९॥
लङ्का नाम समुद्रस्य मध्ये मम महापुरी ।
सागरेण परिक्षिप्ता निविष्टा गिरिमूर्धनि ॥१०॥
तत्र सीते मया सार्धं वनेषु विचरिष्यसि ।
न चास्य वनवासस्य स्पृहयिष्यसि भामिनि ॥११॥
पञ्च दास्यः सहस्राणि सर्वाभरणभूषिताः ।
सीते परिचरिष्यन्ति भार्या भवसि मे यदि ॥१२॥

रावणेनैवमुक्ता तु कुपिता जनकात्मजा ।
प्रत्युवाचानवद्याङ्गी तमनादृत्य राक्षसम् ॥१३॥
महागिरिमिवाकम्प्यं महेन्द्रसदृशं पतिम् ।
महोदधिमिवाक्षोभ्यमहं राममनुव्रता ॥१४॥
महाबाहुं महोरस्कं सिंहविक्रान्तगामिनम् ।
नृसिंहं सिंहसङ्काशमहं राममनुव्रता ॥१५॥
त्वं पुनर्जम्बुकः सिंहीं मामिहेच्छसि दुर्लभाम् ।
नाहं शक्या त्वया स्प्रष्टुमादित्यस्य प्रभा यथा ॥१६॥
राघवस्य प्रियां भार्यां यस्त्वमिच्छसि राक्षस ।
आशीविषस्य वदनाद् दंष्ट्रामादातुमिच्छसि ॥१७॥
अवसज्य शिलां कण्ठे समुद्रं तर्तुमिच्छसि ।
सूर्याचन्द्रमसौ चोभौ पाणिभ्यां हर्तुमिच्छसि ॥१८॥

एवं ब्रुवत्यां सीतायां संरब्धः परुषं वचः ।
ललाटे भ्रुकुटिं कृत्वा रावणः प्रत्युवाच ह ॥१९॥
भ्राता वैश्रवणस्याहं सापत्नो वरवर्णिनि ।
रावणो नाम भद्रं ते दशग्रीवः प्रतापवान् ॥२०॥
यस्य देवाः सगन्धर्वाः पिशाचपतगोरगाः ।
विद्रवन्ति सदा भीता मृत्योरिव सदा प्रजाः ॥२१॥
यत्र तिष्ठाम्यहं तत्र मारुतो वाति शङ्कितः ।
तीव्रांशुः शिशिरांशुश्च भयात् सम्पद्यते दिवि ॥२२॥
मम पारे समुद्रस्य लङ्का नाम पुरी शुभा ।
सम्पूर्णा राक्षसैर्घोरैर्यथेन्द्रस्यामरावती ॥२३॥
तत्र त्वं वस मे सीते राजपुत्रि मया सह ।
न स्मरिष्यसि नारीणां मानुषीणां मनस्विनि ॥२४॥
तेन किं भ्रष्टराज्येन रामेण गतचेतसा ।
करिष्यासि विशालाक्षि तापसेन तपस्विना ॥२५॥
एवमुक्ता तु वैदेही क्रुद्धा संरक्तलोचना ।

अब्रवीत् परुषं वाक्यं रहिते राक्षसाधिपम् ॥२६॥
अपहृत्य शचीं भार्यां शक्यमिन्द्रस्य जीवितुम् ।
न हि रामस्य भार्यां मामानीय स्वस्तिमान् भवेत्॥२७॥
सीतया वचनं श्रुत्वा दशग्रीवः प्रतापवान् ।
हस्ते हस्तं समाहृत्य चकार सुमहद्वपुः ॥२८॥
दशास्यो विंशतिभुजो बभूव क्षणदाचरः ।
स परिव्राजकच्छद्म महाकायो विहाय तत् ॥२९॥
जग्राह रावणः सीतां बुधः खे रोहिणीमिव ।
वामेन सीतां पद्माक्षीं मूर्धजेषु करेण सः ॥३०॥
ततः सा राक्षसेन्द्रेण ह्रियमाणा विहायसा ।
भृशं चुक्रोश मत्तेव भ्रान्तचित्ता यथातुरा ॥३१॥
हा लक्ष्मण महाबाहो ! गुरुचित्तप्रसादक ।
ह्रियमाणां न जानीषे रक्षसा कामरूपिणा ॥३२॥
जीवितं सुखमर्थं च धर्महेतोः परित्यजन् ।
ह्रियमाणामधर्मेण मां राघव न पश्यसि ॥३३॥
आमन्त्रये जनस्थाने कर्णिकारांश्च पुष्पितान् ।
क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः ॥३४॥
दैवतानि च यान्यस्मिन् वने विविधपादपे ।
नमस्करोम्यहं तेभ्यो भर्तुः शंसत मां हृताम् ॥३५॥
विदित्वा तु महाबाहुरमुत्रापि महाबलः ।
आनेष्यति पराक्रम्य वैवस्वतहृतामपि ॥३६॥

# हनुमान्

ततो रावणनीतायाः सीतायाः शत्रुकर्षणः ।
इयेष पदमन्वेष्टुं चारणाचरिते पथि ।। १
दुष्करं निष्प्रतिद्वन्द्वं चिकीर्षन्कर्म वानरः ।
समुदग्रशिरोग्रीवो गवां पतिरिवाबभौ ।। २
अथ वैदूर्यवर्णेषु शाद्वलेषु महाबलः ।
धीरः सलिलकल्पेषु विचचार यथासुखम् ।। ३
द्विजान्वित्रासयन्धीमानुरसा पादपान्हरन् ।
मृगांश्च सुबहून्निघ्नन्प्रवृद्ध इव केसरी ।। ४
नीललोहितमाञ्जिष्ठपद्मवर्णैः सितासितैः ।
स्वभावसिद्धैर्विमलैर्धातुभिः समलंकृतम् ।। ५
कामरूपिभिराविष्टमभीक्ष्णं सपरिच्छदैः ।
यक्षकिंनरगन्धर्वैर्देवकल्पैः सपन्नगैः ।। ६
स तस्य गिरिवर्यस्य तले नागवरायुते ।
तिष्ठन्कपिवरस्तत्र ह्रदे नाग इवाबभौ ।। ७
स सूर्याय महेन्द्राय पवनाय स्वयंभुवे ।
भूतेभ्यश्चाञ्जलिं कृत्वा चकार गमने मतिम् ।। ८
अञ्जलिं प्राङ्मुखं कुर्वन्पवनायात्मयोनये ।
ततो हि ववृधे गन्तुं दक्षिणो दक्षिणां दिशम् ।। ९
प्लवगप्रवरैर्दृष्टः प्लवने कृतनिश्चयः ।
ववृधे रामवृद्ध्यर्थं समुद्र इव पर्वसु ।। १०
निष्प्रमाणशरीरः संलिलङ्घयिषुरर्णवम् ।
बाहुभ्यां पीडयामास चरणाभ्यां च पर्वतम् ।। ११
स चचालाचलश्चाशु मुहूर्तं कपिपीडितः ।
तरूणां पुष्पिताग्राणां सर्वं पुष्पमशातयत् ।। १२
तेन पादपमुक्तेन पुष्पौघेण सुगन्धिना ।
सर्वतः स वृतः शैलो बभौ पुष्पमयो यथा ।। १३

तेन चोत्तमवीर्येण पीड्यमानः स पर्वतः ।
सलिलं संप्रसुस्राव मदं मत्त इव द्विपः ।। १४
पीड्यमानस्तु बलिना महेन्द्रस्तेन पर्वतः ।
रीतीर्निर्वर्तयामास काञ्चनाञ्जनराजतीः ।। १५
मुमोच च शिलाः शैलो विशालाः समनःशिलाः ।
मध्यमेनार्चिषा जुष्टो धूमराजीरिवानलः ।। १६
हरिणा पीड्यमानेन पीड्यमानानि सर्वतः ।
गुहाविष्टानि सत्त्वानि विनेदुर्विकृतैः स्वरैः ।। १७
स महासत्त्वसंनादः शैलपीडानिमित्तजः ।
पृथिवीं पूरयामास दिशश्चोपवनानि च ।। १८
शिरोभिः पृथुभिर्नागा व्यक्तस्वस्तिकलक्षणैः ।
वमन्तः पावकं घोरं ददंशुर्दशनैः शिलाः ।। १९
तास्तदा सविषैर्दष्टाः कुपितैस्तैर्महाशिलाः ।
जज्वलुः पावकोद्दीप्ता बिभिदुश्च सहस्रधा ।। २०
यानि त्वौषधजालानि तस्मिञ्जातानि पर्वते ।
विषघ्नान्यपि नागानां न शेकुः शमितुं विषम् ।। २१
भिद्यतेऽयं गिरिर्भूतैरिति मत्वा तपस्विनः ।
त्रस्ता विद्याधरास्तस्मादुत्पेतुः स्त्रीगणैः सह ।। २२
पानभूमिगतं हित्वा हैममासनभाजनम् ।
पात्राणि च महार्हाणि करकांश्च हिरण्मयान् ।। २३
लेह्यानुच्चावचान्भक्ष्यान्मांसानि विविधानि च ।
आर्षभाणि च चर्माणि खड्गांश्च कनकत्सरून् ।। २४
कृतकण्ठगुणाः क्षीबा रक्तमाल्यानुलेपनाः ।
रक्ताक्षाः पुष्कराक्षाश्च गगनं प्रतिपेदिरे ।। २५
हारनूपुरकेयूरपारिहार्यधराः स्त्रियः ।
विस्मिताः सस्मितास्तस्थुराकाशे रमणैः सह ।। २६
एष पर्वतसंकाशो हनुमान्मारुतात्मजः ।
तितीर्षति महावेगः समुद्रं वरुणालयम् ।। २७
रामार्थं वानरार्थं च चिकीर्षन्कर्म दुष्करम् ।
समुद्रस्य परं पारं दुष्प्रापं प्राप्तुमिच्छति ।। २८
इति विद्याधरा वाचः श्रुत्वा तेषां तपस्विनाम् ।
तमप्रमेयं ददृशुः पर्वते वानरर्षभम् ।। २९
दुधुवे च स रोमाणि चकम्पे चानलोपमः ।
ननाद च महानादं सुमहानिव तोयदः ।। ३०

आनुपूर्व्या च वृत्तं तल्लाङ्गूलं लोमभिश्चितम् ।
उत्पातयन्विचिक्षेप पक्षिराज इवोरगम् ।। ३१
तस्य लाङ्गूलमाविद्धमतिवेगस्य पृष्ठतः ।
ददृशे गरुडेनेव ह्रियमाणो महोरगः ।। ३२
बाहू संस्तम्भयामास महापरिघसंनिभौ ।
आससाद कपिः कट्यां चरणौ संचुकोच च ।। ३३
संहृत्य च भुजौ श्रीमांस्तथैव च शिरोधराम् ।
तेजः सत्त्वं तथा वीर्यमाविवेश स वीर्यवान् ।। ३४
मार्गमालोकयन्दूरादूर्ध्वं प्रणिहितेक्षणः ।
रुरोध हृदये प्राणानाकाशमवलोकयन् ।। ३५
पद्भ्यां दृढमवस्थानं कृत्वा स कपिकुञ्जरः ।
निकुच्य कर्णौ हनुमानुत्पतिष्यन्महाबलः ।। ३६
वानरान्वानरश्रेष्ठ इदं वचनमब्रवीत् ।
यथा राघवनिर्मुक्तः शरः श्वसनविक्रमः ।। ३७
गच्छेत्तद्वद्गमिष्यामि लङ्कां रावणपालिताम् ।
नहि द्रक्ष्यामि यदि तां लङ्कायां जनकात्मजाम् ।। ३८
अनेनैव हि वेगेन गमिष्यामि सुरालयम् ।
यदि वा त्रिदिवे सीतां न द्रक्ष्यामि कृतश्रमः ।। ३९
बद्ध्वा राक्षसराजानमानयिष्यामि रावणम् ।
सर्वथा कृतकार्योऽहमेष्यामि सह सीतया ।। ४०
आनयिष्यामि वा लङ्कां समुत्पाट्य सरावणाम् ।
एवमुक्त्वा तु हनुमान्वानरान्वानरोत्तमः ।। ४१
उत्पपाताथ वेगेन वेगवानविचारयन् ।
सुपर्णमिव चात्मानं मेने स कपिकुञ्जरः ।। ४२
समुत्पतन्ति वेगात्तु वेगात्ते नगरोहिणः ।
संहृत्य विटपान्सर्वान्समुत्पेतुः समन्ततः ।। ४३
स मत्तकोयष्टिभकान्पादपान्पुष्पशालिनः ।
उद्वहन्नूरुवेगेन जगाम विमलेऽम्बरे ।। ४४
ऊरुवेगोत्थिता वृक्षा मुहूर्तं कपिमन्वयुः ।
प्रस्थितं दीर्घमध्वानं स्वबन्धुमिव बान्धवाः ।। ४५
तमूरुवेगोन्मथिताः सालाश्चान्ये नगोत्तमाः ।
अनुजग्मुर्हनूमन्तं सैन्या इव महीपतिम् ।। ४६

सुपुष्पिताग्रैर्बहुभिः पादपैरन्वितः कपिः ।
हनूमान्पर्वताकारो बभूवाद्भुतदर्शनः ।। ४७
सारवन्तोऽथ ये वृक्षा न्यमज्जंल्लवणाम्भसि ।
भयादिव महेन्द्रस्य पर्वता वरुणालये ।। ४८
स नानाकुसुमैः कीर्णः कपिः साङ्कुरकोरकैः ।
शुशुभे मेघसंकाशः खद्योतैरिव पर्वतः ।। ४९
विमुक्तास्तस्य वेगेन मुक्त्वा पुष्पाणि ते द्रुमाः ।
व्यवशीर्यन्त सलिले निवृत्ताः सुहृदो यथा ।। ५०
लघुत्वेनोपपन्नं तद्विचित्रं सागरेऽपतत् ।
द्रुमाणां विविधं पुष्पं कपिवायुसमीरितम् ।। ५१
पुष्पौघेण सुगन्धेन नानावर्णेन वानरः ।
बभौ मेघ इवोद्यन्वै विद्युद्गणविभूषितः ।। ५२
तस्य वेगसमुद्धूतैः पुष्पैस्तोयमदृश्यत ।
ताराभिरभिरामाभिरुदिताभिरिवाम्बरम् ।। ५३
तस्याम्बरगतौ बाहू ददृशाते प्रसारितौ ।
पर्वताग्राद्विनिष्क्रान्तौ पञ्चास्याविव पन्नगौ ।। ५४
पिबन्निव बभौ चापि सोर्मिजालं महार्णवम् ।
पिपासुरिव चाकाशं ददृशे स महाकपिः ।। ५५
तस्य विद्युत्प्रभाकारे वायुमार्गानुसारिणः ।
नयने विप्रकाशेते पर्वतस्थाविवानलौ ।। ५६
पिङ्गे पिङ्गाक्षमुख्यस्य बृहती परिमण्डले ।
चक्षुषी संप्रकाशेते चन्द्रसूर्याविव स्थितौ ।। ५७
मुखं नासिकया तस्य ताम्रया ताम्रमाबभौ ।
संध्यया समभिस्पृष्टं यथा स्यात्सूर्यमण्डलम् ।। ५८
लाङ्गूलं च समाविद्धं प्लवमानस्य शोभते ।
अम्बरे वायुपुत्रस्य शक्रध्वज इवोच्छ्रितम् ।। ५९
लाङ्गूलचक्रो हनुमाञ्शुक्लदंष्ट्रोऽनिलात्मजः ।
व्यरोचत महाप्राज्ञः परिवेषीव भास्करः ।। ६०

स्फिग्देशेनातिताम्रेण रराज स महाकपिः ।
महता दारितेनेव गिरिर्गैरिकधातुना ।। ६१
तस्य वानरसिंहस्य प्लवमानस्य सागरम् ।
कक्षान्तरगतो वायुर्जीमूत इव गर्जति ।। ६२
खे यथा निपतत्युल्का उत्तरान्ताद्विनिःसृता ।
दृश्यते सानुबन्धा च तथा स कपिकुञ्जरः ।। ६३
पतत्पतङ्गसंकाशो व्यायतः शुशुभे कपिः ।
प्रवृद्ध इव मातङ्गः कक्ष्यया बध्यमानया ।। ६४
उपरिष्टाच्छरीरेण च्छायया चावगाढया ।
सागरे मारुताविष्टा नौरिवासीत्तदा कपिः ।। ६५
यं यं देशं समुद्रस्य जगाम स महाकपिः ।
स तु तस्याङ्गवेगेन सोन्माद इव लक्ष्यते ।। ६६
सागरस्योर्मिजालानामुरसा शैलवर्ष्मणा ।
अभिघ्नंस्तु महावेगः पुप्लुवे स महाकपिः ।। ६७
कपिवातश्च बलवान्मेघवातश्च निर्गतः ।
सागरं भीमनिर्ह्रादं कम्पयामासतुर्भृशम् ।। ६८
विकर्षन्नूर्मिजालानि बृहन्ति लवणाम्भसि ।
पुप्लुवे कपिशार्दूलो विकिरन्निव रोदसी ।। ६९
मेरुमन्दरसंकाशानुद्गतान्सुमहार्णवे ।
अत्यक्रामन्महावेगस्तरङ्गान्गणयन्निव ।। ७०
तस्य वेगसमुद्घुष्टं जलं सजलदं तदा ।
अम्बरस्थं विबभ्राजे शरदभ्रमिवाततम् ।। ७१
तिमिनक्रझषाः कूर्मा दृश्यन्ते विवृतास्तदा ।
वस्त्रापकर्षणेनेव शरीराणि शरीरिणाम् ।। ७२
क्रममाणं समीक्ष्याथ भुजगाः सागरंगमाः ।
व्योम्नि तं कपिशार्दूलं सुपर्णमिव मेनिरे ।। ७३

दशयोजनविस्तीर्णा त्रिंशद्योजनमायता ।
छाया वानरसिंहस्य जवे चारुतराभवत् ।। ७४
श्वेताभ्रघनराजीव वायुपुत्रानुगामिनी ।
तस्य सा शुशुभे छाया पतिता लवणाम्भसि ।। ७५
शुशुभे स महातेजा महाकायो महाकपिः ।
वायुमार्गे निरालम्बे पक्षवानिव पर्वतः ।। ७६
येनासौ याति बलवान्वेगेन कपिकुञ्जरः ।
तेन मार्गेण सहसा द्रोणीकृत इवार्णवः ।। ७७
आपाते पक्षिसङ्घानां पक्षिराज इव व्रजन् ।
हनुमान्मेघजालानि प्रकर्षन्मारुतो यथा ।। ७८
पाण्डुरारुणवर्णानि नीलमञ्जिष्ठकानि च ।
कपिनाकृष्यमाणानि महाभ्राणि चकाशिरे ।। ७९
प्रविशन्नभ्रजालानि निष्पतंश्च पुनःपुनः ।
प्रच्छन्नश्च प्रकाशश्च चन्द्रमा इव दृश्यते ।। ८०



# Раздел 2

# Памятники этико-правовой традиции

Памятники этико-правовой традиции, формировавшиеся на протяжении длительного периода (конец I тыс. до н. э. — первая половина I тыс. н. э.), представляют собой своего рода сборники поучений и предписаний, касающихся всех сфер жизни члена индийского общества. Эти источники рассматривали как вопросы религиозной этики и морали, так и чисто правовые нормы, касающиеся проблем наследования, раздела имущества и т. п.

Литература шастр (букв, «поучение, правило») в древнеиндийской культуре относилась к традиции «смрити» (букв, «запомненное»), которая мыслилась как дополнение к «шрути» (букв, «услышанное») — Ведам и другим близко примыкающим к ним текстам, составлявшим канон. «Смрити» понималось как Предание, основанное на осмыслении и истолковании Вед. Эта традиция охватывает довольно широкий круг памятников разных жанров — сюда относятся и этико-правовые тексты — дхармашастры (которые нередко прямо так и именуют себя — «смрити») и предшествовавшие им дхармасутры («сутра» — букв. «нить»); и пураны — древние сказания, мифологического, космологического и историко-генеалогического характера; а также древнеиндийский эпос — поэмы «Махабхарата» и «Рамаяна» (см. раздел I).

В рамках литературы шастр существовало две самостоятельные и параллельно развивающиеся традиции — дхармашастры и артхашастры, которые развивались в тесной взаимосвязи и взаимовлиянии друг с другом, что нашло отражение в дошедших до нас памятниках.

Дхармашастра — буквально «наука о дхарме» — касалась религиозной морали, норм и правил поведения, которые был обязан соблюдать каждый добродетельный член общества.

«Дхарма» — ключевое понятие древнеиндийской традиции, не имеющее прямого соответствия в лексическом и понятийном аппарате человека европейской культуры. В зависимости от контекста слово это истолковывается по-разному — как «религиозный долг», «добродетель», «мораль», «праведное поведение»...По сути, дхарма — это некая совокупность правовых, моральных, этических и других норм, определяющих правила жизни и поведения каждого человека в зависимости от его общественного положения и сословной принадлежности.

Дхармашастры, таким образом, рассматривали все стороны жизни индийца и излагали поведенческие нормы, давая им ценностную характеристику с точки зрения «дхармы —

адхармы», то есть поведения, ведущего к святости и приобретению религиозных
и поведения неправедного, ведущего к религиозной и социальной деградации.

Также помимо наставлений в праведном поведении (дхарме), эти трактаты с
и правовые нормы, в том числе в области уголовного и гражданского права. Од
но отметить, что шастры хотя и считались авторитетными источниками в облас
и к ним применимо даже название правовых трактатов, но они не являлись пр
дексами в нашем понимании и не имели силы закона. Они скорее служили автор
памятниками древней традиции, на которые можно было ссылаться при судебн
рательстве.

До нашего времени дошло несколько дхармашастр, наиболее известны и
«Ману-смрити» и «Яджнавалкья-смрити». Наиболее авторитетной среди дха
признается «Ману-смрити» или, как ее еще называют, «Манава-дхармашастра»
«Наставления Ману в дхарме». (В русском переводе укоренилось название «За
ну», которое, однако, не совсем точно передает смысл санскритского наименова
памятника.) Из всех дхармашастр, которые нам известны, «Ману» самая ранняя
ется, что в том виде, в котором она дошла до нас, она сложилась во II в. до н. э. –
однако следует отметить, что процесс формирования этого памятника начался
ше и длился на протяжении ряда веков. Традиция приписывала создание это
мифическому прародителю Ману, почитавшемуся со времен Ригведы, что прид
му тексту большой авторитет. Состоит «Ману-смрити» из 12 глав, общим объе
2700 двустиший-шлок. Общий текст обрамляется философскими вставками
и последняя главы «Ману» повествуют о сотворении мира и законе воздаяния-

Следует отметить, что «Ману-смрити» отличается не всегда последовательн
нием материала (он напоминает скорее антологию афоризмов, нежели едины
и крайней противоречивостью своих предписаний. Это связано, с одной сторо
гим процессом формирования этого памятника, а с другой стороны — с разнооб
источников и как следствие, некоторой компилятивностью текста. При этом из
«Ману-смрити» выделяется наибольшей тенденциозностью своих предписаний
ко затрудняет анализ материала этого источника. В нашей Книге приведены
отрывки из «Ману-смрити»: I (Сотворение мира), II, 225–237 (обязанности
нию к родителям и учителям) и VI, 1–97 (правила поведения отшельников и а

«Яджнавалкья-смрити» считается следующей по времени создания дхар
и датируется приблизительно III–IV вв. н. э. Авторство этой шастры припис
гендарному мудрецу Яджнавалкье. «Яджнавалкья-смрити» содержит кратко

всех вопросов дхармы, при этом материал здесь излагается более последовательно и сжато, чем в «Ману-смрити». Анализ текста позволяет говорить о единстве авторской манеры изложения — здесь чувствуется четкий план и единство стиля. Также в «Яджнавалкье» заметно влияние «Ману-смрити» и «Артхашастры Каутильи» (см. ниже), что и позволяет датировать этот памятник временем не ранее III в. н. э., то есть после того, как были созданы оба вышеупомянутых текста. При этом составитель «Яджнавалкьи» не заимствовал текст других шастр буквально, а пересказывал его своими словами, по возможности нивелируя существенные противоречия.

В нашей Книге приведены отрывки из части I, шлоки 52–122 (организация семьи, обязанности супругов, домохозяина, членов каст).

Что касается традиции артхашастры, то от нее до наших дней сохранился только один памятник — «Артхашастра Каутильи». Буквально «артхашастра» означает «наука о выгоде», в данном случае речь идет о политической выгоде, и посвящена артхашастра была различным аспектам деятельности царя — а идейные ее истоки заключаются в представлениях о том, что для царя политическая выгода — превыше всего.

Древняя традиция была склонна приписывать создание трактата легендарному Каутилье, отождествляемому с Чанакьей, советником царя Чандрагупты из династии Маурьев — то есть время появления памятника относилось к концу IV в. до н. э. Однако современные исследователи больше склоняются к мнению, что окончательное оформление текст получил не ранее I–II вв. н. э. и, по всей видимости, авторство его просто было приписано Каутилье, поскольку тот был известной и авторитетной личностью. «Артхашастра» оказала существенное влияние на «Ману-смрити» и «Яджнавалкья-смрити», послужив для них прямым источником, а последние активно заимствовали из нее частноправовой материал, а также материал, посвященный политической науке.

«Артхашастра Каутильи», представляющая собой довольно большое по объему сочинение (15 книг (частей)), описывает множество аспектов как внутренней, так и внешней политики, давая предписания и советы царю, как следует и как не следует поступать в той или иной ситуации. В трактате затрагиваются вопросы выбора советников, пополнения казны, методов военного искусства, административного управления, организации судопроизводства и др.

В нашей Книге даны отрывки из 2-й части «Артхашастры» (Обязанности надзирателей) – раздел 34, гл. 16 и раздел 39, гл. 21, 22.

Важно отметить, что «Артхашастра» не изображает какое-либо конкретное индийское царство, а рисует картину некоего идеального государства, показывает пример идеального

общественного устройства. Речь здесь идет о полнокровном и внутренне непротиворечи вом описании общества, образцы для которого вероятно поставляла социальная и поли тическая практика ряда индийских государств.

Изучением памятников этико-правовой традиции занимались в первую очередь ис торики. Однако, с точки зрения языкового своеобразия эти памятники, насколько на известно, специальному исследованию не подвергались.

Из работ отечественных историков полезно прочитать:

Вигасин А. А. «Ведийские сутры и дхармашастры», «Артхашастра» // «Источникове дение истории древнего Востока» М., 1984. Раздел 4, гл. XX, сс. 1, 2.

Вигасин А. А., Самозванцев А. М. «Артхашастра: проблемы социальной структур и права.» М., 1984.

Самозванцев А. М. «Правовой текст дхармашастры». М., 1991.

Самозванцев А. М. «Артхашастра и дхармашастра: право и проблемы интергграци жанров». Вестник древней истории (ВДИ) 1984 №2.

# मानवधर्मशास्त्रं

अथ

मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां प्रथमो ध्यायः ॥

मनुमेकाग्रमासीनमभिगम्य महर्षयः ।
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ॥
भगवन्सर्ववर्णानां यथावदनुपूर्वशः ।
अन्तरप्रभवाणां च धर्मान्नो वक्तुमर्हसि ॥
त्वमेको ह्यस्य सर्वस्य विधानस्य स्वयंभुवः ।
अचिन्त्यस्याप्रमेयस्य कार्यतत्त्वार्थवित्प्रभो ॥
स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः ।
प्रत्युवाचार्च्य तान्सर्वान्महर्षीञ्छ्रूयतामिति ॥
आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥५॥
ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः ॥
यो सावतीन्द्रियग्राह्यः सूक्ष्मो ऽव्यक्तः सनातनः ।
सर्वभूतमयो चिन्त्यः स एष स्वयमुद्बभौ ॥
सो भिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु बीजमवासृजत् ॥
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥१०॥
यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम् ।
तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते ॥
तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम् ।
स्वयमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा ॥
ताभ्यां स शकलाभ्यां च दिवं भूमिं च निर्ममे ।
मध्ये व्योम दिशश्चाष्टावपां स्थानं च शाश्वतम् ॥
उद्बबर्हात्मनश्चैव मनः सदसदात्मकम् ।
मनसश्चाप्यहंकारमभिमन्तारमीश्वरम् ॥
महान्तमेव चात्मानं सर्वाणि त्रिगुणानि च ।
विषयाणां ग्रहीतॄणि शनैः पञ्चेन्द्रियाणि च ॥१५॥
तेषां त्ववयवान्सूक्ष्मान्षण्णामप्यमितौजसाम् ।
संनिवेश्यात्ममात्रासु सर्वभूतानि निर्ममे ॥
यन्मूर्त्यवयवाः सूक्ष्मास्तस्येमान्याश्रयन्ति षट् ।
तस्माच्छरीरमित्याहुस्तस्य मूर्तिं मनीषिणः ॥
तदा विशन्ति भूतानि महान्ति सह कर्मभिः ।
मनश्चावयवैः सूक्ष्मैः सर्वभूतकृदव्ययम् ॥
तेषामिदं तु सप्तानां पुरुषाणां महौजसाम् ।
सूक्ष्माभ्यो मूर्तिमात्राभ्यः संभवत्यव्ययाद्व्ययम् ॥
आद्याद्यस्य गुणं त्वेषामवाप्नोति परस्परः ।
योयो यावतिथश्चैषां सस तावद्गुणः स्मृतः ॥२०॥
सर्वेषां तु स नामानि कर्माणि च पृथक्पृथक् ।
वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥

कर्मात्मनां च देवानां सो सृजत्प्राणिनां प्रभुः ।
साध्यानां च गणं सूक्ष्मं यज्ञं चैव सनातनम् ॥
अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् ॥
कालं कालविभक्तीश्च नक्षत्राणि ग्रहांस्तथा ।
सरितः सागराञ्छैलान्समानि विषमाणि च ॥
तपो वाचं रतिं चैव कामं च क्रोधमेव च ।
सृष्टिं ससर्ज चैवेमां स्रष्टुमिच्छन्निमाः प्रजाः ॥ २५ ॥
कर्मणां च विवेकार्थं धर्माधर्मौ व्यवेचयत् ।
द्वन्द्वैरयोजयच्चेमाः सुखदुःखादिभिः प्रजाः ॥
अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः ।
ताभिः सार्धमिदं सर्वं संभवत्यनुपूर्वशः ॥
यं तु कर्मणि यस्मिन्स न्ययुङ्क्त प्रथमं प्रभुः ।
स तदेव स्वयं भेजे सृज्यमानः पुनःपुनः ॥
हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते ।
यद्यस्य सो दधात्सर्गे तत्तस्य स्वयमाविशेत् ॥
यथर्तुलिङ्गान्यृतवः स्वयमेवर्तुपर्यये ।
स्वानिस्वान्यभिपद्यन्ते तथा कर्माणि देहिनः ॥ ३० ॥
लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः ।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयत् ॥
द्विधा कृत्वात्मनो देहमर्धेन पुरुषो भवत् ।
अर्धेन नारी तस्यां स विराजमसृजत्प्रभुः ॥
तपस्तप्त्वासृजद्यं तु स स्वयं पुरुषो विराट् ।
तं मां वित्तास्य सर्वस्य स्रष्टारं द्विजसत्तमाः ॥

अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम् ।
पतीन्प्रजानामसृजं महर्षीनादितो दश ॥
मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्रचेतसं वशिष्ठं च भृगुं नारदमेव च ॥३५॥
एते मनूंस्तु सप्तान्यानसृजन्भूरितेजसः ।
देवान्देवनिकायांश्च महर्षींश्चामितौजसः ॥
यक्षरक्षःपिशाचांश्च गन्धर्वाप्सरसो सुरान् ।
नागान्सर्पान्सुपर्णांश्च पितॄणां च पृथग्गणान् ॥
विद्युतो शनिमेघांश्च रोहितेन्द्रधनूंषि च ।
उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च ॥
किन्नरान्वानरान्मत्स्यान्विविधांश्च विहंगमान् ।
पशून्मृगान्मनुष्यांश्च व्यालांश्चोभयतोदतः ॥
कृमिकीटपतङ्गांश्च यूकामक्षिकमत्कुणम् ।
सर्वं च दंशमशकं स्थावरं च पृथग्विधम् ॥४०॥
एवमेतैरिदं सर्वं मन्नियोगान्महात्मभिः ।
यथाकर्म तपोयोगात्सृष्टं स्थावरजङ्गमम् ॥
येषां तु यादृशं कर्म भूतानामिह कीर्तितम् ।
तत्तथा वो भि धास्यामि क्रमयोगं च जन्मनि ॥
पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः ।
रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः ॥
अण्डजाः पक्षिणः सर्पा नक्रा मत्स्याश्च कच्छपाः ।
यानि चैवं प्रकाराणि स्थलजान्यौदकानि च ॥
स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम् ।
उष्मणश्चोप जायन्ते यच्चान्यत्किं चिदीदृशम् ॥४५॥

उद्भिज्जाः स्थावराः सर्वे वीजकाण्डप्ररोहिणः ।
ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः ॥
अपुष्पाः फलवन्तो ये ते वनस्पतयो स्मृताः ।
पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः ॥
गुच्छगुल्मं तु विविधं तथैव तृणजातयः ।
वीजकाण्डरुहाण्येव प्रताना वल्ल्य एव च ॥
तमसा बहुरूपेण वेष्टिताः कर्महेतुना ।
अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः ॥
एतदन्तास्तु गतयो ब्रह्माद्याः समुदाहृताः ।
घोरे स्मिन्भूतसंसारे नित्यं सततयायिनि ॥ ५० ॥
एवं सर्वं स सृष्ट्वेदं मां चाचिन्त्यपराक्रमः ।
आत्मन्यन्तर्दधे भूयः कालं कालेन पीडयन् ॥
यदा स देवो जागर्ति तदेदं चेष्टते जगत् ।
यदा स्वपिति शान्तात्मा तदा सर्वं नि मीलति ॥
तस्मिन्स्वपति तु सुस्थे कर्मात्मानः शरीरिणः ।
स्वकर्मभ्यो नि वर्तन्ते मनश्च ग्लानिमृच्छति ॥
युगपत्तु प्र लीयन्ते यदा तस्मिन्महात्मनि ।
तदायं सर्वभूतात्मा सुखं स्वपिति निर्वृतः ॥
तमो यं तु समाश्रित्य चिरं तिष्ठति सेन्द्रियः ।
न च स्वं कुरुते कर्म तदोत्क्रामति मूर्तितः ॥ ५५ ॥
यदाणुमात्रिको भूत्वा वीजं स्थास्नु चरिष्णु च ।
समाविशति संसृष्टस्तदा मूर्तिं वि मुञ्चति ॥
एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरम् ॥
सं जीवयति चाजस्रं प्र मापयति चाव्ययः ॥

इदं शास्त्रं तु कृत्वासौ मामेव स्वयमादितः ।
विधिवद्ग्राहयामास मरीच्यादींस्त्वहं मुनीन् ॥
एतद्वो यं भृगुः शास्त्रं श्रावयिष्यत्यशेषतः ।
एतद्धि मत्तो धिजगे सर्वमेषो खिलं मुनिः ॥
ततस्तथा स तेनोक्तो महर्षिर्मनुना भृगुः ।
तानब्रवीदृषीन्सर्वान्प्रीतात्मा श्रूयतामिति ॥६०॥
स्वायम्भुवस्यास्य मनोः षड्वंश्या मनवो परे ।
सृष्टवन्तः प्रजाः स्वाःस्वा महात्मानो महौजसः ॥
स्वारोचिषश्चौत्तमिश्च तामसो रैवतस्तथा ।
चाक्षुषश्च महातेजा विवस्वत्सुत एव च ॥
स्वायम्भुवाद्याः सप्तैते मनवो भूरितेजसः ।
स्वेस्वे न्तरे सर्वमिदमुत्पाद्यापुश्चराचरम् ॥
निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला ।
त्रिंशत्कला मुहूर्तः स्यादहोरात्रं तु तावतः ॥
अहोरात्रे वि भजते सूर्यो मानुषदैविके ।
रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः ॥६५॥
पित्र्ये रात्र्यहनी मासः प्रविभागस्तु पक्षयोः ।
कर्मचेष्टास्वहः कृष्णः शुक्लः स्वप्नाय शर्वरी ॥
दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः ।
अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम् ॥
ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः ।
एकैकशो युगानां तु क्रमशस्तन्नि बोधत ॥
चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगम् ।
तस्य तावच्छती संध्या संध्यांशश्च तथाविधः ॥

इतरेषु ससंध्येषु ससंध्यांशेषु च त्रिषु ।
एकापायेन वर्तन्ते सहस्राणि शतानि च ॥७०॥
यदेतत्परिसंख्यातमादावेव चतुर्युगम् ।
एतद्द्वादशसाहस्रं देवानां युगमुच्यते ॥
दैविकानां युगानां तु सहस्रं परिसंख्यया ।
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च ॥
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः ।
रात्रिं च तावतीमेव ते ऽहोरात्रविदो जनाः ॥
तस्य सो ऽहर्निशस्यान्ते प्रसुप्तः प्रति बुध्यते ।
प्रतिबुद्धश्च सृजति मनः सदसदात्मकम् ॥
मनः सृष्टिं वि कुरुते चोद्यमानं सिसृक्षया ।
आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः ॥७५॥
आकाशात्तु विकुर्वाणात्सर्वगन्धवहः शुचिः ।
बलवाञ्जायते वायुः स वै स्पर्शगुणो मतः ॥
वायोरपि विकुर्वाणाद्विरोचिष्णु तमोनुदम् ।
ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते ॥
ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः ।
अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः ॥
यत्प्राग्द्वादशसाहस्रमुदितं दैविकं युगम् ।
तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते ॥
मन्वन्तराण्यसंख्यानि सर्गः संहार एव च ।
क्रीडन्निवैतत्कुरुते परमेष्ठी पुनःपुनः ॥८०॥
चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे ।
नाधर्मेणागमः कश्चिन्मनुष्यान्प्रति वर्तते ॥

इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः ।
चौरिकानृतमायाभिर्धर्मश्चापैति पादशः ॥
अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ।
कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः ॥
वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम् ।
फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम् ॥
अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे ।
अन्ये कलियुगे नृणां युगह्रासानुरूपतः ॥८५॥
तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥
सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं स महाद्युतिः ।
मुखबाहूरुपज्जानां पृथक्कर्माण्यकल्पयत् ॥
अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् ॥
प्रजानां रक्षणं दानमिज्याध्ययनमेव च ।
विषयेष्वप्रसक्तिं च क्षत्रियस्य समासतः ॥
पशूनां रक्षणं दानमिज्याध्ययनमेव च ।
वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च ॥९०॥
एवमेव तु शूद्रस्य प्रभुः कर्म समादिशत् ।
एतेषामेव वर्णानां शुश्रूषामनसूयया ॥
ऊर्ध्वं नाभेर्मेध्यतरः पुरुषः परिकीर्तितः ।
तस्मान्मेध्यतमं त्वस्य मुखमुक्तं स्वयंभुवा ॥
उत्तमाङ्गोद्भवाज्ज्यैष्ठ्याद्ब्रह्मणश्चैव धारणात् ।
सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ॥

तं हि स्वयंभूः स्वादास्यात्तपस्तप्त्वादितो सृजत् ।
हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये ॥
यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः ॥
कव्यानि चैव पितरः किं भूतमधिकं ततः ॥ ९५॥
भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः ।
बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥
ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः ।
कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः ॥
उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती ।
स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ॥
ब्राह्मणो जायमानो हि पृथिव्यामधि जायते ।
ईश्वरः सर्वभूतानां धर्मकोषस्य गुप्तये ॥
सर्वं स्वं ब्राह्मणस्येदं यत्किंचिज्जगतीगतम् ।
श्रैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणो र्हति ॥ १००॥
स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च ।
आनृशंस्याद्ब्राह्मणस्य भुञ्जते हीतरे जनाः ॥
तस्य कर्मविवेकार्थं शेषाणामनुपूर्वशः ।
स्वायम्भुवो मनुर्धीमानिदं शास्त्रमकल्पयत् ॥
विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः ।
शिष्येभ्यश्च प्रवक्तव्यं सम्यग्नान्येन केन चित् ॥
इदं शास्त्रमधीयानो ब्राह्मणः शंसितव्रतः ।
मनोवाग्देहजैर्नित्यं कर्मदोषैर्न लिप्यते ॥
पुनाति पङ्क्तिं वंश्यांश्च सप्तसप्त परावरान् ।
पृथिवीमपि चैवेमां कृत्स्नामेको पि सो र्हति ॥ १०५॥

इदं स्वस्त्ययनं श्रेष्ठमिदं बुद्धिविवर्धनम् ।
इदं यशस्यमायुष्यमिदं निःश्रेयसं परम् ॥
अस्मिन्धर्मो खिलेनोक्तो गुणदोषौ च कर्मणाम् ।
चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः ॥
आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च ।
तस्मादस्मिन्सदा युक्तो नित्यं स्यादात्मवान्द्विजः ॥
आचाराद्विच्युतो विप्रो न वेदफलमश्नुते ।
आचारेण तु संयुक्तः संपूर्णफलभाग्भवेत् ॥
एवमाचारतो दृष्ट्वा धर्मस्य मुनयो गतिम् ।
सर्वस्य तपसो मूलमाचारं जगृहुः परम् ॥११०॥
जगतश्च समुत्पत्तिं संस्कारविधिमेव च ।
व्रतचर्योपचारं च स्नानस्य च परं विधिम् ॥
दाराधिगमनं चैव विवाहानां च लक्षणम् ।
महायज्ञविधानं च श्राद्धकल्पं च शाश्वतम् ॥
वृत्तीनां लक्षणं चैव स्नातकस्य व्रतानि च ।
भक्ष्याभक्ष्यं च शौचं च द्रव्याणां शुद्धिमेव च ॥
स्त्रीधर्मयोगं तापस्यं मोक्षं संन्यासमेव च ।
राज्ञश्च धर्ममखिलं कर्मणां च विनिर्णयम् ॥
साक्षिप्रश्नविधानं च धर्मं स्त्रीपुंसयोरपि ।
विभागधर्मं द्यूतं च कण्टकानां च शोधनम् ॥११५॥
वैश्यशूद्रोपचारं च संकीर्णानां च संभवम् ।
आपद्धर्मं च वर्णानां प्रायश्चित्तविधिं तथा ॥
संसारगमनं चैव त्रिविधं कर्मसंभवम् ।
निःश्रेयसं कर्मणां च गुणदोषपरीक्षणम् ॥

देशधर्माञ्जातिधर्मान्कुलधर्मांश्च शाश्वतान् ।
पाषण्डगणधर्मांश्च शास्त्रे ऽस्मिन्नुक्तवान्मनुः ॥
यथेदमुक्तवाञ्शास्त्रं पुरा पृष्टो मनुर्मया ।
तथेदं यूयमप्यद्य मत्सकाशान्निबोधत ॥

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां
प्रथमो ऽध्यायः ॥

अथ

## मानवे धर्मशास्त्रे द्वितीयो ऽध्यायः

आचार्यश्च पिता चैव माता भ्राता च पूर्वजः ।
नार्तेनाप्यवमन्तव्या ब्राह्मणेन विशेषतः ॥ २२५ ॥
आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ।
माता पृथिव्या मूर्तिश्च भ्राता स्वो मूर्तिरात्मनः ॥ २२६ ॥
यं मातापितरौ क्लेशं सहेते संभवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ॥ २२७ ॥
तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा ।
तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते ॥ २२८ ॥
तेषां त्रयाणां शुश्रूषा परमं तप उच्यते ।
न तैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत् ॥ २२९ ॥
त एव हि त्रयो लोकास्त एव त्रय आश्रमाः ।
त एव हि त्रयो वेदास्त एवोक्तास्त्रयो ऽग्नयः ॥ २३० ॥
पिता वै गार्हपत्यो ऽग्निर्माताग्निर्दक्षिणः स्मृतः ।
गुरुराहवनीयस्तु साग्नित्रेता गरीयसी ॥ २३१ ॥
त्रिष्वप्रमाद्यन्नेतेषु त्रींल्लोकान्विजयेद्गृही ।
दीप्यमानः स्ववपुषा देववद्दिवि मोदते ॥ २३२ ॥
इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम् ।
गुरुशुश्रूषया त्वेव ब्रह्मलोकं समश्नुते ॥ २३३ ॥
सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥ २३४ ॥
यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत् ।
तेष्वेव नित्यं शुश्रूषां कुर्यात्प्रियहिते रतः ॥ २३५ ॥
तेषामनुपरोधेन पारत्र्यं यद्यदाचरेत् ।
तत्तन्निवेदयेत्तेभ्यो मनोवचनकर्मभिः ॥ २३६ ॥
त्रिष्वेतेष्विति कृत्यं हि पुरुषस्य समाप्यते ।
एष धर्मः परः साक्षादुपधर्मो ऽन्य उच्यते ॥ २३७ ॥

# अथ मानवे धर्मशास्त्रे षष्ठो ऽध्यायः ॥

एवं गृहाश्रमे स्थित्वा विधिवत्स्नातको द्विजः ।
वने वसेत्तु नियतो यथावद्विजितेन्द्रियः ॥ १ ॥
गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः ।
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् ॥ २ ॥
संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम् ।
पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा ॥ ३ ॥
अग्निहोत्रं समादाय गृह्यं चाग्निपरिच्छदम् ।
ग्रामादरण्यं निःसृत्य निवसेन्नियतेन्द्रियः ॥ ४ ॥
मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा ।
एतानेव महायज्ञान्निर्वपेद्विधिपूर्वकम् ॥ ५ ॥
वसीत चर्म चीरं वा सायं स्नायात्प्रगे तथा ।
जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखांस्तथा ॥ ६ ॥
यद्भक्ष्यं स्यात्ततो दद्याद्बलिं भिक्षां च शक्तितः ।
अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् ॥ ७ ॥
स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समाहितः ।
दाता नित्यमनादाता सर्वभूतानुकम्पकः ॥ ८ ॥
वैतानिकं च जुहुयादग्निहोत्रं यथाविधि ।
दर्शमस्कन्दयन्पर्व पौर्णमासं च योगतः ॥ ९ ॥
ऋक्षेष्ट्याग्रयणं चैव चातुर्मास्यानि चाहरेत् ।
उत्तरायणं क्रमशो दक्षिणायनमेव च ॥ १० ॥
वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः ।
पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत्पृथक् ॥ ११ ॥
देवताभ्यश्च तद्धुत्वा वन्यं मेध्यतरं हविः ।
शेषमात्मनि युञ्जीत लवणं च स्वयंकृतम् ॥ १२ ॥
स्थलजौदकशाकानि पुष्पमूलफलानि च ।
मेध्यवृक्षोद्भवान्यद्यात्स्नेहांश्च फलसंभवान् ॥ १३ ॥
वर्जयेन्मधुमांसानि भौमानि कवकानि च ।
भूस्तृणं शिग्रुकं चैव श्लेष्मातकफलानि च ॥ १४ ॥
त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्वसंचितम् ।
जीर्णानि चैव वासांसि शाकमूलफलानि च ॥ १५ ॥

न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित् ।
न ग्रामजातान्यार्तो ऽपि पुष्पाणि च फलानि च ॥ १६ ॥
अग्निपक्वाशनो वा स्यात्कालपक्वभुगेव वा ।
अश्मकुट्टो भवेद्वापि दन्तोलूखलिकस्तथा ॥ १७ ॥
सद्यःप्रक्षालको वा स्यान्माससंचयिको ऽपि वा ।
षण्मासनिचयो वा स्यात्समानिचय एव वा ॥ १८ ॥
नक्तं वान्नं समश्नीयाद्दिवा वाहृत्य शक्तितः ।
चतुर्थकालिको वा स्यात्स्याद्वाप्यष्टमकालिकः ॥ १९ ॥
चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्तयेत् ।
पक्षान्तयोर्वाप्यश्नीयाद्यवागूं क्वथितां सकृत् ॥ २० ॥
पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा ।
कालपक्वैः स्वयंशीर्णैर्वैखानसमते स्थितः ॥ २१ ॥
भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनम् ।
स्थानासनाभ्यां विहरेत्सवनेषूपयन्नपः ॥ २२ ॥
ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः ।
आर्द्रवासास्तु हेमन्ते क्रमशो वर्धयंस्तपः ॥ २३ ॥
उपस्पृशंस्त्रिषवणं पितॄन्देवांश्च तर्पयेत् ।
तपश्चरंश्चोग्रतरं शोषयेद्देहमात्मनः ॥ २४ ॥
अग्नींस्वात्मनि वैतानान्समारोप्य यथाविधि ।
अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः ॥ २५ ॥
अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः ।
शरणेष्वममश्चैव वृक्षमूलनिकेतनः ॥ २६ ॥
तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ।
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ॥ २७ ॥
ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान्वने वसन् ।
प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥ २८ ॥
एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन् ।
विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः ॥ २९ ॥
ऋषिभिर्ब्राह्मणैश्चैव गृहस्थैरेव सेविताः ।
विद्यातपोविवृद्ध्यर्थं शरीरस्य च शुद्धये ॥ ३० ॥
अपराजितां वास्थाय व्रजेद्दिशमजिह्मगः ।
आ निपाताच्छरीरस्य युक्तो वार्यनिलाशनः ॥ ३१ ॥
आसां महर्षिचर्याणां त्यक्त्वान्यतमया तनुम् ।
वीतशोकभयो विप्रो ब्रह्मलोके महीयते ॥ ३२ ॥
वनेषु तु विहृत्यैवं तृतीयं भागमायुषः ।

चतुर्थमायुषो भागं त्यक्त्वा सङ्गान्परिव्रजेत् ॥ ३३ ॥
आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः ।
भिक्षाबलिपरिश्रान्तः प्रव्रजन्प्रेत्य वर्धते ॥ ३४ ॥
ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥ ३५ ॥
अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः ।
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ॥ ३६ ॥
अनधीत्य द्विजो वेदाननुत्पाद्य तथा प्रजाम् ।
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः ॥ ३७ ॥
प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम् ।
आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ॥ ३८ ॥
यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् ।
तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ॥ ३९ ॥
यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयम् ।
तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ॥ ४० ॥
आगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः ।
समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ॥ ४१ ॥
एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् ।
सिद्धिमेकस्य संपश्यन्न जहाति न हीयते ॥ ४२ ॥
अनग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेत् ।
उपेक्षकोऽसंकसुको मुनिर्भावसमाहितः ॥ ४३ ॥
कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥ ४४ ॥
नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्वेशं भृतको यथा ॥ ४५ ॥
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥ ४६ ॥
अतिवादांस्तितिक्षेत नावमन्येत कंचन ।
न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ ४७ ॥
क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ।
सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ॥ ४८ ॥
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥ ४९ ॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ ५० ॥

न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः ।
आकीर्णं भिक्षुकैर्वान्यैरागारमुपसंव्रजेत् ॥ ५१ ॥
कॢप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान् ।
विचरेन्नियतो नित्यं सर्वभूतान्यपीडयन् ॥ ५२ ॥
अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च ।
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥ ५३ ॥
अलाबुं दारुपात्रं च मृन्मयं वैदलं तथा ।
एतानि यतिपात्राणि मनुः स्वायंभुवो ऽब्रवीत् ॥ ५४ ॥
एककालं चरेद्भैक्षं न प्रसज्जेत विस्तरे ।
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥ ५५ ॥
विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ।
वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् ॥ ५६ ॥
अलाभे न विषादी स्याल्लाभश्चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥ ५७ ॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्वशः ।
अभिपूजितलाभैश्च यतिर्मुक्तो ऽपि बध्यते ॥ ५८ ॥
अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ।
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ॥ ५९ ॥
इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।
अहिंसया च भूतानाममृतत्वाय कल्पते ॥ ६० ॥
अवेक्षेत गतीर्नॄणां कर्मदोषसमुद्भवाः ।
निरये चैव पतनं यातनाश्च यमक्षये ॥ ६१ ॥
विप्रयोगं प्रियैश्चैव संयोगं च तथाप्रियैः ।
जरया चाभिभवनं व्याधिभिश्चोपपीडनम् ॥ ६२ ॥
देहादुत्क्रमणं चास्मात्पुनर्गर्भे च संभवम् ।
योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मनः ॥ ६३ ॥
अधर्मप्रभवं चैव दुःखयोगं शरीरिणाम् ।
धर्मार्थप्रभवं चैव सुखसंयोगमक्षयम् ॥ ६४ ॥
सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः ।
देहेषु चैवोपपत्तिमुत्तमेष्वधमेषु च ॥ ६५ ॥
भूषितो ऽपि चरेद्धर्मं यत्र तत्राश्रमे वसन् ।
समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ॥ ६६ ॥
फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम् ।
न नामग्रहणादेव तस्य वारि प्रसीदति ॥ ६७ ॥
संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा ।

शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ॥ ६८ ॥
अह्ना रात्र्या च याञ्जन्तून्हिनस्त्यज्ञानतो यतिः ।
तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् षडाचरेत् ॥ ६९ ॥
प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः ।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥ ७० ॥
दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः ।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥ ७१ ॥
प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषम् ।
प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ॥ ७२ ॥
उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः ।
ध्यानयोगेन संपश्येद्गतिमस्यान्तरात्मनः ॥ ७३ ॥
सम्यग्दर्शनसंपन्नः कर्मभिर्न निबध्यते ।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥ ७४ ॥
अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्मभिः ।
तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम् ॥ ७५ ॥
अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ।
चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ॥ ७६ ॥
जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ॥ ७७ ॥
नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा ।
तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्यते ॥ ७८ ॥
प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् ।
विसृज्य ध्यानयोगेन ब्रह्माभ्येति सनातनम् ॥ ७९ ॥
यदा भावेन भवति सर्वभावेषु निःस्पृहः ।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ॥ ८० ॥
अनेन विधिना सर्वांस्त्यक्त्वा सङ्गाञ्छनैः शनैः ।
सर्वद्वंद्वविनिर्मुक्तो ब्रह्मण्येवावतिष्ठते ॥ ८१ ॥
ध्यानिकं सर्वमेवैतद्यदेतदभिशब्दितम् ।
न ह्यनध्यात्मवित्कश्चित्क्रियाफलमुपाश्नुते ॥ ८२ ॥
अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च ।
आध्यात्मिकं च सततं वेदान्ताभिहितं च यत् ॥ ८३ ॥
इदं शरणमज्ञानामिदमेव विजानताम् ।
इदमन्विच्छतां स्वर्गमिदमानन्त्यमिच्छताम् ॥ ८४ ॥
अनेन क्रमयोगेन परिव्रजति यो द्विजः ।
स विधूयेह पाप्मानं परं ब्रह्माधिगच्छति ॥ ८५ ॥

एष धर्मो ऽनुशिष्टो वो यतीनां नियतात्मनाम् ।
वेदसंन्यासिकानां तु कर्मयोगं निबोधत ॥ ८६ ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥ ८७ ॥
सर्वे ऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः ।
यथोक्तकारिणं विप्रं नयन्ति परमां गतिम् ॥ ८८ ॥
सर्वेषामपि चैतेषां वेदश्रुतिविधानतः ।
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान्बिभर्ति हि ॥ ८९ ॥
यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ॥ ९० ॥
चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः ।
दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ॥ ९१ ॥
धृतिः क्षमा दमो ऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥ ९२ ॥
दशलक्षणकं धर्मं ये विप्राः समधीयते ।
अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम् ॥ ९३ ॥
दशलक्षणकं धर्ममनुतिष्ठन्समाहितः ।
वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ॥ ९४ ॥
संन्यस्य सर्वकर्माणि कर्मदोषानपानुदन् ।
नियतो वेदमभ्यस्यन्पुत्रैश्वर्ये सुखं वसेत् ॥ ९५ ॥
एवं संन्यस्य कर्माणि स्वकार्यपरमो ऽस्पृहः ।
संन्यासेनापहत्यैनः प्राप्नोति परमां गतिम् ॥ ९६ ॥
एष वो ऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः ।
पुण्यो ऽक्षयफलः प्रेत्य राज्ञां धर्मान्निबोधत ॥ ९७ ॥
॥ इति मानवे धर्मशास्त्रे भृगुप्रोक्ते षष्ठो ऽध्यायः ॥

# अथ मानवे धर्मशास्त्रे नवमोऽध्यायः॥

पुरुषस्य स्त्रियाश्चैव धर्म्ये वर्त्मनि तिष्ठतोः।
संयोगे विप्रयोगे च धर्मान्वक्ष्यामि शाश्वतान्॥ १॥
अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम्।
विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे॥ २॥
पिता रक्षति कौमारे भर्ता रक्षति यौवने।
रक्षन्ति स्थाविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति॥ ३॥
कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन्पतिः।
मृते भर्तरि पुत्रस्तु वाच्यो मातुररक्षिता॥ ४॥
सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः।
द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः॥ ५॥
इमं हि सर्ववर्णानां पश्यन्तो धर्ममुत्तमम्।
यतन्ते रक्षितुं भार्यां भर्तारो दुर्बला अपि॥ ६॥
स्वां प्रसूतिं चरित्रं च कुलमात्मानमेव च।
स्वं च धर्मं प्रयत्नेन जायां रक्षन्हि रक्षति॥ ७॥
पतिर्भार्यां संप्रविश्य गर्भो भूत्वेह जायते।
जायायास्तद्धि जायात्वं यदस्यां जायते पुनः॥ ८॥
यादृशं भजते हि स्त्री सुतं सूते तथाविधम्।
तस्मात्प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत्प्रयत्नतः॥ ९॥
न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुम्।
एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम्॥ १०॥
अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत्।
शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य वेक्षणे॥ ११॥

अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः ।
आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः ॥ १२ ॥
पानं दुर्जनसंसर्गः पत्या च विरहो ऽटनम् ।
स्वप्नो ऽन्यगेहवासश्च नारीसंदूषणानि षट् ॥ १३ ॥
नैता रूपं परीक्षन्ते नासां वयसि संस्थितिः ।
सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते ॥ १४ ॥
पौंश्चल्याच्चलचित्तत्वान्नैःस्नेह्याच्च स्वभावतः ।
रक्षिता यत्नतो ऽपीह भर्तृष्वेता विकुर्वते ॥ १५ ॥
एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजम् ।
परमं यत्नमातिष्ठेत्पुरुषो रक्षणं प्रति ॥ १६ ॥
शय्यासनमलंकारं कामं क्रोधमनार्यताम् ।
द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत् ॥ १७ ॥
नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्मो व्यवस्थितः ।
निरिन्द्रिया ह्यमन्त्राश्च स्त्रियो ऽनृतमिति स्थितिः ॥ १८ ॥
तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि ।
स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतिम् ॥ १९ ॥
यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता ।
तन्मे रेतः पिता वृङ्क्तामित्यस्यैतन्निदर्शनम् ॥ २० ॥
ध्यायत्यनिष्टं यत्किं चित्पाणिग्राहस्य चेतसा ।
तस्यैष व्यभिचारस्य निह्नवः सम्यगुच्यते ॥ २१ ॥
यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि ।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा ॥ २२ ॥
अक्षमाला वसिष्ठेन संयुक्ताधमयोनिजा ।
शार्ङ्गी च मन्दपालेन जगामाभ्यर्हणीयताम् ॥ २३ ॥
एताश्चान्याश्च लोके ऽस्मिन्नपकृष्टप्रसूतयः ।
उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर्भर्तृगुणैः शुभैः ॥ २४ ॥
एषोदिता लोकयात्रा नित्यं स्त्रीपुंसयोः शुभा ।
प्रेत्येह च सुखोदर्कान्प्रजाधर्मान्निबोधत ॥ २५ ॥
प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः ।
स्त्रियः श्रियश्च गेहेषु न विशेषो ऽस्ति कश्चन ॥ २६ ॥
उत्पादनमपत्यस्य जातस्य परिपालनम् ।
प्रत्यर्थं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम् ॥ २७ ॥

अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा ।
दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्च ह ॥ २८ ॥
पतिं या नाभिचरति मनोवाग्देहसंयता ।
सा भर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते ॥ २९ ॥
व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम् ।
शृगालयोनिं चाप्नोति पापरोगैश्च पीड्यते ॥ ३० ॥
पुत्रं प्रत्युदितं सद्भिः पूर्वजैश्च महर्षिभिः ।
विश्वजन्यमिमं पुण्यमुपन्यासं निबोधत ॥ ३१ ॥
भर्तुः पुत्रं विजानन्ति श्रुतिद्वैधं तु कर्तरि ।
आहुरुत्पादकं के चिदपरे क्षेत्रिणं विदुः ॥ ३२ ॥
क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान् ।
क्षेत्रबीजसमायोगात्संभवः सर्वदेहिनाम् ॥ ३३ ॥
विशिष्टं कुत्र चिद्बीजं स्त्रीयोनिस्त्वेव कुत्र चित् ।
उभयं तु समं यत्र सा प्रसूतिः प्रशस्यते ॥ ३४ ॥
बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते ।
सर्वभूतप्रसूतिर्हि बीजलक्षणलक्षिता ॥ ३५ ॥
यादृशं तूप्यते बीजं क्षेत्रे कालोपपादिते ।
तादृग्रोहति तत्तस्मिन्बीजं स्वैर्व्यञ्जितं गुणैः ॥ ३६ ॥
इयं भूमिर्हि भूतानां शाश्वती योनिरुच्यते ।
न च योनिगुणान्कांश्चिद्बीजं पुष्यति पुष्टिषु ॥ ३७ ॥
भूमावप्येककेदारे कालोप्तानि कृषीवलैः ।
नानारूपाणि जायन्ते बीजानीह स्वभावतः ॥ ३८ ॥
व्रीहयः शालयो मुद्गास्तिला माषास्तथा यवाः ।
यथाबीजं प्ररोहन्ति लशुनानीक्षवस्तथा ॥ ३९ ॥
अन्यदुप्तं जातमन्यदित्येतन्नोपपद्यते ।
उप्यते यद्धि यद्बीजं तत्तदेव प्ररोहति ॥ ४० ॥
तत्प्राज्ञेन विनीतेन ज्ञानविज्ञानवेदिना ।
आयुष्कामेन वप्तव्यं न जातु परयोषिति ॥ ४१ ॥
अत्र गाथा वायुगीताः कीर्तयन्ति पुराविदः ।
यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे ॥ ४२ ॥
नश्यतीषुर्यथा क्षिप्तः खे विद्धमनुविध्यतः ।
तथा नश्यति वै क्षिप्रं बीजं परपरिग्रहे ॥ ४३ ॥

प्रोषितो धर्मकार्यार्थं प्रतीक्ष्यो ऽष्टौ नरः समाः ।
विद्यार्थं षड्यशोऽर्थं वा कामार्थं त्रींस्तु वत्सरान् ॥ ७६ ॥
संवत्सरमुदीक्षेत द्विषाणां योषितं पतिः ।
ऊर्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत् ॥ ७७ ॥
अतिक्रामेत्प्रमत्तं या मत्तं रोगार्तमेव वा ।
सा त्रीन्मासान्परित्याज्या विभूषणपरिच्छदा ॥ ७८ ॥
उन्मत्तं पतितं क्लीबमबीजं पापरोगिणम् ।
न त्यागो ऽस्ति द्विषाणाया न च दायापवर्तनम् ॥ ७९ ॥
मद्यपासत्यवृत्ता च प्रतिकूला च या भवेत् ।
व्याधिता चाधिवेत्तव्या हिंस्रार्थघ्नी च सर्वदा ॥ ८० ॥
वन्ध्याष्टमे ऽधिवेद्याब्दे दशमे तु मृतप्रजा ।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥ ८१ ॥
या रोगिणी स्यात्तु हिता संपन्ना चैव शीलतः ।
सानुज्ञाप्याधिवेत्तव्या नावमान्या च कर्हि चित् ॥ ८२ ॥
अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृहात् ।
सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसंनिधौ ॥ ८३ ॥
प्रतिषिद्धा पिबेद्या तु मद्यमभ्युदयेष्वपि ।
प्रेक्षासमाजं गच्छेद्वा सा दण्ड्या कृष्णलानि षट् ॥ ८४ ॥
यदि स्वाश्चापराश्चैव विन्देरन्योषितो द्विजाः ।
तासां वर्णक्रमेण स्याज्ज्यैष्ठ्यं पूजा च वेश्म च ॥ ८५ ॥
भर्तुः शरीरशुश्रूषां धर्मकार्यं च नैत्यकम् ।
स्वा स्वैव कुर्यात्सर्वेषां नास्वजातिः कथं चन ॥ ८६ ॥
यस्तु तत्कारयेन्मोहात्सजात्या स्थितयान्यया ।
यथा ब्राह्मणचण्डालः पूर्वदृष्टस्तथैव सः ॥ ८७ ॥
उत्कृष्टायाभिरूपाय वराय सदृशाय च ।
अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि ॥ ८८ ॥
काममा मरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि ।
न चैवैनां प्रयच्छेत गुणहीनाय कर्हि चित् ॥ ८९ ॥
त्रीणि वर्षाण्युपासीत कुमार्यृतुमती सती ।
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥ ९० ॥
अदीयमाना भर्तारमधिगच्छेद्यदि स्वयम् ।
नैनः किं चिदवाप्नोति न च यं साधिगच्छति ॥ ९१ ॥

अलंकारं नाददीत पित्र्यं कन्या स्वयंवरा ।
मातृकं भ्रातृदत्तं वा स्तेयं स्याद्यदि तं हरेत् ॥ ९२ ॥
पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन् ।
स हि स्वाम्यादतिक्रामेदृतूनां प्रतिरोधनात् ॥ ९३ ॥
त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम् ।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥ ९४ ॥
देवदत्तां पतिर्भार्यां विन्देतानिच्छयात्मनः ।
तां साध्वीं बिभृयान्नित्यं देवानां प्रियमाचरन् ॥ ९५ ॥
प्रजनार्थं स्त्रियः सृष्टाः संतानार्थं च मानवाः ।
तस्मात्साधारणो धर्मः श्रुतौ पत्न्या सहोदितः ॥ ९६ ॥
कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्यानुमन्यते ॥ ९७ ॥
आददीत न शूद्रोऽपि शुल्कं दुहितरं ददत् ।
शुल्कं हि गृह्णन्कुरुते छन्नं दुहितृविक्रयम् ॥ ९८ ॥
एतत्तु न परे चक्रुर्नापरे जातु साधवः ।
यदन्यस्याभ्यनुज्ञाय पुनरन्यस्य दीयते ॥ ९९ ॥
नानुशुश्रुम जात्वेतत्पूर्वेष्वपि हि जन्मसु ।
शुल्कसंज्ञेन मूल्येन छन्नं दुहितृविक्रयम् ॥ १०० ॥
अन्योऽन्यस्याव्यभीचारो भवेदामरणान्तिकः ।
एष धर्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः ॥ १०१ ॥
तथा नित्यं यतेयातां स्त्रीपुंसौ तु कृतक्रियौ ।
यथा नाभिचरेतां तौ वियुक्ताावितरेतरम् ॥ १०२ ॥
एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः ।
आपद्यपत्यप्राप्तिश्च दायभागं निबोधत ॥ १०३ ॥
ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम् ।
भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः ॥ १०४ ॥
ज्येष्ठ एव तु गृह्णीयात्पित्र्यं धनमशेषतः ।
शेषास्तमुपजीवेयुर्यथैव पितरं तथा ॥ १०५ ॥
ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः ।
पितॄणामनृणश्चैव स तस्मात्सर्वमर्हति ॥ १०६ ॥
यस्मिन्नृणं संनयति येन चानन्त्यमश्नुते ।
स एव धर्मजः पुत्रः कामजानितरान्विदुः ॥ १०७ ॥

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्[1] ।
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ॥५२॥
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ।
पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा ॥५३॥
दशपूरुषविख्याताच्छ्रोत्रियाणां महाकुलात् ।
स्फीतादपि न सञ्चारिरोगदोषसमन्वितात् ॥५४॥
एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः ।
यत्नात्परीक्षितः पुंस्त्वे युवा धीमान् जनप्रियः ॥५५॥
यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः ।
न तन्मम मतं यस्मात्तत्रात्मा जायते स्वयम् ॥५६॥
तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम् ।
ब्राह्मणक्षत्रियविशां भार्याः स्वा शूद्रजन्मनः ॥५७॥
ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता ।
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥५८॥
यज्ञस्थायर्त्विजे दैव आदायार्षस्तु गोद्वयम् ।
चतुर्दश प्रथमजः पुनात्युत्तरजस्तु षट् ॥५९॥
इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने ।
सकायः पावयेत्तज्जः षट् षड्वंश्यान्सहात्मना ॥६०॥
आसुरो द्रविणादानाद्गान्धर्वः समयान्मिथः ।
राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात् ॥६१॥
पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरम् ।
वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः ॥६२॥
पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥६३॥

हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम् ॥७०॥
सोमः शौचं ददौ स्त्रीणां गन्धर्वश्च शुभां गिरम् ।
पावकः सर्वमेध्यत्वं मेध्या वै योषितो ह्यतः ॥७१॥
व्यभिचारादृतौ शुद्धिर्गर्भे त्यागो विधीयते ।
गर्भभर्तृवधादौ च तथा महति पातके ॥७२॥
सुरापी व्याधिता धूर्ता वन्ध्यार्थघ्न्यप्रियंवदा ।
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ॥७३॥
अधिविन्ना तु भर्तव्या महदेनो ऽन्यथा भवेत् ।
यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्धते ॥७४॥
मृते जीवति वा पत्यौ या नान्यमुपगच्छति ।
सेह कीर्तिमवाप्नोति मोदते चोमया सह ॥७५॥
आज्ञासम्पादिनीं दक्षां वीरसूं प्रियवादिनीम् ।
त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः ॥७६॥
स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः ।
आशुद्धेः सम्प्रतीक्ष्यो हि महापातकदूषितः ॥७७॥
लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः ।
यस्मात्तस्मात्स्त्रियः सेव्या कर्तव्याश्च सुरक्षिताः ॥७८॥

भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः ।
बन्धुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः ॥८२॥
संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी ।
कुर्याच्छ्वशुरयोः पादवन्दनं भर्तृतत्परा ॥८३॥
क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् ।
हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ॥८४॥
रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्धके ।
अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित्स्त्रियाः ॥८५॥
पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः ।
हीना न स्याद्विना भर्त्रा गर्हणीयान्यथा भवेत् ॥८६॥
पतिप्रियहिते युक्ता स्वाचारा विजितेन्द्रिया ।
सेह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम् ॥८७॥
सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् ।
सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा ॥८८॥

सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः ।
अनिन्द्येषु विवाहेषु पुत्राः सन्तानवर्धनाः ॥९०॥

कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही ।
दायकालाहृते वापि श्रौतं वैतानिकाग्निषु ॥९७॥
शरीरचिन्तां निर्वर्त्य कृतशौचविधिर्द्विजः ।
प्रातः सन्ध्यामुपासीत दन्तधावनपूर्वकम् ॥९८॥
हुत्वाग्नीन्सूर्यदैवत्याञ्जपेन्मन्त्रान्समाहितः ।
वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च ॥९९॥
उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये ।
स्नात्वा देवान्पितॄंश्चैव तर्पयेदर्चयेत्तथा ॥१००॥
वेदाथर्वपुराणानि सेतिहासानि शक्तितः ।
जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत् ॥१०१॥
बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः ।
भूतपित्रमरब्रह्ममनुष्याणां महामखाः ॥१०२॥
देवेभ्यश्च हुतादन्नाच्छेषाद्भूतबलिं हरेत् ।
अन्नं भूमौ श्वचाण्डालवायसेभ्यश्च निक्षिपेत् ॥१०३॥
अन्नं पितृमनुष्येभ्यो देयमप्यन्वहं जलम् ।
स्वाध्यायं चान्वहं कुर्यान्न पचेदन्नमात्मने ॥१०४॥

बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः ।
सम्भोज्यातिथिभृत्यांश्च दम्पत्योः शेषभोजनम् ॥१०५॥
आपोशानेनोपरिष्टादधस्तादश्नता तथा ।
अनग्नममृतं चैव कार्यमन्नं द्विजन्मना ॥१०६॥
अतिथित्वेन वर्णानां देयं शक्त्यानुपूर्वशः ।
अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैः ॥१०७॥
सत्कृत्य भिक्षवे भिक्षा दातव्या सुव्रताय च ।
भोजयेच्चागतान्काले सखिसम्बन्धिबान्धवान् ॥१०८॥
महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत् ।
सत्क्रियां चासनं स्वादु भोजनं सूनृतं वचः ॥१०९॥
प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्यपार्थिवाः ।
प्रियो विवाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनः ॥११०॥
अध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः ।
मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः ॥१११॥
परपाकरुचिर्न स्यादनिन्द्यामन्त्रणादृते ।
वाक्पाणिपादचापल्यं वर्जयेच्चातिभोजनम् ॥११२॥
अतिथिं श्रोत्रियं तृप्तमासीमान्तमनुव्रजेत् ।
अहःशेषं सहासीन शिष्टैरिष्टैश्च बन्धुभिः ॥११३॥

उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च ।
भृत्यैः परिवृतो भुक्त्वा नातितृप्त्याथ संविशेत् ॥११४॥
ब्राह्मे मुहूर्ते उत्थाय चिन्तयेदात्मनो हितम् ।
धर्मार्थकामान्स्वे काले यथाशक्ति न हापयेत् ॥११५॥
विद्याकर्मवयोबन्धुवित्तैर्मान्या यथाक्रमम् ।
एतैः प्रभूतैः शूद्रो ऽपि वार्धके मानमर्हति ॥११६॥
वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणाम् ।
पन्था देयो नृपस्तेषां मान्यः स्नातस्तु भूपतेः ॥११७॥
इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च ।
प्रतिग्रहो ऽधिको विप्रे याजनाध्यापने तथा ॥११८॥
प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम् ।
कुसीदं कृषिवाणिज्यं पाशुपाल्यं विशः स्मृतम् ॥११९॥
शूद्रस्य द्विजशुश्रूषा तयाजीवन्वणिग्भवेत् ।
शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन् ॥१२०॥
भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियारतः ।
नमस्कारेण मन्त्रेण पञ्च यज्ञान्न हापयेत् ॥१२१॥
अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनम् ॥१२२॥

# कौटिलीयम् अर्थशास्त्रम्

पण्याध्यक्षः स्थलजलजानां नानाविधानां पण्यानां स्थलपथ-वारिपथोपयातानां सारफल्ग्वर्घान्तरं प्रियाप्रियतां च विद्यात्। तथा विक्षेपसंक्षेपक्रयविक्रयप्रयोगकालान्।

यच्च पण्यं प्रचुरं स्यात् तदेकीकृत्यार्घमारोपयेत्। प्राप्तेऽर्घे वार्घान्तरं कारयेत्।

स्वभूमिजानां राजपण्यानामेकमुखं व्यवहारं स्थापयेत्, परभूमिजानामनेकमुखम्। उभयं च प्रजानामनुग्रहेण विक्रापयेत्। स्थूलमपि च लाभं प्रजानामौपघातिकं वारयेत्। अजस्रपण्यानां कालोपरोधं सङ्कुलदोषं वा नोत्पादयेत्।

बहुमुखं वा राजपण्यं वैदेहकाः कृतार्घं विक्रीणीरन्। छेदानुरूपं च वैधरणं दद्युः।

षोडशभागो मानव्याजी। विंशतिभागस्तुलामानम्। गण्यपण्यानामेकादशभागः।

परभूमिजं पण्यमनुग्रहेणावाहयेत्। नाविकसार्थवाहेभ्यश्च परिहारमायतिक्षमं दद्यात्। अनभियोगश्चार्थेष्वागन्तूनामन्यत्र सभ्योपकारिभ्यः।

पण्याधिष्ठातारः पण्यमूल्यमेकमुखं काष्ठद्रोण्यामेकच्छिद्रापिधानायां निदध्युः। अह्नश्चाष्टमे भागे पण्याध्यक्षस्यार्पयेयुः — इदं विक्रीतमिदं शेषमिति। तुलामानभाण्डकं चार्पयेयुः। इति स्वविषये व्याख्यातम्।

परविषये तु — पण्यप्रतिपण्ययोरर्घं मूल्यं च आगमय्य शुल्कवर्तन्यातिवाहिकगुल्मतरदेयभक्तभाटकव्ययशुद्धमुदयं पश्येत्। असत्युदये भाण्डनिर्वहणेन पण्यप्रतिपण्यार्घेण वा लाभं पश्येत्। ततः

सारपादेन स्थलव्यवहारमध्वना क्षेमेण प्रयोजयेत् । अटव्यन्तपालपुर-राष्ट्रमुख्यैश्च प्रतिसंसर्गं गच्छेदनुग्रहार्थम् ।

आपदि सारमात्मानं वा मोक्षयेत् । आत्मनो वा भूमिमप्राप्तः सर्वदेयविशुद्धं व्यवहरेत् ।

वारिपथे च यानभाटकपथ्यदनपण्यप्रतिपण्यार्घप्रमाणयात्राकाल-भयप्रतीकारपण्यपत्तनचारित्राण्युपलभेत ।

नदीपथे च विज्ञाय व्यवहारं चरित्रतः ।
यतो लाभस्ततो गच्छेदलाभं परिवर्जयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
षोडशोऽध्यायः पण्याध्यक्षः,
आदितः सप्तत्रिंशः ॥

गजमुद्रापरिवर्तने नामकृते वा सपादपणिकं वहनं दापयेत् ।

ध्वजमूलोपस्थितस्य प्रमाणमर्घं च वैदेहकाः पण्यस्य ब्रूयुः एतत्प्रमाणेनार्घेण पण्यमिदं कः क्रेतेति । त्रिरुद्घोषितमर्थिभ्यो दद्यात् । क्रेतृसङ्घर्षे मूल्यवृद्धिः । सशुल्का कोशं गच्छेत् ।

शुल्कभयात् पण्यप्रमाणं मूल्यं वा हीनं ब्रुवतस्तदतिरिक्तं राजा हरेत । शुल्कमष्टगुणं वा दद्यात् ।

तदेव निविष्टपण्यस्य भाण्डस्य हीनप्रतिवर्णकेनार्घापकर्षणे सार-भाण्डस्य फल्गुभाण्डेन प्रतिच्छादने च कुर्यात् ।

प्रतिक्रेतृभयाद् वा पण्यमूल्यादुपरि मूल्यं वर्धयतो मूल्यवृद्धिं राजा हरेद् द्विगुणं वा शुल्कं कुर्यात् ।

शुल्काध्यक्षः शुल्कशालां ध्वजं च प्राङ्मुखम् उदङ्मुखं वा महाद्वाराभ्याशे निवेशयेत् ।

शुल्कादायिनश्चत्वारः पञ्च वा सार्थोपयातान् वणिजो लिखेयुः — के कुतस्त्याः कियत्पण्याः क्व चाभिज्ञानमुद्रा वा कृतेति ।

अमुद्राणामत्ययो देयद्विगुणः ।

कूटमुद्राणां शुल्काष्टगुणो दण्डः ।

भिन्नमुद्राणामत्ययो घटिकाः स्थाने स्थानम् ।

तदेवाष्टगुणमध्यक्षस्यच्छादयतः ।

तस्माद् विक्रयः पण्यानां धृतो मितो गणितो वा कार्यः, तर्कः फल्गुभाण्डानामानुग्राहिकाणां च ।

ध्वजमूलमतिक्रान्तानां चाकृतशुल्कानां शुल्कादष्टगुणो दण्डः । पथिकोत्पथिकास्तद् विद्युः ।

वैवाहिकमन्वायनमौपायनिकं यज्ञकृत्यप्रसवनैमित्तिकं देवेज्याचौलोपनयनगोदानव्रतदीक्षणादिषु क्रियाविशेषेषु भाण्डमुच्छुल्कं गच्छेत् ।

अन्यथावादिनः स्तेयदण्डः ।

कृतशुल्केनाकृतशुल्कं निर्वाहयतो द्वितीयमेकमुद्रया भित्त्वा पुटमपहरतो वैदेहकस्य तच्च तावच्च दण्डः ।

शुल्कस्थानाद् गोमयपलालं प्रमाणं कृत्वापहरत उत्तमः साहसदण्डः ।

शस्त्रवर्मकवचलोहरथरत्नधान्यपशूनामन्यतमानिर्वाह्यं निर्वाहयतो यथावघोषितो दण्डः पण्यनाशश्च ।

तेषामन्यतमस्यानयने बहिरेवोच्छुल्को विक्रयः ।

अन्तपालः सपादपणिकां वर्तनीं गृह्णीयात् पण्यवहनस्य, पणि-कामेकखुरस्य, पशूनामर्धपणिकां, क्षुद्रपशूनां पादिकाम्, अंसभारस्य माषिकाम्। नष्टापहृतं च प्रतिविदध्यात्।

वैदेश्यं सार्थं कृतसारफल्गुभाण्डविचयनमभिज्ञानं मुद्रां च दत्त्वा प्रेषयेदध्यक्षस्य।

वैदेहकव्यञ्जनो वा सार्थप्रमाणं राज्ञः प्रेषयेत्। तेन प्रदेशेन राजा शुल्काध्यक्षस्य सार्थप्रमाणमुपदिशेत् सर्वज्ञख्यापनार्थम्। ततः सार्थ-मध्यक्षोऽभिगम्य ब्रूयात् — इदममुष्यामुष्य च सारभाण्डं फल्गुभाण्डं च न निगूहितव्यम्. एष राज्ञः प्रभावः इति।

निगूहतः फल्गुभाण्डं शुल्काष्टगुणो दण्डः, सारभाण्डं सर्वा-पहारः।

राष्ट्रपीडाकरं भाण्डमुच्छिन्द्यादफलं च यत्।
महोपकारमुच्छुल्कं कुर्याद् बीजं तु दुर्लभम्॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकविंशोऽध्यायः शुल्काध्यक्षः,
आदितो द्विचत्वारिंशः॥

शुल्कव्यवहारः।

बाह्यमाभ्यन्तरं चातिथ्यं, निष्क्राम्यं प्रवेश्यं च शुल्कम्।

प्रवेश्यानां मूल्यपञ्चभागः।

पुष्पफलशाकमूलकन्दवल्लिक्यबीजशुष्कमत्स्यमांसानां षड्भागं गृह्णीयात्।

शङ्खवज्रमणिमुक्ताप्रवालहाराणां तज्जातपुरुषैः कारयेत् कृत-कर्मप्रमाणकालवेतनफलनिष्पत्तिभिः।

क्षौमदुकूलक्रिमितानकङ्कटहरितालमनःशिलाहिङ्गुलुकलोहवर्ण

धातूनां चन्दनागुरुकटुककिण्वावराणां सुरादन्ताजिनक्षौमदुकूलनिकरास्तरणप्रावरणक्रिमिजातानामजैलकस्य च दशभागः, पञ्चदशभागो वा ।

वस्त्रचतुष्पदद्विपदसूत्रकार्पासगन्धभैषज्यकाष्ठवेणुवल्कलचर्ममृद्भाण्डानां धान्यस्नेहक्षारलवणमद्यपक्वान्नादीनां च विंशतिभागः पञ्चविंशतिभागो वा ।

द्वारादेयं शुल्कपञ्चभागः । आनुग्राहिकं वा यथादेशोपकारं स्थापयेत् ।

जातिभूमिषु च पण्यानामविक्रयः ।

खनिभ्यो धातुपण्यादाने षट्छतमत्ययः ।

पुष्पफलवाटेभ्यः पुष्पफलादाने चतुष्पञ्चाशत्पणो दण्डः ।

षण्डेभ्यः शाकमूलकन्दादाने पादोनं द्विपञ्चाशत्पणो दण्डः ।

क्षेत्रेभ्यः सर्वसस्यादाने त्रिपञ्चाशत्पणः, पणोऽध्यर्धपणश्च सीतात्ययः ।

अतो नवपुराणानां देशजातिचरित्रतः ।
पण्यानां स्थापयेच्छुल्कमत्ययं चापकारतः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वाविंशोऽध्यायः शुल्कव्यवहारः
आदितस्त्रिचत्वारिंशः ॥

# Раздел 3

# Народная повествовательная литература

Среди произведений древней и средневековой индийской литературы сборники «Панчатантра» и «Хитопадеща» занимают особое место по тому влиянию, которое они оказали на литературу в Индии и в странах Востока и Запада.

«Панчатантра» (pañcatantra) — «Пять книг» и «Хитопадеща» (hitopadeça) — «Доброе наставление» — сложились в результате развития разных жанров литературы древней Индии и длительного существования их в изустной передаче.

Сборник «Панчатантра» сложился в III–IV веках н. э. Первоначальный текст «Панчатантры» не сохранился, имеется несколько его версий (редакций). Наиболее ранняя — кашмирская версия Tantrākhyāyika и ее более поздний вариант. Южноиндийская версия текста близка той, что легла в основу сборника «Хитопадеща». Известны также джайнские версии. Одна из них относится к XI в. и известна у европейских ученых под названием textus simplicior. Итогом исследования более ранних версий, проделанного в XII веке Пурнабандхой из Гуджарата, является текст, в основу которого легли первая джайнская версия и кашмирский текст Tantrākhyāyika. В европейской науке эта версия называется textus ornatior.

До настоящего времени «Панчатантра» и «Хитопадеща» переиздаются в Индии и служат предметом тщательного комментирования и переводов на современные индийские языки. Таково, например, одно из недавних изданий «Панчатантры», подготовленное доктором Судхакаром Малавия (sudhākara mālavīya) в 1994 г. В предлагаемой Книге использованы в основном тексты этого издания. Там, где в издании С. Малавия часть текста отсутствует (как, например, рассказ о двух попугаях из I книги), нами используется textus ornatior.

Источником для «Панчатантры» и «Хитопадещи» явились «Законы Ману» (Manusmṛti)) и, позже, Kautilyaçāstra, см. раздел II Книги. «Панчатантра» — это изложение науки разумного поведения для правителей. В основе поучений для правителей лежат три постулата.

Правитель должен был прежде всего знать в системе обучения три части — dharma (нравственный закон), artha (житейская польза) и kāma (любовь). Правила житейской и государственной мудрости, соображения выгоды, практической пользы, здравого смысла являются главными и иллюстрируются в сборниках рассказами, баснями, притчами дидактического характера.

Все части «Панчатантры» объединяет общее «Вступление», в котором сообщает о мудреце Вишнушармане, создавшем «Панчатантру» в поучение царским сыновьям, «о вратившим лик свой от науки». «Вступление» (с некоторыми сокращениями) включе в нашу Книгу.

«Панчатантра», как явствует из названия, состоит из пяти книг. В первой книге «Разъединение друзей» (mitrabhedaḥ) — действует лев по имени Пингалока (piṅ galok и бык Сандживака (saṁjīvaka), дружбу которых разрушает коварный шакал.

Вторая книга — «Приобретение друзей» (mitrasaṁprāptiḥ). Это рассказ о вороне, мы ши, газели и черепахе. Несмотря на слабость каждой из них, они действуют сообща и вме сте оказываются в силах противостоять встречающимся на их пути трудностям.

Третья книга — «Рассказ о воронах и совах» (kākolūkiyam) — повествует о способа одерживать верх при вражде, о разных приемах ведения войн.

Четвертая книга — «Утрата приобретенного» (labdhapraṇāçām) — рассказ о ловкой обезьяне по имени Рактамукха (raktamukha) и о доверчивом дельфине Караламукх (karālamukha) и к чему их приводят эти черты характера.

Пятая книга — «Безрассудные поступки» (aparokşitakārakam) — композиционно слож нее первых четырех книг: ее обрамляет тройное повествование.

Композиция всего сборника в целом очень сложна. Перед нами жанр обрамленной по вести, характерный для индийской повествовательной литературы. Каждая из книг «Пан чатантры» является обрамлением для вставных рассказов. Действующие лица обрамляю щей части сборника (бык, шакал, обезьяна и др.) рассказывают друг другу назидательны истории. Каждый рассказ предваряет стихотворное двустишие с упоминанием действу щего лица или события, подтверждающего справедливость высказанной мысли. Заинте ресованный слушатель спрашивает: «как это?» (katham etad), далее следует — «он сказал (sa āhā или so 'bravīt) и начинается повествование. Оно заканчивается словами «Поэто му я и говорю...» (ato 'ham bravīmi) и далее повторяется начало двустишия и «так далее (ityādi), охватывающего стихотворения. Этот прием, называемый kathāsaṁgraha — чер дование прозы и стихотворного текста — отличительная черта древнеиндийской литер турной традиции.

При несомненной дидактической направленности сборника содержание «Панчатан тры» оказывается шире. Перед нами развертываются сцены индийской жизни, проход череда многочисленных действующих лиц. В рассказах действуют и люди, и животны каждый персонаж является носителем определенной черты характера (сила, хитрость, к варство и др.). Нередко за персонажем-животным угадывается тип человека. В расска

отсутствует портретная характеристика действующих лиц, что является чертой так наз ваемого «наивного реализма», характерного для устного народного творчества.

Сборник «Хитопадеща» относится к X–XII векам н. э. и возник на основе одной из ве сий «Панчатантры» (видимо, южноиндийской). Автором этого сборника считается Нар яна, о котором кроме имени ничего неизвестно.

«Хитопадеща» состоит из четырех книг. Первая и вторая соответствуют второй и перво книгам «Панчатантры», третья и четвертая создавались на основе III книги «Панчатан тры» (но здесь — война между гусями и павлинами). Кое-что было добавлено из I и книг «Панчатантры». Ряд рассказов «Хитопадещи» не имеет аналогий с текстом «Панча тантры».

Сборник «Хитопадеща» композиционно подобен «Панчатантре»: в нем тоже обрам ленные повести, чередование прозаического и стихотворного текстов, рассказчиками вы- ступают шакалы Каратака, Даманака и другие, тот же способ представления действующих лиц.

Язык сборников «Панчатантра» и «Хитопадеща» является одним из лучших образцов классического санскрита, обладающего рядом языковых особенностей (например множе- ство именных предложений, сложных слов и др.). Лексика сборников интересна обилием синонимов в названиях животных, спецификой образования имен собственных. Синтак- сис дает образцы построения живой диалогической речи, неизвестной языку эпоса и ин- дийским научным трактатам.

О «Панчатантре» как литературном памятнике Индии, о ее редакциях и о судьбе за пре- делами Индии можно прочитать на русском языке в книге «Панчатантра. Избранные рассказы», перевод[1] с древнеиндийского, предисловие и примечания Р. О. Шор. М., 1930 (стр. 7 и сл.) и в статье Вяч. Вс. Иванова «Панчатантра» (приложение к переводу на рус- ский язык. Издание АН СССР. М., 1958, стр. 307–323).

Краткие сведения о «Панчатантре» и «Хитопадеще» приводятся в книге П. А. Гринце- ра «Древнеиндийская проза». М., 1963, а также в «Предисловии» А. Я. Сыркина к книге «Повести, сказки, притчи древней Индии». М., 1964. Указанные работы содержат также литературу вопроса на иностранных языках.

---

[1]Следует отметить, что Р. О. Шор интересовали только те рассказы из «Панчатантры», которые имеют аналогию в западноевропейской литературе Средних веков и Возрождения.

श्रीविष्णुशर्मविरचितम्

# पञ्चतन्त्रम्

## पञ्चतन्त्रे कथामुखम्

तद्यथाऽनुश्रूयते—अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम्। तत्र 'सकलार्थिकल्पद्रुमः प्रवरमुकुटमणिमरीचिमञ्जरीचर्चितचरणयुगलः 'सकलकलापारंगतोऽमरशक्तिर्नाम राजा बभूव। तस्य त्रयः पुत्राः 'परमदुर्मेधसो बहुशक्तिरुग्रशक्तिरनन्तशक्तिश्चेति नामानो बभूवुः। अथ राजा ताञ्शास्त्रविमुखानालोक्य सचिवानाहूय प्रोवाच—भोः, ज्ञातमेतद्भवद्भिर्यन्ममैते पुत्राः शास्त्रविमुखा विवेकरहिताश्च। तदेतान्पश्यतो मे महदपि राज्यं न सौख्यमावहति।

अथवा साध्विदमुच्यते—

किं तया क्रियते धेन्वा या न सूते न दुग्धदा।<br>
कोऽर्थः पुत्रेण जातेन यो न विद्वान्न भक्तिमान्॥ ६ ॥

तदेतेषां यथा 'बुद्धिप्रकाशो भवति तथा कोऽप्युपायोऽनुष्ठीयताम्। अत्र च मद्दत्तां वृत्तिं भुञ्जानानां पण्डितानां पञ्चशती तिष्ठति। 'ततो यथा मम मनोरथाः सिद्धिं यान्ति तथाऽनुष्ठीयताम्' इति। तत्रैकः प्रोवाच-'देव, द्वादशभिर्वर्षैर्व्याकरणं 'श्रूयते। ततो धर्मशास्त्राणि मन्वा-

दीनि, अर्थशास्त्राणि चाणक्यादीनि, कामशास्त्राणि वात्स्यायनादीनि। एवं च ततो धर्मार्थकामशास्त्राणि ज्ञायन्ते। ततः' प्रतिबोधनं भवति।' अथ तन्मध्यतो सुमतिर्नाम सचिवः प्राह—"अशाश्वतोऽयं 'जीवितव्यविषयः। प्रभूतकालज्ञेयानि शब्दशास्त्राणि। तत्संक्षेपमात्रं शास्त्रं किंचिदेतेषां प्रबोधनार्थं चिन्त्यतामिति। उक्तं च यतः—

अनन्तपारं किल शब्दशास्त्रं स्वल्पं तथाऽऽयुर्बहवश्च विघ्नाः।
सारं ततो ग्राह्यमपास्य फल्गु हंसैर्यथा क्षीरमिवाम्बुमध्यात्॥ ९॥

तदत्रास्ति विष्णुशर्मा नाम ब्राह्मणः सकलशास्त्रपारंगम'श्छात्रसंसदि लब्धकीर्तिः। तस्मै समर्पयतु एतान्। स नूनं द्राक्प्रबुद्धान् करिष्यति' इति। स राजा तदाकर्ण्य विष्णुशर्माणमाहूय प्रोवाच— भो भगवन्, मदनुग्रहार्थमेतानर्थशास्त्रं प्रति द्राग्यथा'नन्यसदृशान्विदधासि, तथा कुरु। तदाहं त्वां 'शासनशतेन योजयिष्यामि।' अथ विष्णुशर्मा तं राजानमूचे— देव, श्रूयतां मे तथ्यवचनम्। नाहं विद्याविक्रयं शासनशतेनापि करोमि। पुनरेतांस्तव पुत्रान्मासषट्केन यदि नीतिशास्त्रज्ञान्न करोमि, ततः स्वनामत्यागं करोमि। किं बहुना?

अथासौ राजा तां ब्राह्मणस्यासंभाव्यां प्रतिज्ञां श्रुत्वा ससचिवः प्रहृष्टो विस्मयान्वितस्तस्मै सादरं तान्कुमारान्समर्प्य परां 'निर्वृत्तिमाजगाम। विष्णुशर्मणापि तानादाय तदर्थं' मित्रभेद-मित्रप्राप्ति-काकोलूकीय लब्धप्रणाश-अपरीक्षितकारकाणि चेति पञ्चतन्त्राणि रचयित्वा पाठितास्ते राजपुत्राः। तेऽपि तान्यधीत्य मासषट्केन 'यथोक्ताः संवृत्ताः। ततः प्रभृत्येतत्पञ्चतन्त्रकं नाम नीतिशास्त्रं बालावबोधनार्थं भूतले प्रवृत्तम्'। किं बहुना—

अधीते य इदं नित्यं नीतिशास्त्रं शृणोति च।
न पराभवमाप्नोति शक्रादपि कदाचन॥ १०॥

॥ इति कथामुखम् ॥

## अथ मित्रभेदः

### [ प्रथमं तन्त्रम् ]

अथातः प्रारभ्यते मित्रभेदो नाम प्रथमं तन्त्रम् ।

यो न पूजयते गर्वादुत्तमाधममध्यमान् ।
भूपसंमानमान्योऽपि भ्रश्यते दन्तिलो यथा' ॥ १४१ ॥

संजीवक आह—'कथमेतत् ?' सोऽब्रवीत्—

### नृपति-दन्तिल-गोरम्भककथा

अस्त्यत्र धरातले वर्धमानं नाम नगरम् । तत्र दन्तिलो नाम 'नानाभाण्डपतिः सकलपुरनायकः प्रतिवसति स्म । तेन पुरकार्यं नृपकार्यं च कुर्वता तुष्टिं नीतास्तत्पुरवासिनो लोका नृपतिश्च । किं बहुना ? न कोऽपि तादृक्केनापि चतुरो दृष्टो नापि श्रुतो वेति । अथवा साधु चेदमुच्यते—

नरपतिहितकर्ता द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः ।
इति महति विरोधे वर्तमाने समाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता ॥ १४२ ॥

अथैवं गच्छति काले दन्तिलस्य कदाचिद्विवाहः संप्रवृत्तः । तत्र तेन सर्व पुरनिवासिनो 'राजसंनिधिलोकाश्च सम्मानपुरःसरमामन्त्र्य भोजिता वस्त्रादिभिः सत्कृताश्च । ततो विवाहानन्तर राजा 'सान्तःपुरः स्वगृहमानीयाभ्यर्चितः । अथ तस्य नृपतेर्गृहसम्मार्जनकर्ता गोरम्भो नाम राजसेवको गृहायातोऽपि 'तेनानुचितस्थान उपविष्टोऽवज्ञयाऽर्धचन्द्रं दत्वा निःसारितः सोऽपि ततः प्रभृति निश्वसन्नपमानान्न रात्रावप्यधिशेते । 'कथं मया तस्य भाण्डपतेः राजप्रसादहानिः कर्त्तव्या इति चिन्तयन्नास्ते । अथवा किमनेन वृथा शरीरशोषणेन ? न किञ्चिन्मया तस्यापकर्त्तुं शक्यमिति । अथवा साध्विदमुच्यते—

यो ह्यपकर्तुमशक्तः कुप्यति किमसौ नरोऽत्र निर्लज्जः ? ।
उत्पतितोऽपि हि चणकः शक्तः किं भ्राष्ट्रकं भङ्क्तुम्' ? ॥ १४३ ॥

अथ कदाचित्प्रत्यूषे 'योगनिद्रां गतस्य राज्ञः शय्यान्ते मार्जनं कुर्वन्निदमाह —अहो, दन्तिलस्य महद् 'दृप्तत्वं यद्राजमहिषीमालिङ्गति ।' तच्छ्रुत्वा राजा ससम्भ्रममुत्थाय तमुवाच—भो ! भो ! गोरम्भ ! सत्यमेतत्; यत्त्वया जल्पितम् ? किं देवी दन्तिलेन समालिङ्गिता' ? इति । गोरम्भः प्राह—'देव, रात्रिजागरणेन 'द्यूतासक्तस्य मे बलान्निद्रा समायाता । तन्न वेद्मि किं मयाभिहितम् ।' राजा सेर्ष्यं स्वगतम् [अचिन्तयत्]—'एष तावदस्मद्गृहेऽ'-प्रतिहतगतिस्तथा दन्तिलोऽपि । तत्कदाचिदनेन देवी समालिङ्ग्यमाना दृष्टा भविष्यति । तेनेदमभिहितम् । उक्तं च—

यद्वाञ्छति दिवा मर्त्यो वीक्षते वा करोति वा ।
तत्स्वप्नेऽपि तदभ्यासाद् ब्रूते वाथ करोति वा ॥ १४४ ॥

तथा च—शुभं वा यदि पापं यन्नृणां हृदि संस्थितम् ।
सुगूढमपि तज्ज्ञेयं स्वप्नवाक्यात्तथा मदात् ॥ १४५

अथवा स्त्रीणां विषये कोऽत्र संदेहः ?

जल्पन्ति सार्धमन्येन पश्यन्त्यन्यं सविभ्रमाः ।
हृद्गतं चिन्तयन्त्यन्यं प्रियः को नाम योषिताम् ? ॥ १४६

अन्यच्च—

एकेन स्मितपाटलाधररुचो जल्पन्त्यनल्पाक्षरं
वीक्षन्तेऽन्यमितः स्फुटत्कुमुदिनीफुल्लोल्लसल्लोचनाः ।
दूरोदारचरित्रचित्रविभवं ध्यायन्ति चान्यं धिया
केनेत्थं परमार्थतोऽर्थवदिवं प्रेमास्ति वामभ्रुवाम् ? ॥ १४७ ॥

तथा च—नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां न पुंसां वामलोचना ॥ १४८ ॥

रहो नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः ।
तेन नारद ! नारीणां सतीत्वमुपजायते ॥ १४९ ॥

अलक्तको यथा रक्तो निष्पीड्य पुरुषस्तथा ।
अबलाभिर्बलाद्रक्तः पादमूले निपात्यते ॥ १५६ ॥

'एवं स राजा बहुविधं विलप्य तत्प्रभृति दन्तिलस्य प्रसादपराङ्मुखः संजातः । किं बहुना ? राजद्वारप्रवेशोऽपि तस्य निवारितः । दन्तिलोऽप्य कस्मादेव प्रसादपराङ्मुखमवनिपतिमवलोक्य चिन्तयामास—'अहो, साधु चेदमुच्यते—

कोऽर्थान्प्राप्य न गर्वितः विषयिणः कस्यापदोऽस्तं गताः ?
स्त्रीभिः कस्य न खण्डितं भुवि मनः ? को नाम राज्ञां प्रियः ?।
कः कालस्य न गोचरान्तरगतः ? कोऽर्थी गतो गौरवं ?
को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ? ॥ १५७ ॥

तथा च—काके शौचं द्यूतकारे च सत्यं
सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः ।
क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता
राजा मित्रं केन दृष्टं श्रुतं वा ? ॥ १५८ ॥

अपरं मयास्य भूपतेरथवान्यस्यापि कस्यचिद्राजसंबन्धिनः स्वप्नेपि नानिष्टं कृतम् । तत्किमेवं पराङ्मुखो मां प्रति भूपतिः' ? इति । एवं तं दन्तिलं कदाचिद्राजद्वारे 'विष्कम्भितं विलोक्य समार्जनकर्ता गोरम्भो

विहस्य द्वारपालानिदमूचे—भो भो द्वारपालाः ! राजप्रसादाधिष्ठितोऽयं दन्तिलः स्वयं निग्रहानुग्रहकर्ता च। तदनेन निवारितेन यथाहं तथा यूयमप्यर्धचन्द्रभागिनो भविष्यथ। तच्छ्रुत्वा दन्तिलश्चिन्तयामास— नूनमिदमस्य गोरम्भस्य चेष्टितम्। अथवा साध्विदमुच्यते—

अकुलीनोऽपि मूर्खोऽपि भूपालं योऽत्र सेवते।
अपि सम्मानहीनोऽपि स सर्वत्र प्रपूज्यते ॥ १५९ ॥
अपि कापुरुषो भीरुः स्याच्चेन्नृपतिसेवकः।
तथापि न पराभूतिं जनादाप्नोति मानवः ॥ १६० ॥

एवं स बहुविधं विलप्य विलक्षमनाः सोद्वेगो गतप्रभावः स्वगृहं निशामुखे गोरम्भमाहूय वस्त्रयुगलेन सम्मान्येदमुवाच—'भद्र, मया न तदा त्वं रागवशान्निःसारितः। यतस्त्वं ब्राह्मणानामग्रतोऽनुचितस्थाने समुपविष्टो दृष्ट इत्यपमानितः, तत्क्षम्यताम्।' सोऽपि स्वर्गराज्योपमं तद्वस्त्र-युगलमासाद्य परं परितोषं गत्वा तमुवाच—'भोः श्रेष्ठिन्, क्षान्तं मया ते तत्। तदस्य सम्मानस्य कृते पश्य मे बुद्धिप्रभावं राजप्रसादं च।' एवमुक्त्वा सपरितोषं निष्क्रान्तः। साधु चेदमुच्यते—

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्।
अहो ! सुसदृशी चेष्टा तुलायष्टेः खलस्य च ॥ १६१ ॥

ततश्चान्येद्युः स गोरम्भो राजकुले गत्वा योगनिद्रां गतस्य भूपतेः सम्मार्जनक्रियां कुर्वन्निदमाह—'अहो ! अविवेकोऽस्मद्भूपतेः यत्पुरीषोत्सर्गमाचरंश्चिर्भटीभक्षणं करोति'। तच्छ्रुत्वा राजा सविस्मयं तमुवाच – 'रे रे गोरम्भ, किमप्रस्तुतं लपसि ? गृहकर्मकरं मत्वा त्वां न व्यापादयामि। किं त्वया कदाचिदहमेवंविधं कर्म समाचरन्दृष्टः ?' सोऽब्रवीत् – देव, द्यूतासक्तस्य रात्रिजागरणेन सम्मार्जनं कुर्वाणस्य मम बलान्निद्रा समायाता। तयाधिष्ठितेन मया किंचिज्जल्पितम्, तन्न वेद्मि। तत्प्रसादं करोतु स्वामी निद्रापरवशस्य' इति। एवं श्रुत्वा राजा चिन्तितवान् – यन्मया जन्मान्तरे पुरीषोत्सर्गं कुर्वता कदापि चिर्भटिका न भक्षिता तद्यथायं व्यतिकरोऽसंभाव्यो ममानेन मूढेन व्याहृतः, तथा दन्तिलस्यापीति निश्चयः। तन्मया न युक्तं कृतं, यत्स वराकः सम्मानेन वियोजितः। न तादृक्पुरुषाणामेवंविधं चेष्टितं संभाव्यते। तदभावेन राजकृत्यानि पौरकृत्यानि च सर्वाणि शिथिलतां व्रजन्ति।' एवमनेकधा विमृश्य दन्तिलं समाहूय निजाङ्गवस्त्राभरणादिभिः संयोज्य स्वाधिकारे नियोजयामास। अतोऽहं ब्रवीमि—'यो न पूज्यते गर्वात्' इति।

यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलम् ? ।
वने सिंहो मदोन्मत्तः शशकेन निपातितः ॥

करटक आह – कथमेतत् । स आह –

## सिंह-शशक-कथा

अस्ति कस्मिंश्चिद्वनोद्देशे सिंहः । स च सर्वान्मृगानवष्टभ्याभक्षयत् । ततो मृगैर्मिलित्वा सिंहो विज्ञापितः । देव । सर्वमृगोच्छेदः किमर्थं क्रियते । वयमेव सर्वे प्रत्यहमेकैकं सत्त्वमाहारार्थं प्रेषयामः । तेनोक्तम् । एवमस्त्विति । ततःप्रभृति प्रतिदिनं तैः प्रेषितमेकैकं मृगं भक्षयन्स्थितः । अथ कदाचिद्धूर्तशशकस्य वार आयातः । सो ऽचिन्तयत् । मृतो ऽहम् । किं करोमि । क्व यास्यामि । यद्वा येन जीवामि तमुपायं चिन्तयामि । किमशक्यं बुद्धिमताम् । अतः सिंहमेवोपायान्तरेण व्यापादयामीति । ततो वेलातिक्रमं कृत्वा कथंचिन्मन्दं मन्दमगच्छत् । सिंहो ऽपि क्षुत्पिपासाभिभूतः क्रोधादुवाच । कुतस्त्वं विलम्ब्यागतः । सो ऽब्रवीत् । नाहमपराद्धः । पथि सिंहान्तरेण संरुध्य भक्षितुमुपक्रान्तः । तस्मात्कथमपि पलाय्यागतो ऽस्मि । सिंह आह । क्वासौ दुरात्मा । स आह । त्वरितमागच्छ स्वामिन् । तं दर्शयामीति । ततस्तं गृहीत्वातीवनिर्मलजलपूर्णकूपं गतः । तत्र पश्येति तस्य प्रतिबिम्बं दर्शयामास । स चातिकोपवशादात्मनः प्रतिबिम्बं दृष्ट्वा सिंहान्तरभ्रान्त्या जले तस्योपरि निपत्य पञ्चत्वमुपगतः । शशकोऽपि सर्वमृगानानन्द्य तैः सह प्रशस्यमानो यथासुखं तत्र वने निवसति स्म । अतोऽहं ब्रवीमि— 'यस्य बुद्धिर्बलं तस्य' इति

सुहृदां हितकामानां न करोतीह यो वचः ।
स कूर्म इव दुर्बुद्धिः काष्ठाद् भ्रष्टो विनश्यति ॥ ३४४ ॥

टिटिटभ आह—'कथमेतत् ।' साऽब्रवीत्—

## हंसद्वयकच्छपानां कथा

अस्ति कस्मिंश्चिज्जलाश्रये कम्बुग्रीवो नाम कच्छपः । तस्य च सङ्कटविकटनाम्नी मित्रे हंसजातीये परमस्नेहकोटिमाश्रिते नित्यमेव सरस्तीरमासाद्य तेन सहानेककथा देवर्षिब्रह्मर्षिराजर्षीणां कृत्वास्तमयवेलायां स्वनीडसंश्रयं चक्रतुः । अथ गच्छता कालेनावृष्टिवशात्तत्सरः शनैःशनैः शोषमगमत् तद्दुःखदुःखितौ तावूचतुः । भो मित्र जम्बालशेषमेतत्सरः संजातम् तत्कथं भवान्भविष्यति । अथ व्याकुलत्वं नो हृदि वर्तते । तच्छ्रुत्वा कम्बुग्रीव आह । भो नास्त्यस्माकं जीवितव्यं जलाभावात् तथाप्युपायश्चिन्त्यतामिति । उक्तं च ।

मित्रार्थे बान्धवार्थे च बुद्धिमान्यतते सदा ।
जातास्वापत्सु यत्नेन जगादेदं वचो मनुः ॥३५९॥

तदा नीयतां किंचिद्दृढतरं रज्जुलघुकाष्ठादि । अन्विष्यतां च प्रभूतसलिलसनाथं सरः । ततो मां लघुकाष्ठाधिरूढं दन्तैरुभयतो गृहीतकोटिविभागं तत्र सरसि नि नयतम् तावूचतुः । भो मित्र करिष्याव एतत् परं भवता मौनव्रतेन स्थातव्यम् नो चेत्तव काष्ठात्पातो भविष्यति । ततः खण्डशो भविष्यसि । कच्छप आह । मम खलु मौनव्रतमद्यप्रभृति यावदाकाशगमनेन तत्सरः प्राप्यते । तथानुष्ठिते गच्छता कम्बुग्रीवेणाधोभागव्यवस्थितं किंचित्पुरमालोकितम् तत्र ये पौरास्ते तं तथा नीयमानमवलोक्य सविस्मयमिदमूचुः । अहो चक्राकारं किमपि पक्षिभ्यां नीयते पश्यतपश्यतेति । अथ तेषां कोलाहलमाकर्ण्य कम्बुग्रीवः प्रोवाच । भो किमेष कोलाहल इति वक्तुमना अर्धोक्ते निपातितः पौरैः खण्डशः कृतश्च । अतोऽहं ब्रवीमि ।

सुहृदां हितकामानां न करोतीह यो वचः ।
स कूर्मइव दुर्बुद्धिः काष्ठाद्भ्रष्टो वि नश्यति ॥३६०॥

चटकाकाष्ठकूटेन मक्षिकादर्दुरैस्तथा ।
महाजनविरोधेन कुञ्जरः प्रलयं गतः ॥

टिट्टिभ आह—'कथमेतत्'। साब्रवीत्

## चटककुञ्जरकथा

कस्मिंश्चिद्वनोद्देशे चटकदंपती तमालतरुकृतनिलयौ प्रतिवसतः । अथ गच्छता कालेन संततिरभवत् । अन्यस्मिन्नहनि प्रमत्तो गजः कश्चित्तं तमालवृक्षं घर्मार्तश्छायार्थी समाश्रितः । ततो मदोत्कर्षात्तां तस्य शाखां चटकाक्रान्तां पुष्कराग्रेणाकृष्य बभञ्ज । तस्या भङ्गेन चटकाण्डानि सर्वाणि विशीर्णानि । आयुःशेषतया च चटका कथमपि प्राणैर्न वियुक्ता । अथ साण्डभङ्गाभिभूता प्रलापान्कुर्वाणा न कथंचिदतिष्ठत् । अत्रान्तरे तस्यास्तान्प्रलापाञ्श्रुत्वा काष्ठकूटो नाम पक्षी तस्याः परमसुहृत्तद्दुःखदुःखितोऽभ्येत्य तामुवाच । भगवति किं वृथा प्रलापेन । उक्तं च ।

नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः ।
पण्डितानां च मूर्खाणां विशेषोऽयं यतः स्मृतः ॥

तथा च ।

अशोच्यानीह भूतानि यो मूढस्तानि शोचति ।
स दुःखे लभते दुःखं द्वावनर्थौ निषेवते ॥

अन्यच्च ।

श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
तस्मान्न रोदितव्यं हि क्रियाः कार्याः प्रयत्नतः ॥

चटका प्राह । अस्त्वेतत् । परं दुष्टगजेन मदान्मम संतानक्षयः कृतः । तद्यदि मम त्वं सुहृत्सत्यस्तदस्य गजापसदस्य कोऽपि वधोपायश्चिन्त्यो यस्यानुष्ठानेन मे संततिनाशदुःखमपसरति ।

काष्ठकूट आह । भगवति सत्यमभिहितं भवत्या । उक्तं च ।

स सुहृद्व्यसने यः स्यात्स पुत्रो यस्तु भक्तिमान् ।
स भृत्यो यो विधेयज्ञः सा भार्या यत्र निर्वृतिः ॥

तत्पश्य मे बुद्धिप्रभावम् । परं ममापि सुहृद्भूता वीणारवा नाम मक्षिकास्ति । तत्तामाहूयागच्छामि येन स दुरात्मा दुष्टगजो हन्यते । अथासौ सह चटकया मक्षिकामासाद्य प्रोवाच । भद्रे ममेष्टेयं चटका केनचिद्दुष्टगजेन पराभूताण्डस्फोटनेन । तत्तस्य वधोपायमनुतिष्ठतो मे साहाय्यं कर्तुमर्हसि ।
मक्षिकाप्याह । भद्र किमुच्यतेऽत्र विषये । उक्तं च ।

पुनःप्रत्युपकाराय मित्राणां क्रियते प्रियम् ।
यत्पुनर्मित्रमित्रस्य कार्यं मित्रैर्न किं कृतम् ॥

सत्यमेतत् । परं ममापि भेको मेघनादो नाम मित्रं तिष्ठति । तमप्याहूय यथोचितं कुर्मः । उक्तं च ।

हितैः साधुसमाचारैः शास्त्रज्ञैर्मतिशालिभिः ।
कथंचिन्न विकल्पन्ते विद्वद्भिश्चिन्तिता नयाः ॥

अथ ते चयो ऽपि गत्वा मेघनादस्याग्रे पूर्वं वृत्तान्तं निवेद्य तस्थुः । अथ स प्रोवाच । कियन्मात्रो गजो वराको महाजनस्य कुपितस्य । तन्मदीयो मन्त्रः कर्तव्यः । मक्षिके त्वं गत्वा मध्याह्नसमये तस्य मदोत्कटस्य गजस्य कर्णे वीणारवसदृशं शब्दं कुरु येन श्रवणसुखलालसो निमीलितनयनो भवति । ततश्च काष्ठकूटचञ्च्वा स्फोटितनयनो ऽन्धीभूतस्तृषार्तो मम गर्ततटाश्रितस्य सपरिकरस्य शब्दं श्रुत्वा जलाशयं मत्वाभ्येति । ततो गर्तमासाद्य पतिष्यति पञ्चत्वं यास्यति चेति । एवं समवायः कर्तव्यो यथा वैरसाधनं भवति । अथ तथानुष्ठिते स मत्तगजो मक्षिकागेयश्रवणसुखान्निमीलितनयनः पश्चात्काष्ठकू-टहतचक्षुर्मध्याह्नसमये भ्राम्यन्मण्डूकशब्दानुसारी गच्छन्महतीं गर्तामासाद्य पतितो मृतश्च । अतो ऽहं ब्रवीमि । चटकाकाष्टकूटेन इत्यादि॥



परस्य पीडनं कुर्वन् स्वार्थसिद्धिं च पण्डितः ।
मूढबुद्धिर्न भक्षेच्च वने चतुरको यथा' ॥ ३९९

करटक आह—'कथमेतत् ?' स आह—

## सिंह-शृगाल-कथा

'अस्ति कस्मिंश्चिद्वनोद्देशे वज्रदंष्ट्रो नाम सिंहः । तस्य चतुरक-क्रव्यमुखनामानौ शृगालवृकौ भृत्यभूतौ सदैवानुगतौ तत्रैव वने प्रतिवसतः । अथान्यदिने सिंहेन कदाचिदासन्नप्रसवा प्रसववेदनया स्वयूथाद् भ्रष्टोष्ट्रयुपविष्टा कस्मिंश्चिद्वनगहने समासादिता । अथ तां व्यापाद्य यावदुदरं स्फोटयति, तावज्जीवल्लघुदासेरकशिशुर्निष्क्रान्तः । सिंहोऽपि दासेरक्याः पिशितेन सपरिवारः परां तृप्तिमुपागतः । परं स्नेहाद्बालदासेरकं त्यक्तं गृहमानीयेदमुवाच – भद्र, न तेऽस्ति मृत्योर्भयं मत्तो नान्यस्मादपि । ततः स्वेच्छयाऽत्र वने भ्राम्यतामिति । यतस्ते शङ्कुसदृशौ कर्णौ, ततः 'शङ्कुकर्णो' नाम भविष्यति ।' एवमनुष्ठिते चत्वारोऽपि ते एकस्थाने विहारिणः परस्परमनेकप्रकारगोष्ठीसुखमनुभवन्तस्तिष्ठन्ति । शङ्कुकर्णोऽपि यौवनपदवीमारूढ क्षणमपि न तं सिंहं मुञ्चति । अथ कदाचिद्वज्रदंष्ट्रस्य केनचिद्वन्येन मत्तगजेन सह युद्धमभवत् । तेन मदवीर्यात्स दन्तप्रहारैस्तथा क्षतशरीरो विहितो यथा प्रचलितुं न शक्नोति । तदा क्षत्क्षामकण्ठस्तान् प्रोवाच – 'भोः, अन्विष्यतां किञ्चित्सत्त्वं येनाहमेवं स्थितोऽपि तद् व्यापाद्यात्मनो युष्माकं च क्षुत्प्रणाशं करोमि ।' तच्छ्रुत्वा ते त्रयोऽपि वने सन्ध्याकालं यावद् भ्रान्ताः, परं न किञ्चित्सत्त्वमासादितम् । अथ चतुरकश्चिन्तयामास— यदि शङ्कुकर्णोऽयं व्यापाद्यते । ततः सर्वेषां कतिचिद्दिनानि तृप्तिर्भवति । परं नैनं स्वामी मित्रत्वादाश्रयसमाश्रितत्वाच्च विनाशयिष्यति । अथवा बुद्धिप्रभावेण स्वामिनं प्रतिबोध्य तथा करिष्ये, यथा व्यापादयिष्यति । उक्तं च—

अवध्यं चाथवाऽगम्यमकृत्यं नास्ति किञ्चन ।
लोके बुद्धिमतां बुद्धेस्तस्मात्तां विनियोजयेत् । ४०० ॥

एवं विचिन्त्य शङ्कुकर्णमिदमाह—'भोः शङ्कुकर्ण, स्वामी तावत्पथ्यं विना क्षुधया परिपीड्यते । स्वाम्यभावादस्माकमपि ध्रुवं विनाश एव । ततो वाक्यं किञ्चित्स्वाम्यर्थे वदिष्यामि । तत् श्रूयताम् ।' शङ्कुकर्ण आह— 'भोः, शीघ्रं निवेद्यताम्, येन ते वचनं शीघ्रं निर्विकल्पं करोमि । अपरं, स्वामिनो हिते कृते मया सुकृतशतं कृतं भविष्यति ।' अथ चतुरक आह— 'भो भद्र, आत्मशरीरं द्विगुणलाभेन स्वामिने प्रयच्छ, येन ते द्विगुणं शरीरं, भवति, स्वामिनः पुनः प्राणयात्रा भवति ।' तदाकर्ण्य शङ्कुकर्णः प्राह— 'भद्र, यद्येवं तन्मदीयप्रयोजनमेतदुच्यताम् । 'स्वाम्यर्थः क्रियताम्' इति, परमत्र धर्मः प्रतिभूः ।' इति विचिन्त्य ते सर्वे सिंहसकाशमाजग्मुः । ततश्चतुरक आह –'देव, न किञ्चित्सत्त्वं प्राप्तम् । भगवानादित्योऽप्यस्तं गतः । तद्यदि स्वामी द्विगुणं शरीरं प्रयच्छति, ततः शङ्कुकर्णोऽयं द्विगुणवृद्ध्या स्वशरीरं

प्रयच्छति धर्मप्रतिभुवा ।' सिंह आह—'भोः, यद्येवं तत्सुन्दरतरम् । व्यवहारस्यास्य धर्मः प्रतिभूः क्रियताम्' इति ।

अथ सिंहवचनानन्तरं वृकशृगालाभ्यां विदारितोभयकुक्षिः शङ्कुकर्णः पञ्चत्वमुपागतः । अथ वज्रदंष्ट्रश्चतुरकमाह — भोश्चतुरक , यावदहं नदीं गत्वा स्नानं देवताऽर्चनविधिं कृत्वाऽऽगच्छामि, तावत्त्वयाऽत्राप्रमत्तेन भाव्यम् ' इत्युक्त्वा नद्यां गतः । अथ तस्मिन् गते चतुरकश्चिन्तयामास – 'कथं ममैकाकिनो भोज्योऽयमुष्ट्रो भविष्यति ?' इति विचिन्त्य क्रव्यमुखमाह – 'भोः क्रव्यमुख, क्षुधालुर्भवान् । तद्यावदसौ स्वामी नागच्छति, तावत्त्वमस्योष्ट्रस्य मांसं भक्षय । अहं त्वां स्वामिनो निर्दोषं प्रतिपादयिष्यामि ।' सोऽपि तच्छ्रुत्वा यावत् किञ्चिन्मांसमास्वादयति, तावच्चतुरकेणोक्तम्— 'भोः क्रव्यमुख, समागच्छति स्वामी । तत्त्यक्त्वैनं दूरे तिष्ठ, येनास्य भक्षणं न विकल्पयति ।' तथाऽनुष्ठिते सिंहः समायातो यावदुष्ट्रं पश्यति, तावद्रिक्तीकृतहृदयो दासेरकः । ततो भृकुटिं कृत्वा परुषतरमाह—अहो, केनैष उष्ट्र उच्छिष्टतां नीतः ? येन तमपि व्यापादयामि ।' एवमभिहिते क्रव्यमुखश्चतुरकमुखमवलोकयति किल ।'

अथ चतुरको विहस्योवाच—'भोः, मामनादृत्य पिशितं भक्षयित्वाऽधुना मन्मुखमवलोकयसि ? तदास्वादयास्य दुर्नयतरोः फलम्' इति । तदाकर्ण्य क्रव्यमुखो जीवननाशभयाद् दूरदेशं गतः । एतस्मिन्नन्तरे तेन मार्गेण दासेरकसार्थो भाराक्रान्तः समायातः । तस्याग्रेसरोष्ट्रस्य कण्ठे महती घण्टा बद्धा । तस्याः शब्दं दूरतोऽप्याकर्ण्य सिंहो जम्बूकमाह—'भद्र, ज्ञायतां किमेषः रौद्रः शब्दः श्रूयतेऽश्रुतपूर्वः ।' तच्छ्रुत्वा चतुरकः किञ्चिद्वनान्तरं गत्वा सत्वरमभ्युपेत्य प्रोवाच–'स्वामिन्, गम्यतां गम्यताम् यदि शक्नोषि गन्तुम् ।' सोऽब्रवीत्—'भद्र, किमेवं मां व्याकुलयसि ? तत्कथय किमेतत् ?' इति चतुरक आह—'स्वामिन् एष धर्मराजस्तवोपरि कुपितः, यदनेनाकाले दासेरकोऽयं मदीयो व्यापादितः । तत्सहस्रगुणमुष्ट्रमस्य सकाशाद् ग्रहीष्यामि ' इति निश्चित्य बृहन्मानमादायाऽग्रेसरस्योष्ट्रस्य ग्रीवायां घण्टां बद्ध्वा व्यापन्न दासेरकसक्तानपि पितृपितामहानादाय वैरनिर्यातनार्थमायात एव ।' सिंहोऽपि तच्छ्रुत्वा सर्वतो दूरादेवावलोक्य मृतमुष्ट्रं परित्यज्य प्राणभयात्प्रणष्टः । चतुरकोऽपि शनैः शनैस्तस्योष्ट्रस्य मांसं भक्षयामास । अतोऽहं ब्रवीमि – 'परस्य पीडनं कुर्वन्' इति ॥

# द्विशुक - कथा

कस्मिंश्चित् पर्वतैकदेशे शुकी प्रसूता । तस्या द्वौ शुकौ समुत्पन्नौ । अथाहारार्थं निर्गतायाः शुक्यास् तौ पुत्रौ व्याधेन गृहीतौ । तयोर् एकः कथम् अपि दैववशाद् अपेतः । द्वितीयं पञ्जरके संस्थाप्य पाठयितुम् आरब्धः । अपरश् च शुकः परिभ्रमतर्षिणा दृष्टः । ततस् तेन संगृह्य स्वम् आश्रमपदम् आनीय पोषितः । एवं च काले ऽतिवर्तमाने कश्चिद् राजा स्वसैन्याद् अश्वेनापहृतस् तं वनोद्देशम् आगतः । यत्र ते व्याधा निवसन्ति । तत आगतं राजानम् अवलोक्य सहसैव पञ्जरस्थः शुक कलकलशब्दम् अकरोत् । भो भो मदीयस्वामिनः ! एष को ऽपि हयारूढ आगच्छति । तद् एनं बन्ध बन्ध । व्यापादयत व्यापादयत' इति । अथ तद् राजा शुकवचनं श्रुत्वान्यतो द्रुततरं वाजिनं प्रेरितवान् । अथ यावद् राजान्यद् दूरवनान्तरं गच्छति ' तावत् पश्यति मुनीनाम् आश्रमम् । तत्रापि पञ्जरस्थः शुको ऽब्रवीत् । एह्य् एहि ' राजन् । विश्राम्यताम् । शीतलान्य् उदकानि स्वादूनि च फलानि भक्षय । भो भो ऋषयः । अस्यार्घ्यपाद्येन पूजा क्रियताम् अस्मिन् सुशीतले द्रुमतले । एवं श्रुत्वा राजातीवोत्फुल्लनयनो विस्मितमनाः ' किम् इदम् ' इति चिन्तितवान् । शुकं चापृच्छत् । मयैतो ऽन्यो ऽपि वनोद्देशे त्वत्सदृशः शुको दृष्टः । स क्रूररूपः । बन्ध बन्ध । घातयत घातयत ' इत्य् एवम् अवदत् । अथ राज्ञो वचनम् आकर्ण्य शुकेन यथावृत्तम् आत्मनो वृत्तं निवेदितम् ॥

॥ इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रे मित्रभेदो नाम प्रथमं तन्त्रम् ॥

# अथ मित्रसम्प्राप्तिः

## (द्वितीयं तन्त्रम्)

अथेदमारभ्यते मित्रसम्प्राप्तिर्नाम द्वितीयं तन्त्रम् ।

प्राप्तव्यमर्थं लभते मनुष्यो
देवोऽपि तं लङ्घयितुं न शक्तः ।
तस्मान्न शोचामि न विस्मयो मे
यदस्मदीयं न हि तत्परेषाम् ॥१११॥

काककूर्मौ पृच्छतः – 'कथमेतत् ?' हिरण्यक आह—

### वणिक्पुत्र-कथा

अस्ति कस्मिंश्चिन्नगरे सागरदत्तो नाम वणिक् । तत्सूनुना रूपकशतेन विक्रीयमाणं पुस्तकं गृहीतम् । तस्मिंश्च लिखितमस्ति—

(प्राप्तव्यमर्थं लभते मनुष्यो देवोऽपि तं लङ्घयितुं न शक्तः ।
तस्मान्नशोचामि न विस्मयो मे यदस्मदीयं न हि तत्परेषाम् ॥ )

तद्दृष्ट्वा सागरदत्तेन तनुजः पृष्टः—'पुत्र, कियता मूल्येनैतत् पुस्तकं गृहीतम्?' सोऽब्रवीत् —'रूपकशतेन ?' तच्छ्रुत्वा सागरदत्तोऽब्रवीत्— धिङ्मूर्ख, त्वं लिखितैकश्लोकं रूपकशतेन यद्गृह्णासि, एतया बुद्धया कथं

द्रव्योपार्जनं करिष्यसि ? तदद्यप्रभृति त्वया मे गृहे न प्रवेष्टव्यम्।' एवं निर्भर्त्स्य गृहान्निःसारितः । स च तेन निर्वेदेन विप्रकृष्टं देशान्तरं गत्वा किमपि नगरमासाद्यावस्थितः ।

अथ कतिपयदिवसैस्तन्नगरनिवासिना केनचिदसौ पृष्टः – कुतो भवा – नागतः ? किं नामधेयो वा' ? इति । असावब्रवीत्— 'प्राप्तव्यमर्थं लभते मनुष्यः ।'

अथान्येनापि पृष्टेनानेन तथैवोत्तरं दत्तम् । एवं च तस्य नगरस्य मध्ये प्राप्तव्यमर्थं इति तस्य प्रसिद्धं नाम जातम् । अथ राजकन्या चन्द्रवती नामाभिनवरूपयौवनसम्पन्ना सखीद्वितीयैकस्मिन्महोत्सवदिवसे नगरं निरीक्ष – माणाऽस्ति । तत्रैव च कश्चिद्राजपुत्रोऽतीवरूपसम्पन्नो मनोरमश्च कथमपि तस्या दृष्टिगोचरं गतः । तद्दर्शनसमकालमेव कुसुमबाणाहतया तया निजसख्यभिहिता—'सखि, यथा किलानेन सह समागमो भवति, तथा ऽद्य त्वया यतितव्यम् ।' एवं च श्रुत्वा सा सखी तत्सकाशं गत्वा शीघ्रमब्रवीत् – 'यदहं चन्द्रवत्या तवान्तिकं प्रेषिता । भणितं च त्वां प्रति तया, यन्मम

त्वद्दर्शनान्मनोभवेन पश्चिमावस्था कृता । तद्यदि शीघ्रमेव मदन्तिके न समेष्यसि, तदा मे मरणं शरणम् ।' इति श्रुत्वा तेनाभिहितम्—'यद्यवश्यं मया तत्र गन्तव्यं तत्कथय केनोपायेन प्रवेष्टव्यम् ?' अथ सख्याभिहितम्— 'रात्रौ सौधावलम्बितया दृढवरत्रया त्वया तत्रारोढव्यम् ।' सोऽब्रवीत्— 'यद्येवं निश्चयो भवत्यास्तदहमेवं करिष्यामि ।' इति निश्चित्य सखी चन्द्रवतीसकाशं गता ।

अथागतायां रजन्यां स राजपुत्रः स्वचेतसा व्यचिन्तयत्—'अहो, महदकृत्यमेतत् । उक्तं च—

गुरोः सुतां मित्रभार्यां स्वामिसेवकगेहिनीम् ।
यो गच्छति पुमाँल्लोके तमाहुर्ब्रह्मघातिनम् ॥ ११२ ॥

अपरं च—

अयशः प्राप्यते येन येन चापगतिर्भवेत् ।
स्वर्गाच्च भ्रश्यते येन तत्कर्म न समाचरेत्' ॥ ॥११३॥

इति सम्यग्विचार्य तत्सकाशं न जगाम ।

अथ प्राप्तव्यमर्थः पर्यटन्धवलगृहपार्श्वे रात्राववलम्बितवरत्रां दृष्ट्वा कौतुकाविष्टहृदयस्तामालम्ब्याधिरूढः । तया च राजपुत्र्या स एवायमित्याश्वस्तचित्तया स्नानखादनपानाच्छादनादिना सम्मान्य तेन सह शयनतलमाश्रितया तदङ्गसंस्पर्शसंजातहर्षरोमाञ्चितगात्रयोक्तम्— 'युष्मद्दर्शनमात्रानुरक्तया मयात्मा प्रदत्तोऽयम् । त्वद्वर्जमन्यो भर्ता मनस्यपि मे न भविष्यति इति । तत्कस्मान्मया सह न ब्रवीषि ? सोऽब्रवीत्—'प्राप्तव्यमर्थं लभते मनुष्यः।' इत्युक्ते तयाऽन्योऽयमिति मत्वा धवलगृहादुत्तार्य मुक्तः । स तु खण्डदेवकुले गत्वा सुप्तः ।

अथ तत्र कयाचित्स्वैरिण्या दत्तसंकेतको यावद्दण्डपाशकः प्राप्तः, तावदसौ पूर्वसुप्तस्तेन दृष्टो रहस्यसंरक्षणार्थमभिहितश्च— 'को भवान्' ? सो ऽब्रवीत् – 'प्राप्तव्यमर्थं लभते मनुष्यः ।' इति श्रुत्वा दण्डपाशकेनाभिहितम् – 'यच्छन्यं देवगृहमिदम् । तदत्र मदीयस्थाने गत्वा स्वपिहि ।' तथा प्रतिपद्य स मतिविपर्यासादन्यशयने सुप्तः ।

अथ तस्य रक्षकस्य कन्या विनयवती नाम रूपयौवनसम्पन्ना कस्यापि पुरुषस्यानुरक्ता संकेतं दत्त्वा तत्र शयने सुप्ताऽऽसीत् ।

अथ सा तमायातं दृष्ट्वा 'स एवायमस्मद्वल्लभः' इति रात्रौ घनतरान्धकारव्यामोहितोत्थाय भोजनाच्छादनादिक्रियां कारयित्वा गान्धर्वविवाहेनात्मानं विवाहयित्वा तेन समं शयने स्थिता विकसितवदनकमला तमाह – 'किमद्यापि मया सह विश्रब्धं भवान्न ब्रवीति ?' सोऽब्रवीत्— 'प्राप्तव्यमर्थं लभते मनुष्यः ।' इति श्रुत्वा तया चिन्तितम्—'यत्कार्यमसमीक्षितं क्रियते तस्येदृक्फलविपाको भवति' इति । एवं विमृश्य सविषादया तया निःसारितोऽसौ । स च यावद्वीथीमार्गेण गच्छति, तावदन्यविषयवासी वरकीर्तिर्नाम वरो महता वाद्यशब्देनागच्छति । प्राप्तव्यमर्थोऽपि तैः समं गन्तुमारब्धः ।

अथ यावत्प्रत्यासन्ने लग्नसमये राजमार्गासन्नश्रेष्ठिगृहद्वारे रचितमण्डपवेदिकायां कृतकौतुकमङ्गलवेशा वणिक्सुतास्ति, तावन्मदमत्तो हस्त्यारोहकं हत्वा प्रणश्यज्जनकोलाहलेन लोकमाकुलयंस्तमेवोद्देशं प्राप्तः । तं च दृष्ट्वा सर्वे वरानुयायिनो वरेण सह प्रणश्य दिशो जग्मुः ।

अथास्मिन्नवसरे भयतरललोचनामेकाकिनीं कन्यामवलोक्य 'मा भैषीः, अहं परित्राता' इति सुधीरं स्थिरीकृत्य दक्षिणपाणौ संगृह्य महासाहसिकतया प्राप्तव्यमर्थः परुषवाक्यैर्हस्तिनं निर्भर्त्सितवान् । ततः कथमपि दैवयोगादपाये हस्तिनि ससुहृद्बान्धवेनातिक्रान्तलग्नसमये वरकीर्तिनागत्य तावत्तां कन्यामन्यहस्तगतां दृष्ट्वाऽभिहितः—'भोः श्वशुर, विरुद्धमिदं त्वयाऽनुष्ठितं यन्मह्यं प्रदाय कन्यान्यस्मै प्रदत्ता' इति। सो ऽब्रवीत् – 'भोः, अहमपि हस्तिभयपलायितो भवद्भिः सहायातो न जाने किमिदं वृत्तम्' इत्यभिधाय दुहितरं प्रष्टुमारब्धः—'वत्से न त्वया सुन्दरं कृतम्' तत्कथ्यतां कोऽयं वृत्तान्तः ?' सोऽब्रवीत्—'यदहमनेन प्राणसंशयाद्रक्षिता, तदेनं मुक्त्वा मम जीवन्त्या नान्यः पाणिं ग्रहीष्यति' इति । अनेन वार्ताव्यतिकरेण रजनी व्युष्टा ।

अथ प्रातस्तत्र संजाते महाजनसमवाये वार्ताव्यतिकरं श्रुत्वा राजदुहिता तमुद्देशमागता । कर्णपरम्परया श्रुत्वा दण्डपाशकसुताऽपि तत्रैवागता।

अथ तं महाजनसमवायं श्रुत्वा राजाऽपि तत्रैवाजगाम।प्राप्तव्यमर्थं प्राह च—'भोः, विश्रब्धं कथय । कीदृशोऽसौ वृत्तान्तः ?' अथ सो ऽब्रवीत् – प्राप्तव्यमर्थं लभते मनुष्यः' इति राजकन्या स्मृत्वा प्राह— देवोऽपि तं लङ्घयितुं न शक्तः' इति। ततो दण्डपाशकसुताऽब्रवीत्—'तस्मान्न शोचामि न विस्मयो मे' इति। तमखिललोकवृत्तान्तमाकर्ण्य वणिक्सुताऽब्रवीत्— यदस्मदीयं न हि तत्परेषाम्' इति । ततश्च अभयदानं दत्त्वा राजा पृथक्पृथग्वृत्तान्ताञ्ज्ञात्वावगततत्त्वस्तस्मै प्राप्तव्यमर्थाय स्वदुहितरं सबहुमानं ग्रामसहस्रेण समं सर्वालंकारपरिवारयुतां दत्त्वा 'त्वं मे पुत्रोऽसि' इति नगरविदितं तं यौवराज्येऽभिषिक्तवान् । दण्डपाशकेनापि स्वदुहिता स्वशक्त्या वस्त्रदानादिना सभाव्य प्राप्तव्यमर्थाय प्रदत्ता ।

अथ प्राप्तव्यमर्थेनापि स्वीयमातापितरौ समस्तकुटुम्बावृतौ तस्मिन्नगरे सम्मानपुरःसरं समानीतौ । अथ सोऽपि स्वगोत्रेण सह विविधभोगानुपभुञ्जानः सुखेनावस्थितः । अतोऽहं ब्रवीमि—'प्राप्तव्यमर्थं लभते मनुष्यः' इत्यादि ॥

॥ इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रे मित्रसम्प्राप्तिर्नाम
द्वितीयं तन्त्रं समाप्तम् ॥२॥

# अथ काकोलूकीयम्

## ( तृतीय तन्त्रम् )

अथेदमारभ्यते काकोलूकीयं नाम तृतीयं तन्त्रम् ।

बहुबुद्धिसमुपेताः सुविज्ञाना बलोत्कटान् ।
शक्ता वञ्चयितुं धूर्ता ब्राह्मणं छागलादिव ॥

मेघवर्ण आह । कथमेतत् । सो ऽब्रवीत् ।

### धूर्तब्राह्मण-छाग-कथा

अस्ति कस्मिंश्चिदधिष्ठाने मित्रशर्मा नाम ब्राह्मणः कृताग्निहोत्रपरिग्रहः प्रतिवसति स्म । स कदाचिन्माघमासे सौम्यानिले प्रवाति मेघाच्छादिते गगने मन्दंमन्दं वर्षति पर्जन्ये पशुप्रार्थनार्थं कंचिद्ग्रामान्तरं गतः । कश्चिद्यजमानो याचितः । भो यजमान आगाम्यमावास्यायां यक्ष्यामि यज्ञम् । तद्यजनार्थं पशुमेकं समर्पय । अथ तेनातीवपीवरतनुः पशुः प्रदत्तः । सो ऽपि समर्थं तं पशुमितश्चेतश्च गच्छन्तं विज्ञाय स्कन्धे कृत्वा सत्वरं पुराभिमुखं प्रतस्थे । अथ तस्य गच्छतो मार्गे त्रयो धूर्ताः क्षुत्क्षामकण्ठाः संमुखा बभूवुः । तैश्चादृशं पीवरतनुं पशुं स्कन्धे कृतमालोक्य मिथो ऽभिहितम् । भो अस्य पशोर्भक्षणादद्यतनीयो हिमपातो व्यर्थतां नीयते । तदेनं वञ्चयित्वास्य सकाशाद्गृह्यते । अथ तेषामेकतमो वेषपरिवर्तनं विधाय संमुखो भूत्वापरमार्गेण तमाहिताग्निमूचे । भो भो बालाग्निहोत्रिन् किमेवं जनविरुद्धं हास्यकार्यमनुष्ठीयते यदेष सारमेयो ऽपवित्रः स्कन्धाधिरूढो नीयते । उक्तं च ।

श्वानकुक्कुटचाण्डालाः समस्पर्शाः प्रकीर्तिताः ।
रासभोष्ट्रौ विशेषेण तस्मात्तान्नैव संस्पृशेत् ॥

ततश्च तेन कोपाविष्टेनाभिहितम् । अहो किमन्धो भवान्यत्पशुं सारमेयत्वेन प्रतिपादयसि । स आह । ब्रह्मन् न कोपः कार्यः । यथेच्छं गम्यताम् । अथ यावत्किंचिद्वनान्तरं गच्छति तावद्द्वितीयो धूर्तः संमुखमभ्युपेत्य तमुवाच । भो ब्रह्मन् कष्टं कष्टम् । यद्यपि वल्लभो ऽयं मृतवत्सस्तथापि स्कन्ध आरोपयितुमशक्यः । उक्तं च ।

तिर्यञ्चं मानुषं वापि यो मृतं संस्पृशेत्कुधीः ।
पञ्चगव्येन शुद्धिः स्यात्तस्य चान्द्रायणेन वा ॥

अथासौ सकोपमाह । भोः किमन्धो भवान्यत्पशुं मृतवत्सं वदसि । सो ऽब्रवीत् । भगवन् मा कोपं कुरु । अज्ञानान्मयाभिहितम् । त्वमात्मन उचितेन समाचरेति । अथ यावत्स्तोकं वनान्तरं गच्छति तावत्तृतीयो धूर्तः संमुखमुपेत्य तमुवाच । भो अयुक्तमेतद्यद्रासभं स्कन्धारूढं नयसि । तत्त्यज्यतामेषः । उक्तं च ।

यः स्पृशेद्रासभं मर्त्यो ज्ञानादज्ञानतो ऽथवा ।
सचैलं स्नानमुद्दिष्टं तस्य पापप्रशान्तये ॥

तत्त्यजैनं यावत्को ऽपि न पश्यति । अथासौ तं पशुं रासभं मन्यमानो भयाद्भूमौ प्रक्षिप्य स्वगृहमुद्दिश्य पलायितुं प्रारब्धः । ततस्ते ऽपि त्रयो मिलित्वा पशुमादाय यथेच्छं भक्षितुमारब्धाः । अतो ऽहं ब्रवीमि ।

बहुबुद्धिसमुपेताः सुविज्ञाना बलोत्कटान् ।
शक्ता वञ्चयितुं धूर्ता ब्राह्मणं छागलादिव ॥

बहवो न विरोद्धव्या दुर्जया हि महाजनाः ।
स्फुरन्तमपि नागेन्द्रं भक्षयन्ति पिपीलिकाः ॥ १२१ ॥

मेघवर्ण आह — 'कथमेतत् ?' स्थिरजीवी कथयति —

## कृष्णसर्प - कथा

अस्ति कस्मिंश्चिद् वल्मीके महाकायः कृष्णसर्पो ऽतिदर्पो नाम । स कदाचिद् बिलानुसारमार्गम् उत्सृज्यान्येन लघुद्वारेण निष्क्रमितुम आरब्धः । निष्क्रामतश् च तस्य महाकायत्वाद् दैववशाच् च लघुविवरतया शरीरे व्रणः समुत्पन्नः । अथ व्रणशोणितगन्धानुसारिणीभिः पिपीलिकाभिः सर्वतो व्याप्तो व्याकुलीकृतश् च । कति व्यापादयति । कति वा ताडयति । अतिप्रभूतत्वाद् विस्तारितबहुव्रणाभिः क्षतसर्वाङ्गो ऽतिदर्पः पञ्चत्वम् उपगतः । अतो ऽहं ब्रवीमि — 'बहवो न विरोद्धव्याः' इत्यादि ॥

अनागतं यः कुरुते स शोभते
स शोच्यते यो न करोत्यनागतम् ।
वने ऽत्र सस्थस्य समागता जरा
बिलस्य वाणी न कदाऽपि मे श्रुता ॥ २१३ ॥

ते प्रोचुः—'कथमेतत् ?' रक्ताक्षः कथयति—

## बिलवाणी-कथा

कस्मिंश्चित् वनोद्देशे खरनखरो नाम सिंहः प्रतिवसति स्म । स कदाचित् इतश्चेतश्च परिभ्रमन् क्षुत्क्षामकण्ठो न किञ्चिदपि सत्त्वमासाद । ततश्च अस्तमनसमये महतीं गिरिगुहाम् आसाद्य प्रविष्टः चिन्तयामास—'नूनम् एतस्यां गुहायां रात्रौ केनापि सत्त्वेन आगन्तव्यम् , तत् निभृतो भूत्वा तिष्ठामि ।' एतस्मिनन्तरे तत्स्वामी दधिपुच्छो नाम श्रृगालः समायातः । स च यावत् पश्यति, तावत् सिंहपदपद्धतिर्गुहायां प्रविष्टा, न च निष्क्रमणं गता इति दृष्टवान् । ततश्च अचिन्तयत्—अहो! विनष्टोऽस्मि ? नूनमस्याम् अन्तर्गतेन सिंहेन भाव्यम्, तत् किं करोमि? कथं ज्ञास्यामि ?' एवं विचिन्त्य द्वारस्थः फूत्कर्त्तुम् आरब्धः—'अहो बिल! अहो बिल !' इत्युक्त्वा तूष्णीम्भूय भूयोऽपि तथा एव प्रत्यभाषत – 'भोः! किं न स्मरसि, यत् मया त्वया सह समयः कृतोऽस्ति यत् मया बाह्यात् समागतेन त्वं वक्तव्यः, त्वया च अहम् आकारणीय इति? तत् यदि मां न आह्वयसि, ततोऽहं द्वितीय बिलं यास्यामि ।' अथ तत् श्रुत्वा 'सिंहः चिन्तितवान्—'नूनम् एषा गुहा अस्य समागतस्य सदा समाह्वानं करोति, परम् अद्य मद्भयात् न किञ्चित् ब्रूते । अथवा साधु इदमुच्यते –

भयसन्त्रस्तमनसां हस्तपादादिकक्रियाः ।
प्रवर्त्तन्ते न वाणी च वेपथुश्चाधिको भवेत् ॥ २१४ ॥

तत् अहमस्य आह्वानं करोमि, येन तदनुसारेण प्रविष्टोऽयं मे भोज्यतां यास्यति ।' एवं सम्प्रधार्य सिंहः तस्याह्वानम् अकरोत् । अथ सिंहशब्देन सा गुहा प्रतिरवसम्पूर्णा अन्यान् अपि दूरस्थान् आरण्यजीवान् त्रासयामास। श्रृगालोऽपि पलायमान इमं श्लोकम् अपठत्-

अनागतः यः कुरुते स शोभते
स शोच्यते यो न करोत्यनागतम्
वनेऽत्र संस्थस्य समागता जरा
बिलस्य वाणी न कदाऽपि मे श्रुता' ॥२१५॥

अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्टतः।
स्वार्थमभ्युद्धरेत् प्राज्ञः स्वार्थभ्रंशो हि मूर्खता ॥२३३॥
स्कन्धेनापि वहेच्छत्रुं कालमासाद्य बुद्धिमान् ।
महता कृष्णसर्पेण मण्डूका बहवो हताः ॥२३४॥

मेघवर्ण आह—'कथमेतत् ?' स्थिरजीवी कथयति—

## सर्प-मण्डूक-कथा

अस्ति करुणाद्रिसमीपे एकस्मिन् प्रदेशे परिणतवयाः मन्दविषो नाम कृष्णसर्पः। स एवं चित्ते सञ्चिन्तितवान्—'कथं नाम मया सुखोपाय वृत्त्या वर्त्तितव्यम् ?' ति। ततो बहुमण्डूकं ह्लदम् उपगम्य धृतिपरीत-मिव आत्मानं दर्शितवान्। अथ तथा स्थिते तस्मिन्, उदकप्रान्तगतेन एकेन मण्डूकेन पृष्टः—'माम ! किमद्य यथापूर्वम् आहारार्थं न विहरसि ?' सो ऽब्रवीत्– 'भद्र! कुतो मे मन्दभाग्यस्य आहाराभिलाषः ? यत्कारणम्, अद्य प्रदोषे एव मया आहारार्थं विहरमाणेन दृष्ट एको मण्डूकः, तद्ग्रहणार्थं मया क्रमः सज्जितः। सोऽपि मां दृष्ट्वा मृत्युभयेन स्वाध्यायप्रसक्तानां ब्रह्मणानाम् अन्तरमपक्रान्तः, न विभावितो मया क्वापि गतः। तत्सदृश-मोहितचित्तेन मया कस्यचित् ब्राह्मणस्य सूनोः ह्लदतटजलान्तःस्थोऽङ्गुष्ठो दष्टः। ततोऽसौ सपदि पञ्चत्वमुपागतः। अथ तस्य पित्रा दुःखितेन अह शप्तः यथा—'दुरात्मन् ! त्वया निरपराधो मत्सुतो दष्टः तत् अनेन दोषेन त्वं मण्डूकानां वाहनं भविष्यसि, तत्प्रसादलब्धजीविकया वार्त्तष्यसे' इति। ततोऽहं युष्माकं वाहनार्थम् आगतोऽस्मि।' तेन च सर्वमण्डूकानाम् इदमा-वेदितम्। ततः तैः प्रहृष्टमनोभिः सर्वैरेव गत्वा जलपादनाम्नः दर्दुर-राजस्य विज्ञप्तम्। अथ असौ अपि मन्त्रिपरिवृतः 'अत्यद्भुतम् इदम्' इति मन्यमानः, ससम्भ्रमं ह्लदात् उत्तीर्य मन्दविषस्य फणिनः फणप्रदेशम् अधिरूढः। शेषा अपि यथाज्येष्ठं तत्पृष्ठोपरि समारुरुहुः, किं बहुना? तदुपरि स्थानमप्राप्तवन्तः तस्य अनुपदं धावन्ति। मन्दविषो ऽपि तेषां तुष्ट्यर्थम् अनेकप्रकारान् गतिविशेषान् अदर्शयत्। अथ जलपादो लब्ध तदङ्गसंस्पर्शसुखः तमाह—

न तथा करिणा यानं तुरगेण रथेन वा।
नरयानेन वा यानं यथा मन्दविषेण मे ॥ २३५ ॥

अथ अन्येद्युः मन्दविषः छद्मना मन्दं मन्दं विसर्पति। तच्च दृष्ट्वा जलपादो ऽब्रवीत्—'भद्र मन्दविष ! यथापूर्वं किमद्य साधु न उह्यते ?' मन्दविषो ऽब्रवीत्—'देव ! अद्य आहारवैकल्यात् न मे वोढुं शक्तिरस्ति अथ असौ अब्रवीत् —'भद्र ! भक्षय क्षुद्रमण्डूकान्।' तत् श्रुत्वा प्रहर्षित-सर्वगात्रो मन्दविषः ससम्भ्रमम् अब्रवीत्—'मम अयमेव विप्रशापोऽस्ति। तत् तव अनेन अनुज्ञावचनेन प्रीतोऽस्मि।' ततोऽसौ नैरन्तर्येण मण्डूकान्

भक्षयन् कतिपयैः एवाहोभिः बलवान् संवृत्तः प्रहृष्टश्च अन्तर्लीनम् अवहस्य इदमब्रवीत्—

मण्डूका विविधा ह्येते छलपूर्वोपसाधिताः ।
कियन्तं कालमक्षीणा भवेयुः खादिता मया ?' ॥२३६॥

जलपादोऽपि मन्दविषेण कृतकवचनव्यामोहितचित्तः किमपि न अवबुध्यते । अत्रान्तरेऽन्यो महाकायः कृष्णसर्पः तमुद्देशं समायातः तत्र मण्डूकैः वाह्यमानं दृष्ट्वा विस्मयम् अगमत्; आह च— वयस्य! यत् अस्माकम् अशनं, तैः कथं वाह्यसे ? विरुद्धमेतत्' । मन्दविषोऽब्रवीत्–

सर्वमेतद्विजानामि यथा वाह्योऽस्मि दर्दुरैः ।
किञ्चित् कालं प्रतीक्ष्योऽहं घृतान्धो ब्राह्मणो यथा ॥२३७॥

सोऽब्रवीत् —'कथमेतत् ?' मन्दविषः कथयति—

## घृतान्धब्राह्मण-कथा

अस्ति कस्मिंश्चित् अधिष्ठाने यज्ञदत्तो नाम ब्राह्मणः । तस्य भार्या पुंश्चली अन्यासक्तमना अजस्रं विटाय सखण्डघृतान् घृतपूरान् कृत्वा भर्तुश्चौरिकया प्रयच्छति ।

अथ कदाचित् भर्त्ता दृष्ट्वा अब्रवीत्—'भद्रे ! किमेतत् परिदृश्यते कुत्र वा अजस्रं नयसि इदम् ? कथय सत्यम्' । सा च उत्पन्नप्रतिभा कृतकवचनैः भर्त्तारम् अब्रवीत्—'अस्ति अत्र नातिदूरे भगवत्या देव्या आयतनं, तत्र अहमुपोषिता सती बलिं भक्ष्यविशेषांश्च अपूर्वन् नयामि

अथ तस्य पश्यतो गृहीत्वा तत् सकलं देव्यायतनाभिमुखी प्रतस्थे यत्कारणं देव्या निवेदितेन अनेन मदीयो भर्त्तैवं मंस्यते यत् 'मम ब्राह्मणी भगवत्याः कृते भक्ष्यविशेषान् नित्यमेव नयति' इति । अथ देव्यायतने गत्वा स्नानार्थं नद्याम् अवतीर्य यावत् स्नानक्रियां करोति, तावत् भर्त्ता मार्गान्तरेण आगत्य देव्याः पृष्ठतोऽदृश्यः अवतस्थे ।

अथ सा ब्राह्मणी स्नात्वा देव्यायतनम् आगत्य स्नानानुलेपनमाल्यधूपबलिक्रियादिकं कृत्वा देवीं प्रणम्य व्यजिज्ञपत्—'भवति ! केन प्रकारेण मम भर्त्ता अन्धो भविष्यति ?' तत् श्रुत्वा स्वरभेदेन देवीपृष्ठस्थितो ब्राह्मणो जगाद –'यदि त्वम् अजस्रं घृतपूरादिभक्ष्यं तस्मै भर्त्रे प्रयच्छसि, ततः शीघ्रमन्धो भविष्यति।' सा तु बन्धकी कृतकवचनवञ्चितमानसा तस्मै ब्राह्मणाय तदेव नित्यं प्रददौ । अथ अन्येद्युः ब्राह्मणेन अभिहितम्—'भद्रे ! नाहं सुतरां पश्यामि ।' तत् श्रुत्वा चिन्तितम् अनया—'देव्याः प्रसादोऽयं प्राप्तः' इति।

अथ तस्याः हृदयवल्लभो विटस्तत्सकाशम् 'अन्धीभूतोऽयं ब्राह्मणः किं मम करिष्यति ?' इति निःशङ्कः प्रतिदिवसमभ्येति । अथ अन्येद्युस्तं प्रविशन्तम् अभ्यासगतं दृष्ट्वा केशेषु गृहीत्वा लगुडपार्ष्णिप्रभृतिप्रहारैः तावत् अताडयत्, यावत् असौ पञ्चत्वमाप, तामपि दुष्टपत्नीं छिन्ननासिकां कृत्वा विससर्ज। अतोऽहं ब्रवीमि—'सर्वमेतद्विजानामि' इत्यादि ।

अथ मन्दविषोऽन्तर्लीनम् अवहस्य पुनरपि 'मण्डूका विविधा ह्येते' इति तमेवम् अब्रवीत् । अथ जलपादः तत् श्रुत्वा सुतरां व्यग्रहृदयः किमनेन अभिहितम् ? इति सम्यक् नावगम्य तम् अपृच्छत्– भद्र ? किं त्वया अभिहितम् इद विरुद्धं वचः ?' अथ असौ आकारप्रच्छादनार्थं न किञ्चित् इति अब्रवीत् । तथैव कृतकपञ्चनव्यामोहितचित्तो जलपादः तस्य दुष्टाभिसन्धिं न अवबुध्यत, किं बहुना ? तथा तेन सर्वेऽपि भक्षिताः, तथा बीजमात्रमपि न अवशिष्टम् ! अतोऽहं ब्रवीमि—'स्कन्धेनापि वहेच्छत्रुम्' इत्यादि ॥

॥ इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रे काकोलूकीयं नाम
तृतीयं तन्त्रम् ॥ ३ ॥

# अथ लब्धप्रणाशम्

## (चतुर्थं तन्त्रम्)

अथ इदम् आरभ्यते लब्धप्रणाशं नाम चतुर्थं तन्त्रं।

स्वार्थमुत्सृज्य यो दम्भी सत्यं ब्रूते सुमन्दधीः ।
स स्वार्थात् भ्रश्यते नूनं युधिष्ठिर इवापरः ॥ ३८ ॥

मकर आह —'कथमेतत् ?' स कथयति—

### युधिष्ठिरकुम्भकार-कथा

कस्मिंश्चिदधिष्ठाने कुम्भकारः प्रतिवसति स्म । स कदाचित्प्रमत्तो ऽर्धभग्नकर्परतीक्ष्णाग्रस्योपरि महता वेगेन धावन्पतितः । ततः कर्परकोट्या पाटितललाटो रुधिरप्लावितततनुः कृच्छ्रादुत्थाय स्वाश्रयं गतः । ततश्चापथ्यसेवनात्स प्रहारस्तस्य करालतां गतः कृच्छ्रेण नीरोगतां नीतः । अथ कदाचिद्दुर्भिक्षपीडिते देशे स कुम्भकारः क्षुत्क्षामकण्ठः कैश्चिद्राजसेवकैः सह देशान्तरं गत्वा कस्यापि राज्ञः सेवको बभूव । सो ऽपि राजा तस्य ललाटे विकरालं प्रहारक्षतं दृष्ट्वा चिन्तयामास । यद्वीरः पुरुषः कश्चिदयम् । नूनं तेन ललाटपट्टे संमुखप्रहारः । अतस्तं संमानादिभिः सर्वेषां राजपुत्राणां मध्ये विशेषप्रसादेन पश्यति । ते ऽपि राजपुत्रास्तस्य तं प्रसादातिरेकं पश्यन्तः परमेर्ष्याधर्मं वहन्तो राजभयान्न किंचिदूचुः । अथान्यस्मिन्नहनि तस्य भूपतेर्वीरसंभावनायां क्रियमाणायां विग्रहे समुपस्थिते प्रकल्प्यमानेषु गजेषु संनह्यमानेषु वाजिषु योधेषु प्रगुणीक्रियमाणेषु तेन भूभुजा स कुलालः प्रस्तावानुगतं पृष्टो निर्जने । यद्भो राजपुत्र कस्मिन्संग्रामे प्रहारो ऽयं ललाटे लग्नः । स आह । देव नायं शस्त्रप्रहारः । कुलालो ऽहं प्रकृत्या । मद्गेहे ऽनेककर्पराण्यासन् । अथ कदाचिन्मद्यपानं कृत्वा निर्गतः प्रधावन्कर्परोपरि पतितः । तस्य प्रहारविकारो ऽयं मे ललाट एवं विकरालतां गतः । तदाकर्ण्य राजा सव्रीडमाह । अहो वञ्चितो ऽहं राजपुत्रानुकारिणानेन कुलालेन । तद्दीयतां द्रागेतस्य चन्द्रार्धः । तथानुष्ठिते कुम्भकार आह । मा मैवं कुरु । पश्य मे रणे हस्तलाघवम् । राजा प्राह । भोः सर्वगुणसंपन्नो भवान् । तथापि गम्यताम् । उक्तं च ।

शूरश्च कृतविद्यश्च दर्शनीयो ऽसि पुत्रक ।
यस्मिन्कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ॥

कुम्भकार आह—'कथमेतत ?' राजा कथयति—

## सिंहदम्पति-शृगालपुत्रयोः कथा

'कस्मिंश्चित् उद्देशे सिंहदम्पती प्रतिवसतः स्म । अथ सिंही पुत्रद्वयम् अजीजनत । सिंहोऽपि नित्यमेव मृगान् व्यापाद्य सिंह्यै ददाति । अथ अन्यस्मिन्नहनि तेन किमपि न आसादितं वने भ्रमतोऽपि रविरस्तं गतः।

तेन स्वगृहम् आगच्छता शृगालशिशुरेकः प्राप्तः। सिंहश्च 'बालको ऽयम् इति अवधार्य्य, तं यत्नेन दंष्ट्रामध्यगतं कृत्वा सिंह्या जीवन्तमेव समर्पितवान्। ततः सिंह्या अभिहित—'भोः कान्त ! त्वया आनीतं किञ्चित् अस्मकाम भोजनम् ? सिंह आह—'प्रिये ! मया अद्य एनं शृगालशिशुं परित्यज्य न किञ्चित् सत्त्वम् आसादितम् । स च बालोऽयमिति मत्वा न व्यापादितः विशेषात् स्वजातीयश्च । उक्तञ्च—

स्त्रीविप्रलिङ्गिबालेषु प्रहर्त्तव्यं न कर्हिचित् ।
प्राणत्यागेऽपि सञ्जाते विश्वस्तेषु विशेषतः ॥ ४० ॥

इदानीं त्वम् एनं भक्षयित्वा पथ्यं कुरु, प्रभातेऽन्यत् किञ्चित् उपार्जयिष्यामि। सा प्राह—'भोः कान्त ! त्वया बालकोऽयं विचिन्त्य न हतः, तत् कथम् एनमहं स्वोदरार्थे विनाशयामि ? उक्तञ्च—

अकृत्यं नैव कर्त्तव्यं प्राणत्यागेऽपि संस्थिते ।
न च कृत्यं परित्याज्यं धर्म एष सनातनः ॥ ४१ ॥

तस्मात् मम अयं तृतीयः पुत्रो भविष्यति इति, एवमुक्त्वा तमपि स्वस्तनक्षीरेण परां पुष्टिम् अनयत । एवं ते त्रयोऽपि शिशवः परस्परम् अज्ञातजातिविशेषा एकाचारविहारा बाल्यसमयं निर्वाहयन्ति ।

अथ कदाचित् तत्र वने भ्रमत् अरण्यगजः समायातः। तं दृष्ट्वा तौ सिंहसुतौ द्वौ अपि कुपिताननौ तं प्रति प्रचलितौ यावत्, तावत् तेन शृगालसुतेन अभिहितम्—'अहो ! गजोऽयं युष्मत्कुलशत्रुः, तन्न गतव्यमेतस्य अभिमुखम्' एवमुक्त्वाऽसौ गृहं प्रधावितः। तौ अपि ज्येष्टबान्धवभङ्गान्निरुत्साहतां गतौ । अथवा साधु इदमुच्यते—

एकेनापि सुधीरेण सोत्साहेन रणं प्रति ।
सोत्साहं जायते सैन्यं भग्ने भङ्गमवाप्नुयात् ॥ ४२ ॥

तथा च –

अत एव हि वाञ्छन्ति भूपा योधान् महाबलान् ।
शूरान् वीरान् कृतोत्साहान् वर्जयन्ति च कातरान् ॥ ४३ ॥

अथ तौ द्वौ अपि गृहं प्राप्य पित्रोरग्रतो विहसन्तौ ज्येष्ठभ्रातृचेष्टितम् ऊचतुः, यथा—'गजं दृष्ट्वा दूरतोऽपि नष्टः ।' सोऽपि तदाकर्ण्य कोपाविष्टमनाः प्रस्फुरिताधरपल्लवः ताम्रलोचनः त्रिशिखां भ्रकुटिं कृत्वा तौ निर्भर्त्सयन् परुषतर वचनानि उवाच—ततः सिंह्या एकान्ते नीत्वा प्रबोधितो ऽसौ—'वत्स ! मैवं कदाचित् जल्प, भवदीयलघुभ्रातरौ एतौ' इति ।

अथ असौ प्रभूतकोपाविष्टः तामुवाच—'किमहम् एताभ्यां शौर्य्येण रूपेण विद्याभ्यासेन कौशलेन वा हीनः; येन माम् उपहसतः ? तन्मया अवश्यम् एतौ व्यापादनीयौ।' तदाकर्ण्य सिंही तस्य जीवितमिच्छन्ती अन्तर्विहस्य प्राह—

शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक ! ।
यस्मिन् कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ॥ ४४

तत् सम्यक् शृणु वत्स ! त्वं शृगालीसुतः, कृपया मया स्वस्तनक्षीरेण पुष्टिं नीतः। तत् यावत् एतौ मत्पुत्रौ शिशुत्वात् त्वां शृगाल न जानीतः तावत् द्रुततरं गत्वा स्वजातीयानां मध्ये मिलितो भव, नो चेत् आभ्यां हतो मृत्युपथं समेष्यसि'। सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः शनैः शनैः अपसृत्य स्वजात्या मिलितः। तस्मात् त्वमपि, यावत् एते राजपुत्राः त्वां

कुलालं न जानन्ति तावत् द्रुततरम् अपसर नो चेत् एतेषां सकाशात् विडम्बनां प्राप्य मरिष्यसि। कुलालोऽपि तदाकर्ण्य सत्वरं प्रनष्टः। अतोऽहं ब्रवीमि – स्वार्थमुत्सृज्य यो दम्भी' इत्यादि। धिक् मूर्ख ! यत् त्वया स्त्रियो ऽर्थे एतत् कार्य्यम् अनुष्ठातुम् आरब्धम्। न हि स्त्रीणां कथञ्चिद्-विश्वासम् उपगच्छेत् ॥

सुगुप्तं रक्ष्यमाणोऽपि दर्शयन् दारुणं वपुः।
व्याघ्रचर्मप्रतिच्छन्नो वाक्कृते रासभो हतः ॥ ४ ॥

मकर आह—"कथमेतत् ?" वानरः कथयति—

## व्याघ्रचर्मगर्दभ-कथा

अस्ति कस्मिंश्चिदधिष्ठाने शुद्धपटो नाम रजकः प्रतिवसति स्म। तस्यैको रासभो ऽस्ति। सो ऽपि घासाभावादतिदुर्बलः। अथ तेन रजकेन क्वापि व्याघ्रचर्म प्राप्तम्। ततश्चाचिन्तयत्। अहो शोभनमापतितम्। एतच्चर्म परिधाप्य रासभं रात्रौ यव-क्षेत्रेषूत्सृजामि येन व्याघ्रं मत्वा समीपवर्तिनः क्षेत्रपाला निष्कासयन्ति। तथानुष्ठिते रासभो रात्रौ यथेच्छया यवभक्षणं करोति। रात्रिशेषे ऽपि भूयो रजकः स्वाश्रयं नयति। एवं गच्छता कालेन स रासभः पीवरतनुर्जातः। कृच्छ्राद्बन्धनमपि नीयते। अथान्यस्मिन्नहनि स मदोद्धतो दूराद्रासभीशब्दं शृण्वन्खरस्वरेण शब्दायितुमारब्धः। अथ ते क्षेत्रपा रासभो ऽयं व्याघ्रचर्मप्रतिच्छन्न इति मत्वा लकुटपाषाणशरप्रहारैस्तं व्यापादितवन्तः। अतो ऽहं ब्रवीमि।

सुगुप्तं रक्ष्यमाणो ऽपि दर्शयन्दारुणं वपुः।
व्याघ्रचर्मप्रतिच्छन्नो वाक्कृते रासभो हतः ॥

॥ इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रे लब्धप्रणाशं नाम
चतुर्थं तन्त्रम् ॥ ४ ॥

# अपरीक्षितकारकम

## ( पञ्चमं तन्त्रम् )

अथ इदमारभ्यते 'अपरीक्षितकारकं' नाम पञ्चमं तन्त्रम् ।

शतबुद्धिः शिरःस्थोऽयं लम्बते च सहस्रधीः ।
एकबुद्धिरहं भद्रे ! क्रीडामि विमले जले' ॥ ४४ ॥

सुवर्णसिद्धिः आह—'कथमेतत् ?' स आह—

### मत्स्यमण्डूक-कथा

कस्मिंश्चित् जलाशये शतबुद्धिः सहस्रबुद्धिश्च द्वौ मत्स्यौ निवसतः स्म । अथ तयोः एकबुद्धिर्नाम मण्डूको मित्रतां गतः । एवं ते त्रयोऽपि कञ्चित् कालं वेलायां सुभाषितसुखम् अनुभूय भूयोऽपि सलिल प्रविशन्ति । अथ कदाचित् तेषां गोष्ठीगतानां जालहस्तधीवराः प्रभूतैः

मत्स्यैः व्यापादितैः मस्तके विधृतैः अस्तमनवेलायां तस्मिन् जलाशये समायाताः । ततः सलिलाशयं दृष्ट्वा मिथः प्रोचुः—'अहो ! बहुमत्स्योऽयं ह्रदो दृश्यते स्वल्पसलिलश्च, तत् प्रभाते अत्र आगमिष्यामः । एवमुक्त्वा स्वगृहं गताः । मत्स्याश्च विषण्णवदना मिथो मन्त्रं चक्रुः । ततो मण्डूक आह—'भोः ! शतबुद्धे ! श्रुतं धीवरोक्तं भवता ? तत् किमत्र युज्यते कर्त्तुम् ? पलायनम् अवष्टम्भो वा ? यत् कर्त्तुं युक्तं भवति, तत् आदिश्यताम् अद्य' । तत् श्रुत्वा सहस्रबुद्धिः प्रहस्य प्राह— 'भो मित्र ! मा भैषीः, यतो वचनश्रवणमात्रादेव भयं न कार्य्यम् । उक्तञ्च —

सर्पाणाञ्च खलानाञ्च सर्वेषां दुष्टचेतसाम् ।
अभिप्राया न सिध्यन्ति तेनेदं वर्त्तते जगत् ॥ ४५ ॥

तत् तावत् तेषाम् आगमनमपि न सम्पत्स्यते, भविष्यति वा तर्हि त्वां बुद्धिप्रभावेण आत्मसहितं रक्षयिष्यामि, यतः अनेकां सलिलगति-चर्य्याम् अहं जानामि' । तत् आकर्ण्य शतबुद्धिः आह—'भोः ! युक्तमुक्त भवता, सहस्रबुद्धिरेव भवान् । अथवा साधु इदमुच्यते,—

बुद्धेर्बुद्धिमतां लोके नास्त्यगम्यं हि किञ्चन ।
बुद्ध्या यतो हता नन्दाश्चाणक्येनासिपाणयः ॥ ४६ ॥

न यत्रास्ति गतिर्वायो रश्मीनाञ्च विवस्वतः ।
तत्रापि प्रविशत्याशु बुद्धिर्बुद्धिमतां सदा ॥ ४७ ॥

ततो वचनश्रवणमात्रादपि पितृपर्य्यायऽऽगत जन्मस्थानं त्यक्तुं न शक्यते । उक्तञ्च—

न तत् स्वर्गेऽपि सौख्यं स्यात् दिव्यस्पर्शनशोभने ।
कुस्थानेऽपि भवेत् पुंसां जन्मनो यत्र सम्भवः ॥ ४८ ॥

तत्र कदाचिदपि गन्तव्यम् । अहं त्वां सुबुद्धिप्रभावेण रक्षयिष्यामि' ।

मण्डूक आह—'भद्रौ ! मम तावत् एका एव बुद्धिः पलायनपरा; तत् अहम् अन्यं जलाशयम् अद्य एव सभार्यो यास्यामि' । एवमुक्त्वा स मण्डूके रात्रौ एव ह्यन्यजलाशयं गतः । धीवरैः अपि प्रभाते आगत्य जघन्यमध्यमोत्तमजलचरा मत्स्यकूर्ममण्डूककर्कटादयो गृहीताः, तौ अपि शतबुद्धिसहस्रबुद्धी सभार्यौ पलायमानौ चिरम् आत्मानं गतिविशेषविज्ञानैः कुटिलचारेण रक्षन्तौ अपि जाले पतितौ व्यापादितौ च ।

अथ अपराह्णसमये प्रहृष्टास्ते धीवराः स्वगृहं प्रति प्रास्थिताः गुरुत्वाच्च एकेन शतबुद्धिः स्कन्धे कृतः, सहस्रबुद्धिः प्रलम्बमानो नीयते ततश्च वापीकण्ठोपगतेन मण्डूकेन तौ तथा नीयमानौ दृष्ट्वा अभिहिता स्वपत्नी–'प्रिये ! पश्य पश्य—

शतबुद्धिः शिरस्थोऽयं लम्बते च सहस्रधीः ।
एकबुद्धिरहं भद्रे ! क्रीडामि विमले जले ॥ ४९ ॥

अनागतवतीं चिन्तामसंभाव्यां करोति यः ।
स एव पाण्डुरः शेते सोमशर्मपिता यथा ॥

सुवर्णसिद्धिराह । कथमेतत् । सो ऽब्रवीत् ।

## सोमशर्मपितृ-कथा

कस्मिंश्चिन्नगरे कश्चित्स्वभावकृपणो नाम ब्राह्मणः प्रतिवसति स्म । तस्य भिक्षार्जितैः सक्तुभिर्भुक्तोर्वरितैर्घटः परिपूरितः । तं च घटं नागदन्ते ऽवलम्ब्य तस्याधस्तात्खट्वां निधाय सततमेकदृष्ट्या तमवलोकयति । अथ कदाचिद्रात्रौ सुप्तश्चिन्तयामास । यत्परिपूर्णो ऽयं घटस्तावत्सक्तुभिर्वर्तते । तद्यदि दुर्भिक्षं भवति तदनेन रूपकाणां शतमुत्पद्यते । ततस्तेन मयाजाद्वयं ग्रहीतव्यम् । ततः षण्मासिकप्रसववशात्ताभ्यां यूथं भविष्यति । ततो ऽजाभिः प्रभूता गा ग्रहीष्यामि गोभिर्महिषीर्महिषीभिर्वडवाः । वडवाप्रसवतः प्रभूता अश्वा भविष्यन्ति । तेषां विक्रयात्प्रभूतं सुवर्णं भविष्यति । सुवर्णेन चतुःशालं गृहं संपद्यते । ततः कश्चिद्ब्राह्मणो मम गृहमागत्य प्राप्तवरां रूपाढ्यां कन्यां दास्यति । तत्सकाशात्पुत्रो मे भविष्यति । तस्याहं सोमशर्मेति नाम करिष्यामि । ततस्तस्मिञ्जानुचलनयोग्ये संजाते ऽहं पुस्तकं गृहीत्वाश्वशालायाः पृष्ठदेश उपविष्टस्तदवधारयिष्यामि । अत्रान्तरे सोमशर्मा मां दृष्ट्वा जनन्युत्सङ्गाज्जानुप्रचलनपरो ऽश्वखुरासन्नवर्ती मत्समीपमागमिष्यति । ततो ऽहं ब्राह्मणीं कोपाविष्टो ऽभिधास्यामि । गृहाण तावद्बालकम् । सापि गृहकर्मव्यग्रतयास्मद्वचनं न श्रोष्यति । ततो ऽहं समुत्थाय तां पादप्रहारेण ताडयिष्यामि । एवं तेन ध्यानस्थितेन तथैव पादप्रहारो दत्तो यथा स घटो भग्नः । सक्तुभिः पाण्डुरतां गतः । अतो ऽहं ब्रवीमि ।

अनागतवतीं चिन्तामसंभाव्यां करोति यः ।
स एव पाण्डुरः शेते सोमशर्मपिता यथा ॥

॥ इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रे अपरीक्षितकारक नाम पञ्चमं तन्त्रम् ॥ ५ ॥

॥ समाप्तमिदं पञ्चतन्त्रम् ॥

तत्र कदाचिदपि गन्तव्यम् । अहं त्वां सुबुद्धिप्रभावेण रक्षयिष्यामि' ।

मण्डूक आह—'भद्रौ ! मम तावत् एका एव बुद्धिः पलायनपरा; तत् अहम् अन्यं जलाशयम् अद्य एव सभार्यो यास्यामि' । एवमुक्त्वा स मण्डूको रात्रौ एव अन्यजलाशयं गतः । धीवरैः अपि प्रभाते आगत्य जघन्यमध्यमोत्तमजलचरा मत्स्यकूर्ममण्डूककर्कटादयो गृहीताः, तौ अपि शतबुद्धिसहस्रबुद्धी सभार्यौ पलायमानौ चिरम् आत्मानं गतिविशेषविज्ञानैः कुटिलचारेण रक्षन्तौ अपि जाले पतितौ व्यापादितौ च ।

अथ अपराह्णसमये प्रहृष्टास्ते धीवराः स्वगृहं प्रति प्रस्थिताः गुरुत्वाच्च एकेन शतबुद्धिः स्कन्धे कृतः, सहस्रबुद्धिः प्रलम्बमानो नीयते ततश्च वापीकण्ठोपगतेन मण्डूकेन तौ तथा नीयमानौ दृष्ट्वा अभिहिता स्वपत्नी–'प्रिये ! पश्य पश्य—

शतबुद्धिः शिरस्थोऽयं लम्बते च सहस्रधीः ।<br>
एकबुद्धिरहं भद्रे ! क्रीडामि विमले जले ॥ ४९ ॥

अनागतवतीं चिन्तामसंभाव्यां करोति यः ।<br>
स एव पाण्डुरः शेते सोमशर्मपिता यथा ॥

सुवर्णसिद्धिराह । कथमेतत् । सोऽब्रवीत् ।

## सोमशर्मपितृ-कथा

कस्मिंश्चिन्नगरे कश्चित्स्वभावकृपणो नाम ब्राह्मणः प्रतिवसति स्म । तस्य भिक्षार्जितैः सक्तुभिर्भुक्तोर्वरितैर्घटः परिपूरितः । तं च घटं नागदन्तेऽवलम्ब्य तस्याधस्तात्खट्वां निधाय सततमेकदृष्ट्या तमवलोकयति । अथ कदाचिद्रात्रौ सुप्तश्चिन्तयामास । यत्परिपूर्णोऽयं घटस्तावत्सक्तुभिर्वर्तते । तद्यदि दुर्भिक्षं भवति तदनेन रूपकाणां शतमुत्पद्यते । ततस्तेन मयाजाद्वयं ग्रहीतव्यम् । ततः षाण्मासिकप्रसववशात्ताभ्यां यूथं भविष्यति । ततोऽजाभिः प्रभूता गा ग्रहीष्यामि गोभिर्महिषीर्महिषीभिर्वडवाः । वडवाप्रसवतः प्रभूता अश्वा भविष्यन्ति । तेषां विक्रयात्प्रभूतं सुवर्णं भविष्यति । सुवर्णेन चतुःशालं गृहं संपद्यते । ततः कश्चिद्ब्राह्मणो मम गृहमागत्य प्राप्तवरां रूपाढ्यां कन्यां दास्यति । तत्सकाशात्पुत्रो मे भविष्यति । तस्याहं सोमशर्मेति नाम करिष्यामि । ततस्तस्मिञ्जानुचलनयोग्ये संजातेऽहं पुस्तकं गृहीत्वाश्वशालायाः पृष्ठदेश उपविष्टस्तदवधारयिष्यामि । अत्रान्तरे सोमशर्मा मां दृष्ट्वा जनन्युत्सङ्गाज्जानुप्रचलनपरोऽश्वखुरासन्नवर्ती मत्समीपमागमिष्यति । ततोऽहं ब्राह्मणीं कोपाविष्टोऽभिधास्यामि । गृहाण तावद्बालकम् । सापि गृहकर्मव्यग्रतयास्मद्वचनं न श्रोष्यति । ततोऽहं समुत्थाय तां पादप्रहारेण ताडयिष्यामि । एवं तेन ध्यानस्थितेन तथैव पादप्रहारो दत्तो यथा स घटो भग्नः । सक्तुभिः पाण्डुरतां गतः । अतोऽहं ब्रवीमि ।

अनागतवतीं चिन्तामसंभाव्यां करोति यः ।<br>
स एव पाण्डुरः शेते सोमशर्मपिता यथा ॥

॥ इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रे अपरीक्षितकारक नाम पञ्चमं तन्त्रम् ॥ ५ ॥

॥ समाप्तमिदं पञ्चतन्त्रम् ॥

# हितोपदेशः

## मृग-काक-शृगालकथा

अस्ति मगधदेशे चम्पकवती नामारण्यानी । तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः । स च मृगः स्वेच्छया भ्राम्यन्हृष्टपुष्टाङ्गः केन चिच्छृगालेनावलोकितः । तं दृष्ट्वा शृगालो ऽचिन्तयत् । आः । कथमेतन्मांसं सुललितं भक्षयामि । भवतु । विश्वासं तावदुत्पादयामि । इत्यालोच्योपसृत्याब्रवीत् । मित्र । कुशलं ते । मृगेणोक्तम् । कस्त्वम् । सो ब्रूते । क्षुद्रबुद्धिनामा जम्बुको ऽहम् । अत्रारण्ये मित्रबन्धुहीनो मृतवदेकाकी निवसामि । इदानीं भवन्तं मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टो ऽस्मि । अधुना मया तवानुचरेण सर्वथा भवितव्यम् । मृगेणोक्तम् । एवमस्तु । ततो ऽस्तं गते सवितरि भगवति मरीचिमालिनि मृगस्य वासभूमिं प्रति मृगजम्बुकौ गतौ । तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काकः मृगस्य चिरमित्रं निवसति । तौ दृष्ट्वा काको ऽवदत् । सखे चित्राङ्ग । को ऽयं द्वितीयः । मृगो ब्रूते । जम्बुको ऽयमस्मत्सख्यमिच्छन्नागतः । काको ब्रूते । मित्र । अकस्मादागन्तुना सह विश्वासो नैव युक्तः । न भद्रमाचरितम् । तथा चोक्तम् ।

> अज्ञातकुलशीलस्य वासो देयो न कस्य चित् ।
> मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥

तावाहतुः कथमेतत् ? काकः कथयति—

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान्पर्कटीवृक्षः । तस्य कोटरे दैवदुर्विपाकाद्गलितनयनो जरद्गवो नाम गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात्किं चित्किं चिद्ददति । तेनासौ जीवति । अथ कदा चिद्दीर्घकर्णनामा मार्जारः पक्षिशावकान्भक्षयितुं तत्रागतः । ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः । तच्छ्रुत्वा जरद्गवेनोक्तम् । को ऽयमायाति । दीर्घकर्णो गृध्रमवलोक्य सभयमाह । हा हतो ऽस्मि । अधुनातिसंनिधानेन पलायनमप्यशक्यम् । तद्यथा भवितव्यं तथा भवतु । एतत्समीपमुपगच्छामि । इत्यालोच्योपसृत्याब्रवीत् । आर्य त्वामभिवन्दे । गृध्रो ऽवदत् । कस्त्वम् । सो ऽब्रवीत् । मार्जारो ऽहम् । गृध्रो ब्रूते । तद्दूरमपसर । नो चेद्धन्तव्यो ऽसि मया । मार्जारो ऽवदत् । श्रूयतां तावदस्मद्वचनम् । ततो यद्यहं वध्यस्तदा हन्तव्यः । यतः ।

> जातिमात्रेण कश्चित्किं वध्यते पूज्यते क्व चित् ।
> व्यवहारं परिज्ञाय वध्यः पूज्यो ऽथ वा भवेत् ॥

गृध्रो ब्रूते । ब्रूहि । कीदृग्व्यापारवान् । सो ऽवदत् । अहमत्र गङ्गातीरे नित्यस्नायी निरामिषाशी ब्रह्मचर्येण चान्द्रायणव्रतमाचरंस्तिष्ठामि । युष्मांश्च धर्मज्ञानरतान्विश्वासभूमयः पक्षिणः सर्वे सर्वदा ममाग्रे स्तुवन्ति । अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः । भवन्तश्चैतादृशा धर्मज्ञा यन्मामतिथिं हन्तुमुद्यताः । गृहस्थस्य धर्मश्चैष समुदीरितः ।

> अरावप्युचितं कार्यमातिथ्यं गृहमागते ।
> छेत्तुमप्यागते छायां नोपसंहरते द्रुमः ॥

किं च । यद्यन्नं नास्ति तदा प्रीतिवचसाप्यतिथिः पूज्यः । यतः ।

> तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
> एतान्यपि सतां गेहे नोच्छिद्यन्ते कदा चन ॥

गृध्रो ऽवदत् । मार्जारा हि मांसरुचयो भवन्ति पक्षिशावकाश्चात्र निवसन्ति । तेनैवं ब्रवीमि । मार्जारो ऽप्येवं श्रुत्वा भूमिं स्पृष्ट्वा कर्णौ स्पृशति

ब्रूते च । मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चान्द्रायणमध्यवसायितम् । यतः परस्परं विवदमानानामपि धर्मशास्त्राणामहिंसा परमो धर्म इति श्रुतम् । सर्वहिंसानिवृत्ताश्च नराः सर्वसहाश्च ये ।

सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥

एवं विश्वास्य स मार्जारस्तरुकोटरे स्थितः । ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति । अथ येषामपत्यानि खादितानि तैः शोकार्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा । तत्परिज्ञाय मार्जारः कोटरान्निःसृत्य पलायितः । पश्चात्पतत्रिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरं च अनेनैव शावकाः खादिता इति निश्चित्य मिलित्वा तैः पक्षिभिः स गृध्रो व्यापादितः । अतो ऽहं ब्रवीमि । अज्ञातकुलशीलस्येत्यादि ।

इत्याकर्ण्य स जम्बुकः सकोपमाह । मृगस्य प्रथमदर्शनदिने भवानप्यज्ञातकुलशील एवासीत् । तद्भवता सह कथमद्य यावदेतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्धते । अयं निजः परो वेति गणना लघुचेतसाम् ।

उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

यथा चायं मृगो मम बन्धुस्तथा भवानपि । मृगो ऽब्रवीत् । किमनेनोत्तरोत्तरेण । सर्वैरेकत्र विश्रम्भालापैः सुखमनुभवद्भिः स्थीयताम् ।

काकेनोक्तम् । एवमस्तु । अथ प्रातः सर्वे यथाभिमतदेशं गताः । एकदा निभृतं शृगालो ब्रूते । सखे मृग । एतस्मिन्नेव वनैकदेशे सस्यपूर्णं क्षेत्रमस्ति । तदहं त्वां तत्र नीत्वा दर्शयामि । तथा कृते सति मृगः प्रत्यहं तत्र गत्वा सस्यं खादति । अथ क्षेत्रपतिना तद्दृष्ट्वा पाशास्तत्र नियोजिताः । अनन्तरं पुनरागतो मृगस्तत्र चरन्पाशैर्बद्धो ऽचिन्तयत् । को मामितः कालपाशादिव व्याधपाशात्त्रातुं मित्रादन्यः समर्थः । अत्रान्तरे जम्बुकस्तत्रागत्योपस्थितो ऽचिन्तयत् । फलितं तावदस्माकं कपटप्रबन्धेन । मनोरथसिद्धिरपि बाहुल्यान्मे भविष्यति । एतस्योत्कृत्यमानस्य मांसासृगनुलिप्तान्यस्थीनि मयावश्यं प्राप्तव्यानि । स च मृगस्तं दृष्ट्वोल्लसितो ब्रूते । सखे छिन्धि तावन्मम बन्धनम् । सत्वरं त्रायस्व माम् ।

जम्बुकः पाशं मुहुर्मुहुर्विलोक्याचिन्तयत् । दृढबन्धनबद्धो ऽस्ति तावदयं मृगः । ब्रूते च । स्नायुनिर्मिताः पाशाः । तदद्य भट्टारकवारे कथमेतान्दन्तैः स्पृशामि ।

मित्र यदि नान्यथा मन्यसे तदा प्रभाते यत्त्वयोच्यते तन्मया कर्तव्यम् । इत्युक्त्वा तत्समीप आत्मानमाच्छाद्य स्थितः सः । अनन्तरं स काकः प्रदोषकाले मृगमनागतमवलोक्येतस्ततो ऽन्विष्य तथाविधं दृष्ट्वोवाच । सखे किमेतत् । मृगेणोक्तम् । अवधीरितसुहृद्वाक्यस्य फलमेतत् ।

काको ब्रूते । स शृगालः क्व । मृगेणोक्तम् । मन्मांसार्थी तिष्ठत्यत्रैव । काको ब्रूते । मित्र । उक्तमेव। उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम्

तं जनमसत्यसंधं भगवति वसुधे कथं वहसि ॥

अथ प्रभाते स क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशमागच्छन्काकेनावलोकितः । तमालोक्य काकेनोक्तम् । सखे मृग त्वमात्मानं मृतवत्संदर्श्य वातेनोदरं पूरयित्वा पादान्स्तब्धीकृत्य तिष्ठ । यदाहं शब्दं करोमि तदा त्वं सत्वरमुत्थाय पलायिष्यसि । मृगस्तथैव काकवचनेन स्थितः । ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेनावलोकितः । तथाविधं मृगमवलोक्यासौ आः स्वयंमृतो ऽयमित्युक्त्वा मृगं बन्धनान्मोचयित्वा पाशान्संवरितुं सयत्नो बभूव । ततः कियद्दूरे ऽन्तरिते क्षेत्रपतौ स मृगः काकस्य शब्दं श्रुत्वा ससंभ्रमः समुत्थाय पलायितः । तमुद्दिश्य तेन क्षेत्रपतिना प्रकोपात्क्षिप्तलगुडेन शृगालो व्यापादितः ॥

## ब्राह्मण-नकुल-कृष्णसर्पकथा

अस्त्युज्जयिन्यां माधवो नाम ब्राह्मणः। तस्य ब्राह्मणी प्रसूता। सा बालापत्यरक्षार्थं ब्राह्मणमवस्थाप्य स्नातुं गता। अथ ब्राह्मणस्य कृते राज्ञः पार्वणश्राद्धं दातुमाह्वानमागतम्।

तद्दृष्ट्वा ब्राह्मणः सहजदारिद्र्यादचिन्तयत्—यदि सत्वरं न गच्छामि तदान्यः कश्चिच्छ्राद्धं ग्रहीष्यति। उक्तञ्च—

आदेयस्य प्रदेयस्य कर्तव्यस्य च कर्मणः।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्॥

दारकस्य चात्र रक्षकः नास्ति। किं करोमि? यातु चिरकाल-पालितमिमं सुतनिर्विशेषं नकुलं दारकरक्षार्थं व्यवस्थाप्य गच्छामि। तथा कृत्वा गतः।

ततस्तेन नकुलेन बालकसमीपमागतः कृष्णसर्पो व्यापादितः खण्डितश्च। अथासौ नकुलो ब्राह्मणमायान्तमवलोक्य रक्त-विलिप्तमुखपादः सत्वरमुपगम्य ब्राह्मणस्य चरणयोर्लुलोठ। ततोऽसौ ब्राह्मणस्तथाविधं नकुलं दृष्ट्वा मम पुत्रोऽनेन भक्षित इत्यवधार्य तं व्यापादितवान्। अनन्तरं यावदसावुपसृत्य पश्यति ब्राह्मणस्तावद् बालकः सुप्तः सर्पश्च व्यापादितस्तिष्ठति।

योऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः।
स तथा तप्यते मूढो ब्राह्मणो नकुलाद् यथा॥

## ब्राह्मण-च्छाग-धूर्तत्रयकथा

अस्ति गौतमारण्ये प्रस्तुतयज्ञः कश्चित् ब्राह्मणो ग्रामान्तरात् छागमुपक्रीय स्कन्धे कृत्वा गच्छन् धूर्तत्रयेणावलोकितः। ततस्ते धूर्ताः—'यद्येष छागः केनाप्युपायेन लभ्यते तदा मतिप्रकर्षो भवति'—इत्यालोच्य प्रान्तरवृक्षत्रयतले क्रोशान्तरेण तस्य ब्राह्मण-स्यागमनं प्रतीक्ष्य वर्त्मन्युपविश्य स्थिताः। तत्रैकेन धूर्तेन गच्छन् स ब्राह्मणोऽभिहितः "भो ब्राह्मण किमिति त्वया कुक्कुरः स्कन्धेनोह्यते" विप्रेणोक्तम् "नायं श्वा किन्तु यज्ञच्छागः।" अनन्तरं पुनर्द्वितीयेन धूर्तेन क्रोशमानस्थितेन तदेवोक्तम्। तदाकर्ण्य ब्राह्मणश्छागं भूमौ निधाय मुहुर्मुहुर्निरीक्ष्य पुनः स्कन्धे कृत्वा दोलाय-मानमतिश्चलितः। तदनन्तरं पुनस्तृतीयधूर्तवचनं श्रुत्वा स विप्रो भ्रमं निश्चित्य छागं त्यक्त्वा स्नात्वा गृहं ययौ। छागश्च नीत्वा धूर्तैः खादितः।

आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनम्।
स एव वञ्च्यते तेन ब्राह्मणश्छागतो यथा॥

## चौरगर्दभश्वान-कथा

अस्ति वाराणस्यां कर्पूरपटो नाम रजकः । स चैकदाभिनववयस्कया कान्तया सह चिरात्केलिं कृत्वा निर्भरं प्रसुप्तः । तदनन्तरं द्रव्याणि हर्तुं तद्गृहं चौरः प्रविष्टः । तस्य प्राङ्गणे गर्दभो बद्धस्तिष्ठति कुक्कुरश्चोपविष्टः । तं चौरमवलोक्य गर्दभः श्वानमाह । तव तावदयं व्यापारः । तत्किमिति त्वमुच्चैः शब्दं कृत्वा स्वामिनं न जागरयसि । कुक्कुरो ब्रूते । मम नियोगस्यास्य चर्चा किं त्वया कर्तव्या । त्वमेव जानासि यथाहमेतस्याहर्निशं गृहरक्षां करोमि । यतो ऽयं चिरान्निर्वृतो ममोपयोगं न जानाति तेनाधुना ममाहारदाने ऽपि मन्दादरः । विना विधुरदर्शनं स्वामिनो ऽनुजीविषु मन्दादरा भवन्ति । गर्दभो ब्रूते । शृणु रे बर्बर ।

याचते कार्यकाले यः स किंभृत्यः स किंसुहृत् ।

कुक्कुरो ब्रूते । भृत्यान्संभावयेद्यस्तु कार्यकाले स किंप्रभुः ॥

किं च । आश्रितानां भृतौ स्वामिसेवायां धर्मसेवने ।
पुत्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः ॥

ततो गर्दभः सकोपमाह । आः पापीयांस्त्वं यः स्वामिकार्योपेक्षां करोषि । भवतु । यथा स्वामी जागर्ति तथा मया कर्तव्यम् । यतः ।

पृष्ठतः सेवयेदर्कं जठरेण हुताशनम् ।
स्वामिनं सर्वभावेन परलोकममायया ॥

इत्युक्त्वा स अतीव चीत्कारं कृतवान् । ततः स रजकस्तेन चीत्कारेण प्रबुद्धो निद्राविमर्दकोपादुत्थाय गर्दभं लगुडेन ताडयामास । अतो ऽहं ब्रवीमि ।

पराधिकारचर्चां यः कुर्यात्स्वामिहितेच्छया ।
स विषीदति चीत्कारात्ताडितो गर्दभो यथा ॥

## सिंहमूषिकबिडाल-कथा

अस्त्युत्तरापथे ऽर्बुदशिखरनाम्नि पर्वते महाविक्रमो नाम सिंहः । तस्य पर्वतकन्दरमधिशयानस्य केसराग्रं मूषिकः कश्चिच्छिनत्ति । स सिंहः केसराग्रं लूनं बुद्ध्वा कुपितो विवरान्तर्गतं मूषिकमलभमानो ऽचिन्तयत् । किं विधेयमत्र । भवतु । एवं श्रूयते ।

क्षुद्रशत्रुर्भवेद्यस्तु विक्रमान्न स लभ्यते ।
तं निहन्तुं पुरस्कार्यः सदृशस्तस्य सैनिकः ॥

इत्यालोच्य तेन ग्रामं गत्वा दधिकर्णनामा बिडालो मांसाद्याहारेण संतोष्य प्रयत्नादानीय स्वकन्दरे धृतः । ततस्तद्भयान्मूषिको बहिर्न निःसरति । तेनासौ सिंहो ऽक्षतकेसरः सुखं स्वपिति । मूषिकशब्दं यदा यदा शृणोति तदा तदा सविशेषं तं बिडालं मांसाहारदानेन संवर्धयति । अथैकदा स मूषिकः क्षुधा पीडितो बहिः संचरंस्तेन मार्जारेण प्राप्तो व्यापादितः खादितश्च । अनन्तरं स सिंहो यदा कदा चिदपि मूषिकशब्दं न शुश्राव तदोपयोगाभावात्तस्य बिडालस्याहारदाने मन्दादरो बभूव । अतो ऽहं ब्रवीमि ।

निरपेक्षो न कर्तव्यो भृत्यैः स्वामी कदा चन ।
निरपेक्षं प्रभुं कृत्वा भृत्यः स्याद्दधिकर्णवत् ॥

# मुनिमूषिक-कथा

अस्ति गौतमारण्ये महातपा नाम मुनिः । तेनाश्रमसंनिधाने मूषिकशावकः काकमुखाद्भ्रष्टो दृष्टः । ततो दयालुना तेन मुनिना नीवारकणैः स संवर्धितः । तं च मूषिकं खादितुमनुधावन्बिडालो मुनिना दृष्टः । पश्चात्तपःप्रभावात्तेन मुनिना मूषिको बलिष्ठो बिडालः कृतः । स बिडालः कुक्कुराद्बिभेति । ततोऽसौ कुक्कुरः कृतः । कुक्कुरस्य व्याघ्रान्महद्भयम् । तदनन्तरं स व्याघ्रः कृतः । अथ व्याघ्रमपि तं मूषिकनिर्विशेषं पश्यति मुनिः । अतः सर्वे तत्रस्था जनास्तं व्याघ्रं दृष्ट्वा वदन्ति । अनेन मुनिना मूषिकोऽयं व्याघ्रतां नीतः । एतच्छ्रुत्वा स व्याघ्रः सव्यथोऽचिन्तयत् । यावदनेन मुनिना जीवितव्यं तावदिदं मम स्वरूपाख्यानमकीर्तिकरं न पलायिष्यते । इति समालोच्य मुनिं हन्तुं समुद्यतः । ततो मुनिना तस्य चिकीर्षितं ज्ञात्वा पुनर्मूषिको भवेत्युक्त्वा मूषिक एव कृतः । अतोऽहं ब्रवीमि ।

नीचः श्लाघ्यपदं प्राप्य स्वामिनं लोप्तुमिच्छति ।
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ॥

# Раздел 4

# Индивидуальное творчество на санскрите. Калидаса

С появлением индивидуального творчества происходит осмысление его особенностей, развивается теоретическая поэтика.

Наибольшее распространение получает искусство театра, зародившееся из обрядовых народных игр, из широко распространенного публичного чтения эпических произведений.

Классический индийский театр складывается к середине I тысячелетия до н. э. В нем существуют уже определенные правила построения драмы (напр., число актов не менее пяти и не более десяти), обязательность благополучной развязки; установлены типажи, законы актерской игры и пр., вплоть до правил устройства здания театра. Все эти правила были изложены в трактате Бхараты[1] «Наука театра», nātiaçāstra (ср. dharmaçāstra, arthaçāstra). В том же трактате излагалась и теория художественного восприятия, учение о «раса» (rasa).

Индийский театр при его ориентированности на образованного зрителя, искушенного в знании законов сценического искусства и литературы прошлого, был доступен и широкому кругу зрителей. Персонажи говорили на санскрите и на пракритах, живых народных языках: на санскрите — цари, ученые люди, придворные, на пракритах — слуги, простой люд и женщины.

Наряду с драмой широкое распространение получают формы лиро-эпической поэзии, поэмы стиля kāvya.

Согласно законам индийской поэтики, сюжет как драм. так и поэм kāvya должен был браться из эпических произведений древности.

Обращаясь к текстам, являющимся плодом индивидуального творчества, мы должны иметь в виду еще два обстоятельства.

Во-первых, точных дат жизни автора и времени создания им определенного произведения древняя и средневековая индийская литература не знает. Возможной оказывается только относительная хронология.

Во-вторых, жизнь известных писателей и ученых была окружена множестовом легенд, рассказов, мифов, не дающих точных сведений об авторе, свидетельствующих, однако, его широкой известности.

[1]Бхарата — мифический мудрец, трактат под его именем обобщал труд нескольких поколений авторов.

Все это мы наблюдаем при знакомстве с творчеством великого средневекового д-матурга и поэта Калидасы. Данные относительно времени жизни Калидасы отсутству. По мнению большинства современных исследователей, он мог жить в IV–V в. н. э., в эп правления династии Гупта. Вокруг имени Калидасы возникли многочисленные леген Согласно некоторым из них, по рождению он был брахманом, но с раннего детства вос тывался в семье пастуха. В результате необыкновенного стечения обстоятельств глуп пастух женился на ученой принцессе, а поэтический талант получил от богини Кали (и «Калидаса» значит «раб Кали»).

Калидаса был придворным поэтом в «золотой век» развития индийской науки, иск ства и литературы. Правитель Чандрагупта II Викрамадитья покровительствовал учен и поэтам. Говорят о «девяти жемчужинах» при его дворе, о девяти поэтах и ученых, сре которых первым сияло имя Калидасы. Знатные покровители искусств ценили произве ния, посвященные описанию чувств и настроений, прославлению красот природы и же ской красоты. Ценили произведения, совершенные по форме и по стилю изложения. это они находили в произведениях Калидасы.

Ему приписывали большое число произведений, из которых Калидасе достоверно п надлежат драмы «Малявика и Агнимитра», «Узнанная (по кольцу) Щакунтала», «Му ством добытая Урваши» и три поэмы — «Род Рагху», «Рождение Кумары» и «Облако вестник». Спорным остался вопрос о принадлежности Калидасе лирической поэмы «В мена года».

Драма «Малявика и Агнимитра» считается самым ранним произведением Калида В ней говорится о любви царя Агнимитры к пленной танцовщице Малявике. Она оказ вается дочерью соседнего царя, и Агнимитра женится на ней.

Драма «Мужеством добытая Урваши» — это рассказ о любви царя Пурураваса к а саре Урваши. Она — небожительница, но любовь ее к царю — земное, человеческое ч ство, заставляющее Урваши покинуть небо и избрать жизнь на земле с любимым чел веком.

Остановимся подробнее на самом известном произведении Калидасы, отрывки из к торого включены в Книгу — драме «Узнанная (по кольцу) Щакунтала». Сюжет драмы з имствован (по законам индийской поэтики) из эпоса «Махабхарата» I песня, главы 62-6 По традиции драма начинается молитвой (nāndi), обращенной к богу Шиве. Действи предшествует, по законам индийской драмы, Пролог. В нем директор или руководите театра (sūtradhāraḥ) беседует с актрисой о предстоящем представлении. Постараемся д лее кратко передать сюжетную канву драмы.

Охотясь, царь Душьянта оказывается у обители отшельника Канвы. Там его встречает приемная дочь Канвы Щакунтала, которая в отсутствие отца оказывает царю знаки гостеприимства. Молодые люди полюбили друг друга. Царь предлагает Щакунтале вступить в гандхарвский брак (брак без свадебного обряда). Душьянта дарит Щакунтале на память кольцо. После отъезда царя она, охваченная новыми переживаниями, не замечает прихода в обитель отшельника Дурвасаса. Нарушен закон гостеприимства, и строгий отшельник проклинает Щакунталу — «тебя да не вспомнит ушедший...» Она не знает о проклятии, а ее подруги просят смягчить проклятие, и Дурвасас добавляет: «проклятие утратит силу, когда царь увидит кольцо». Возвратившийся в обитель Канва (kaçyapa) отправляет Щакунталу, которая ждет ребенка, к мужу. Царь не узнает Щакунталу, она в отчаянии: она потеряла кольцо. Между тем кольцо находит рыбак, которого обвиняют в краже царского подарка и несут кольцо царю. Тот вспоминает все прошлое. Он щедро награждает рыбака, находит Щакунталу и своего сына. Он молит о прощении. Щакунтала прощает царя, все счастливы, а их сын Бхарата становится прародителем знаменитого рода.

Внешне придерживаясь канонов индийской драмы и беря традиционно сюжет из эпического произведения, Калидаса вносит в эту драму реальную жизнь. Он расширяет круг действующих лиц и наполняет образы героев вечно живыми, волнующими человеческими чувствами. В Книге приводится Пролог, I действие и две сцены из IV действия — проклятие Дурвасаса и уход Щакунталы из обители. Речь женщин на пракритах дается в переводе на санскрит.

Поэтические произведения Калидасы — «Родословная Рагху» (raghuvaṁça) и «Рождение Кумары» (kumārasaṁbhava) — написаны в жанре mahākāvya, большой эпической поэмы, в которой воспеваются деяния богов и подвиги героев древности. Произведения mahākāvya называют «искусственным эпосом».

Поэма «Род Рагху» связана по содержанию с «Рамаяной». Рагху — один из предков Рамы. Поэма состоит из 19 песен и представляет собой историческую хронику царей «Солнечной династии». В описании подвигов Рагху Калидаса, возможно, воспел деяния своего покровителя Чандрогупты II.

Поэма «Рождение Кумары» основана на сложном мифологическом сюжете. Поэма состоит из 8 песен и Калидасой не завершена. Основная сюжетная линия начальных песен — судьба Парвати и сложный путь к ее браку с богом Шивой. С первых строк, посвященных Гималаям, и через всю поэму проходят описания величественной красоты индийской природы. Калидаса выступает в этой поэме как певец человеческих чувств и сказочно прекрасной природы своей страны.

Вершиной лирических творений Калидасы является поэма «Облако-вестник» (meg dūta). Она относится к жанру «малой поэмы» (khandakāvya).

До настоящего времени поэма пользуется в Индии популярностью. Она породила д особый жанр литературы — dūtakāvya.

Герой поэмы — якша. Якши — горные духи, хранители сокровищ бога богатств беры. Якша чем-то провинился перед богом и изгнан на год из города якшей Алаки, осталась его возлюбленная. Якша томится в разлуке с ней и, увидев у вершины горы об ко, просит его доставить весть любимой, чтобы поддержать ее. «Послушай, каким пу тебе придется лететь,» — говорит якша. Далее следует поэтическое описание пути об ка на север, — описание городов, лесов, рек, полей, над которыми оно должно пролет В конце следует описание Алаки, дома якши...

При изображении картин природы и чувств героя автор использует все богатство я ковых средств санскрита — эпитеты, сравнения, метафоры, многозначность слов, сло сложение...Возможно, Калидаса был знаком с теоретическим трактатом своего соврем ника Бхамахи «Поэтические украшения» (kāvyālaṁkāra).

Язык поэмы дает интереснейший материал для филологического исследования тек

Поэма невелика по объему и приводится в Книге полностью по изданию — S. K. De списког источников). Дополнительно полезно прочитать книгу В. Г. Эрмана «Калида изд. «Наука», М., 1976, а также:

С. Ф. Ольденбург «Несколько слов о Калидасе и его драмах и о сущности индийс поэзии» — вступительный очерк к книге «Калидаса. Драмы.», М., 1916;

В. А. Кочергина «Калидаса» — статья в сборнике к 80-летию акад. Ю. В. Рождест ского, М., 2007.

महाकवि-कालिदास-विरचितम्

# अभिज्ञानशाकुन्तलम्

## पात्र – परिचय *

| पुरुष | स्त्री |
|---|---|
| दुष्यन्त - नायक | शकुन्तला |
| सूत्रधार | अनसूया - तस्याः सखी |
| सूत | प्रियंवदा - तस्याः सखी |
| काश्यप - कण्व | गौतमी - तपस्विनी |
| तापसौ | नटी |

### प्रथमोऽङ्कः

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ १ ॥

[नान्द्यन्ते]

सूत्रधारः । अलमतिविस्तरेण । [नेपथ्याभिमुखमवलोक्य] आर्ये यदि नेपथ्यविधानमवसितं तदिहागम्यताम् ।

[प्रविश्य] नटी । आर्य इयमस्मि । आज्ञापयत्वार्यः को नियोगो अनुष्ठीयतामिति

सूत्र॰ । आर्ये अभिरूपभूयिष्ठा परिषदियम् । अद्य खलु कालिदासग्रथितवस्तुना नवेनाभिज्ञानशकुन्तलनाम्ना नाटकेनोपस्थातव्यमस्माभिः । तत्प्रतिपात्रमाधीयतां यत्नः ।

नटी । सुविहितप्रयोगतयार्यस्य न किमपि परिहास्यते ।

सूत्र॰ । [सस्मितम्] आर्ये कथयामि ते भूतार्थम् ।

आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥ २ ॥

नटी । एवं न्वेतत् । अनन्तरकरणीयमिदानीमाज्ञापयत्वार्यः ।

सूत्र॰ । आर्ये किमन्यदस्याः परिषदः श्रुतिप्रसादहेतोर्गीतादन्यत्करणीयमस्ति ।

नटी । अथ कतमं पुनरृतुं समाश्रित्य गास्यामि ।

सूत्र॰ । आर्ये नन्विममेव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमाश्रित्य गीयताम् । संप्रति हि

सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः ।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ॥ ३ ॥

---

* Указываются только те действующие лица, которые встречаются в приводимых сценах.

[1] – размер sragdharā $21 \times 4 = 84$ слога: $- - - - \smile - - | \smile \smile \smile \smile \smile \smile - | - \smile - - \smile - \underline{\smile} | (7 + 7 + 7)$.

[2] – размер āryā или gāthā, неровиый по числу слогов: $2 \times 12 + 18$ и 15 (в конце).

[3] – размер āryā или gāthā.

नटी । [गायति]

क्षणचुम्बितानि भ्रमरैः पश्यत सुकुमारकेसरशिखानि ।
अवतंसयन्ति सदयं शिरीषकुसुमानि प्रमदाः ॥ ४ ॥

सूत्र॰ । आर्ये साधु गीतम् । असौ हि रागापहृतचित्तवृत्तिरालिखित इव भाति सर्वतो रङ्गः । तत्कतमं प्रयोगमाश्रित्यैनमाराधयामः ।

नटी । ननु प्रथममेवार्येणाज्ञप्तमभिज्ञानशकुन्तलं नामापूर्वं नाटकमभिनीयतामिति ।

सूत्र॰ । आर्ये सम्यगवबोधितो ऽस्मि । अस्मिन्क्षणे विस्मृतं खलु मयैतत् । कुतः

तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुःषन्तः सारङ्गेणातिरंहसा ॥ ५ ॥

[इति निष्क्रान्तौ ॥ प्रस्तावना]

[ततः प्रविशति रथारूढः सशरचापहस्तो मृगमनुसरन्राजा सूतश्च]

सूतः । [राजानं मृगं चावलोक्य] आयुष्मन

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके ।
मृगानुसारिणं साक्षात्पश्यामीव पिनाकिनम् ॥ ६ ॥

राजा । सूत दूरममुना सारङ्गेण वयमाकृष्टाः । सो ऽयमिदानीम्

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
शष्पैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥ ७ ॥

। [सविस्मयम्] कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तः ।

सूतः । आयुष्मन् उद्घातिनी भूमिरिति रश्मिसंयमनाद्रथस्य मन्दीभूतो. वेगः । तेन मृग एष विप्रकृष्टः संवृत्तः । संप्रति समदेशवर्ती न ते दुरासदो भविष्यति ।

राजा । तेन हि विमुच्यन्तामभीषवः ।

सूतः । यथाज्ञापयत्यायुष्मान् [रथवेगं रूपयित्वा] आयुष्मन पश्य । एते हि

मुक्तेषु रश्मिषु निरायतपूर्वकायाः
स्वेषामपि प्रसरतां रजसामलङ्घ्याः ।
निष्कम्पचामरशिखाश्च्युतकर्णभङ्गा
धावन्ति वर्त्मनि तरन्ति नु वाजिनस्ते ॥ ८ ॥

राजा । [सहर्षम्] कथमतीत्य हरिणं हरयो वर्तन्ते । तथा हि

यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदर्धे विच्छिन्नं भवति कृतसंधानमिव तत् ।

---

४ — размер sragdharā.

५ — размер çloka или anuṣṭubh — строфа из двух шестнадцатисложных полустиший с цезурой после вось[мого]
слога: ⏓⏓⏓⏓|◡——⏓‖⏓⏓⏓⏓|◡—◡⏓.

६ — размер sragdharā.

७ — размер vasantatilakā (14 × 4 = 56): ——◡—◡◡◡—◡◡—◡——.

८ — размер āryā или gāthā, см. २.

प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-
र्न मे दूरे किंचित्क्षणमपि न पार्श्वे रथजवात् ॥ ९ ॥

नेपथ्ये । भो भो राजन् आश्रममृगो ऽयं न हन्तव्यो न हन्तव्यः ।

सूतः । [आकर्ण्यावलोक्य च] आयुष्मन् अस्य खलु ते बाणपातपथवर्तिनः कृष्ण-सारस्यान्तरायौ तपस्विनौ संवृत्तौ ।

राजा । [ससंभ्रमम्] तेन हि निगृह्यन्तामभीषवः ।

सूतः । यथाज्ञापयत्यायुष्मान् । [इति तथा करोति]

[ततः प्रविशति सशिष्यो वैखानसः]

वैखा° । [हस्तमुद्यम्य] भो भो राजन् आश्रममृगः खल्वयम् ।

न खलु न खलु बाणः संनिपात्यो ऽयमस्मि-
न्मृदुनि मृगशरीरे पुष्पराशाविवाग्निः ।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाताः सारपुङ्खाः शरास्ते ॥ १० ॥
तदाशु कृतसंधानं प्रतिसंहर सायकम् ।
आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि ॥ ११ ॥

राजा । [सप्रणामम्] एष प्रतिसंहृतः । [इति यथोक्तं करोति]

वैखा° । [सहर्षम्] सदृशमेवैतत्पुरुवंशप्रभवस्य नरेन्द्रप्रदीपस्य भवतः । सर्वथोभ-यचक्रवर्तिनं पुत्रमाप्नुहि ।

राजा । [सप्रणामम्] प्रतिगृहीतं ब्राह्मणवचः ।

तापसौ । राजन् समिदाहरणाय प्रस्थितावावाम् । एष चास्मद्गुरोः कण्वस्य साधिदैवत इव शकुन्तलयानुमालिनीतीरमाश्रमो दृश्यते । न चेदन्यकार्यातिपातः प्रविश्यात्र गृह्यतामतिथिसत्कारः । अपि च

धर्म्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समभिवीक्ष्य ।
ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति ॥ १२ ॥

राजा । अथ संनिहितस्तत्र कुलपतिः ।

तापसौ । इदानीमेव दुहितरमतिथिसत्कारायादिश्य दैवमस्याः प्रतिकूलं शम-यितुं सोमतीर्थं गतः ।

राजा । यद्येवं तामेव द्रक्ष्यामि । सैव विदितभक्तिं मां महर्षये निवेदयिष्यति ।

तापसौ । एवं साधयावस्तावत् । [इति सशिष्यो वैखानसो निष्क्रान्तः]

---

[९] – размер çikhariṇī (17 × 4 = 68): ⌣—————|⌣⌣⌣⌣⌣——⌣⌣⌣—(6 + 11).

[१०] – размер nāndīmukhī или mālinī(15 × 4 = 60): ⌣⌣⌣⌣⌣⌣——|—⌣——⌣—⏓(8 + 7).

[११] – размер çloka.

[१२] – размер āryā или gāthā.

राजा । सूत प्रेरयाश्वान् । पुण्याश्रमदर्शनेन तावदात्मानं पुनीमहे ।

सूतः । यथाज्ञापयत्यायुष्मान् । [इति भूयो रथवेगं रूपयति]

राजा । [समन्तादवलोक्य] अकथितो ऽपि ज्ञायत एव यथायमाभोगस्तपोवनस्य ।

सूतः । कथमिव ।

राजा । किं न पश्यसि । इह हि

नीवाराः शुककोटरार्भकमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः ।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिस्यन्दलेखाङ्किताः ॥ १३ ॥

अपि च

कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूला
भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन ।
एते चार्वागुपवनभुवि छिन्नदर्भाङ्कुरायां
नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति ॥ १४ ॥

सूतः । सर्वमुपपन्नम् ।

राजा । [स्तोकमन्तरं गत्वा] सूत आश्रमोपरोधो मा भूत्तदिहैव रथं स्थापय यावदवतरामि ।

सूतः । धृताः प्रग्रहाः । अवतरत्वायुष्मान् ।

राजा । [अवतीर्यात्मानमवलोक्य च] सूत विनीतवेषप्रवेश्यानि तपोवनानि । तदिदं तावद्गृह्यतामाभरणं धनुश्च । [इति सूतस्यार्पयति] यावदाश्रमवासिनः प्रत्यवेक्ष्य निवर्तिष्ये तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः ।

सूतः । यथाज्ञापयसि । [इति निष्क्रान्तः]

राजा । [परिक्रम्यावलोक्य च] इदमाश्रमपदं । यावत्प्रविशामि । [प्रविष्टकेन निमित्तं सूचयित्वा] अये

शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ॥ १५ ॥

नेपथ्ये । इत इतः प्रियसख्यौ ।

राजा । [कर्णं दत्त्वा] अये दक्षिणेन वृक्षवाटिकामालाप इव श्रूयते । भवतु । अवगच्छामि । [परिक्रम्यावलोक्य च] अये एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयो दातुमित एवाभिवर्तन्ते । अहो मधुरमासां दर्शनम् ।

---

[१३] — размер çārdūlavikrīḍita (19 × 4 = 76): – – – ⏑ ⏑ – ⏑ – ⏑ ⏑ ⏑ – | – – ⏑ – – ⏑ ⏓ (12 + 7).

[१४] — размер mandākrāntā (17 × 4 = 68): – – – – | ⏑ ⏑ ⏑ ⏑ ⏑ – | – ⏑ – – ⏑ – ⏓ (4 + 6 + 7).

[१५] — размер āryā или gāthā.

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥ १६ ॥

यावदेतां छायामाश्रितः प्रतिपालयामि । [इति विलोकयन्स्थितः]

[ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला]

एका । सखि शकुन्तले त्वत्तो ऽपि तातकण्वस्याश्रमवृक्षाः प्रिया इति तर्कयामि । येन नवमालिकाकुसुमपरिपेलवापि त्वमेतेष्वालवालपूरणेषु नियुक्ता ।

शकुन्तला । सखि अनसूये न केवलं तातस्य नियोगो ममापि सहोदरस्नेह एतेषु ।

[इति वृक्षसेचनं नाटयति]

प्रियंवदा । सखि शकुन्तले उदकं लम्भिता एते ग्रीष्मकालकुसुमदायिन आश्रमवृक्षाः । इदानीमतिक्रान्तकुसुमसमयानपि वृक्षान्सिञ्चामः । तेनानभिसन्धिगुरुर्धर्मो भविष्यति ।

शकु॰ । सखि रमणीयं मन्त्रयसि । [इति भूयो वृक्षसेचनं नाटयति]

राजा । [आत्मगतम्] कथमियं सा कण्वदुहिता शकुन्तला । [सविस्मयम्] अहो असाधुदर्शी तत्रभवान्कण्वो य इमां वल्कलधारणे नियुङ्क्ते ।

इदं किलाव्याजमनोहरं वपु-
स्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥ १७ ॥

भवतु पादपान्तरितो विश्वस्तां तावदेनां पश्यामि । [इत्यपवार्य स्थितः]

शकु॰ । सखि अनसूये अतिपिनद्धेनामुना वल्कलेन प्रियंवदया दृढं पीडितास्मि । तच्छिथिलय तावदेनत् । [अनसूया शिथिलयति]

प्रियं॰ । [सहासम्] अत्र तावत्पयोधरविस्तारयितारमात्मनो यौवनारम्भमुपालभस्व ।

राजा । सम्यगियमाह ।

इदमुपहितसूक्ष्मग्रन्थिना स्कन्धदेशे
स्तनयुगपरिणाहाच्छादिना वल्कलेन ।
वपुरभिनवमस्याः पुष्यति स्वां न शोभां
कुसुममिव पिनद्धं पाण्डुपत्रोदरेण ॥ १८ ॥

अथवा काममप्रतिरूपमस्य वयसो वल्कलं न पुनरलङ्कारश्रियं न पुष्यति । कुतः

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।

---

16 – размер āryā или gāthā.

17 – размер vaṅçasthabila (12 × 4 = 48): ◡–◡––◡◡–◡–◡⏓.

18 – размер nāndīmukhī или mālinī.

इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥ १९ ॥

शकु॰ । [अग्रतो ऽवलोक्य] सख्यौ एष वातेरितपल्लवाङ्गुलीभिः किमपि व्याहरतीव मां चूतवृक्षः । तद्यावदेनं संभावयामि । [इति तथा करोति]

प्रियं॰ । सखि शकुन्तले इहैव मुहूर्तं तिष्ठ ।

शकु॰ । किं निमित्तम् ।

प्रियं॰ । त्वया समीपस्थितया लतासनाथ इवायं चूतवृक्षः प्रतिभाति ।

शकु॰ । अत एव प्रियंवदेत्युच्यसे ।

राजा । अवितथमाह प्रियंवदा । तथा ह्यस्याः

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु संनद्धम् ॥ २० ॥

अनसूया । सखि शकुन्तले इयं स्वयंवरवधूः सहकारस्य त्वया कृतनामधेया वनज्योत्स्नेति नवमालिका ।

शकु॰ । [उपगम्यावलोक्य च सहर्षम्] सखि रमणीयः खल्वेतस्य पादपमिथुनस्य व्यतिकरः संवृत्तः । इयं नवकुसुमयौवना नवमालिकायं च बद्धफलतयोपभोगक्षमः सहकार इति ।
[इति पश्यन्ती तिष्ठति]

प्रियं॰ । [सस्मितम्] अनसूये जानासि किं निमित्तं शकुन्तला वनज्योत्स्नामतिमात्रं प्रेक्षत इति ।

अन॰ । न खलु विभावयामि । कथय ।

प्रियं॰ । यथा वनज्योत्स्ना सदृशेन पादपेन संगता तथा नामाहमप्यात्मनो ऽनुरूपं वरं लभेयमिति ।

शकु॰ । एष नूनं तवात्मगतो मनोरथः । [इति कलशमावर्जयति]

अन॰ । सखि शकुन्तले इयं तातकण्वेन त्वमिव स्वहस्तसंवर्धिता माधवीलता । इमां विस्मृतासि ।

शकु॰ । तदात्मानमपि विस्मरिष्यामि । आश्चर्यं- [लतामुपेत्यावलोक्य च सहर्षम्] आश्चर्यं प्रियंवदे प्रियं ते निवेदयामि ।

प्रियं॰ । सखि किं मे प्रियम् ।

शकु॰ । असमये खल्वेषा मूलान्मुकुलिता माधवीलता ।

उभे । [सत्वरमुपगम्य] सखि सत्यं सत्यम् ।

शकु॰ । सत्यं किं न प्रेक्षेथे ।

प्रियं॰ । [सहर्षं निरूप्य] तेन हि प्रतिप्रियं ते निवेदयामि । आसन्नपाणिग्रहणासि त्वम् ।

---

१९ — размер nāndīmukhī или mālinī

२० — размер āryā или gāthā.

शकु° । [सासूयम्] नूनमेष त आत्मगतो मनोरथः ।

प्रियं° । न खलु परिहासेन भणामि । श्रुतं खलु मया तातकण्वस्य मुखात्तव कल्याणसूचकमेतन्निमित्तमिति ।

अन° । प्रियंवदे अत एव शकुन्तला सस्नेहा माधवीलतां सिञ्चति ।

शकु° । यतो भगिनी मे भवति ततः किमिति न सेक्ष्यामि । [इति कलशमावर्जयति]

राजा । अपि नाम कुलपतेरियमसवर्णक्षेत्रसंभवा भवेत् । अथवा कृतं संदेहेन ।

असंशयं क्षत्रपरिग्रहक्षमा
यदार्यमस्यामभिलाषि मे मनः ।
सतां हि संदेहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः ॥ २१ ॥

तथापि तत्त्वत एनामुपलप्स्ये ।

शकु° । [ससंभ्रमम्] अहो नवमालिकामुज्झित्वा वदनं मे मधुकरो ऽभिलषति ।
[इति भ्रमरबाधां रूपयति]

राजा । [सस्पृहम्]

यतो यतः षट्चरणो ऽभिवर्तते
ततस्ततः प्रेरितवामलोचना ।
विवर्तितभ्रूरियमद्य शिक्षते
भयादकामापि हि दृष्टिविभ्रमम् ॥ २२ ॥

अपि च [सासूयमिव]

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।
करं व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती ॥ २३ ॥

शकु° । सख्यौ परित्रायेथां मामनेन दुष्टमधुकरेणाभिभूयमानाम् ।

उभे । [सस्मितम्] के आवां परित्राणे । अत्र तावद्दुःषन्तं स्मर यतो राजरक्षितानि तपोवनानि ।

राजा । अवसरः खल्वयमात्मानं दर्शयितुम् । न भेतव्यम् [इत्यर्धोक्ते ऽपवार्य] एवं राजाहमिति परिज्ञानं भवेत् । भवतु । अतिथिसमाचारमवलम्बिष्ये ।

शकु° । नैष दुर्विनीतो विरमति । तदन्यतो गमिष्यामि । हा धिक् हा [पदान्तरे सदृष्टिक्षेपम्] धिक् कथमितो ऽपि मामनुसरति । तत्परित्रायेथां माम् ।

राजा । [सत्वरमुपगम्य] आः

---

[21] – размер viñçasthabila.

[22] – размер viñçasthabila.

[23] – размер çikhariṇī.

कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम् ।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ॥ २४ ॥

[सर्वा राजानं दृष्ट्वा किंचिदिव संभ्रान्ताः]

अन॰ । आर्य न किमप्यत्याहितं किं त्वियमावयोः प्रियसखी मधुकरेणाकुलीक्रियमाणा कातरीभूता । [इति शकुन्तलां दर्शयति]

राजा [शकुन्तलामुपेत्य] अयि तपो वर्धते । [शकुन्तला ससाध्वसावनतमुखी तिष्ठति]

अन॰ । इदानीमतिथिविशेषलाभेन ।

प्रियं॰ । स्वागतमार्यस्य । सखि शकुन्तले गच्छोटजात्फलमिश्रमर्घ्यमुपहरेदमपि पादोदकं भविष्यति ।

राजा । भवति सूनृतयैव वाचा कृतमातिथ्यम् ।

अन॰ । तेन ह्यस्यां स्वभावशीतलायां सप्तपर्णवेदिकायामुपविश्य परिश्रममपनयत्वार्यः ।

राजा । ननु यूयमप्यनेन धर्मकर्मणा परिश्रान्ताः । तन्मुहूर्तमुपविशत ।

प्रियं॰ । [जनान्तिकम्] सखि शकुन्तले उचितं नो ऽतिथिपर्युपासनम् । तदेहि उपविशाम ।

[इति सर्वा उपविशन्ति]

शकु॰ । [आत्मगतम्] किं नु खल्विमं जनं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयास्मि संवृत्ता ।

राजा । [सर्वा अवलोक्य] अहो समानवयोरूपरमणीयं सौहार्दमत्रभवतीनाम् ।

प्रियं॰ । [जनान्तिकम्] सखि अनसूये को नु खल्वेष दुरवगाहगम्भीराकृतिर्मधुरमालपन्प्रभुत्वदाक्षिण्यं विस्तारयति ।

अन॰ । सखि ममापि कौतूहलम् । प्रक्ष्यामि तावदेनम् [प्रकाशम्]
आर्यस्य मधुरालापजनितो विश्रम्भो मामालापयति । कतमः पुनरार्येण राजर्षिवंशो ऽलंक्रियते । कतमो वा देशो विरहपर्युत्सुकः क्रियते । किं निमित्तं वार्येण सुकुमारेण तपोवनागमनपरिश्रम आत्मोपनीत इति ।

शकु॰ । [आत्मगतम्] हृदय मोत्ताम्य । यत्त्वया चिन्तितं तदनसूया मन्त्रयति ॥

राजा । [स्वगतम्] कथमिदानीमात्मानं निवेदयामि कथं चात्मनः परिहारं करोमि । [विचिन्त्य] भवत्वेवं तावत् । [प्रकाशम्] । भवति वेदविद्स्मि राज्ञः पौरवस्य नगरधर्माधिकारे नियुक्तः पुण्याश्रमदर्शनप्रसङ्गेन धर्मारण्यमिदमायातः ।

अन॰ । सनाथा धर्मचारिणः । [शकुन्तला शृङ्गारलज्जां नाटयति]

सख्यौ । [उभयोराकारं विदित्वा जनान्तिकम्] सखि शकुन्तले यद्यत्र तात इह संनिहितो भवेत् ।

शकु॰ । ततः किं भवेत् ।

उभे । ततो जीवितसर्वस्वेनापीममतिथिविशेषं कृतार्थं करोति ।

२४ — размер āryā или gāthā.

शकु० । [सकृतककोपम्] अपेतं किमपि हृदये कृत्वा मन्त्रयेथे । न वां वचनं श्रोष्यामि ।

राजा । वयमपि तावद्भवत्यौ सखीगतं किंचित्पृच्छामः ।

उभे । आर्य अनुग्रहे ऽभ्यर्थना ।

राजा । तत्रभवान्कण्वः शाश्वते ब्रह्मणि वर्तते इयं च वः सखी तदात्मजेति कथमेतत् ।

अन० । शृणोत्वार्यः । अस्ति कौशिक इति गोत्रनामधेयो महाप्रभावो राजर्षिः ।

राजा । स खलु भगवान्कौशिकः ।

अन० । तं सख्याः प्रभवमवगच्छ । उज्झितशरीरसंवर्धनया पुनस्तातकण्वो ऽस्याः पिता ।

राजा । उज्झितशब्देन जनितं नः कुतूहलम् । तदा मूलाच्छ्रोतुमिच्छामः ।

अन० । शृणोत्वार्यः । पुरा किल तस्य राजर्षेरुग्रे तपसि वर्तमानस्य कथमपि जातशङ्कैर्देवैर्मेनका नामाप्सरा नियमविघ्नकारिणी प्रेषिता ।

राजा । अस्त्येतदन्यसमाधिभीरुत्वं देवानाम् । ततस्ततः ।

अन० । ततो वसन्तावताररमणीये समये उन्मादयत्तस्या रूपं प्रेक्ष्य ।

[इत्यर्धोक्ते लज्जां नाटयति]

राजा । पुरस्तादवगम्यत एव । सर्वथाप्सरःसंभवैषा ।

अन० । अथ किम् ।

राजा । उपपद्यते ।

मानुषीभ्यः कथं नु स्यादस्य रूपस्य संभवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥ २५ ॥

[शकुन्तला सव्रीडाधोमुखी तिष्ठति]

राजा । [आत्मगतम्] हन्त लब्धावकाशो मे मनोरथः ।

प्रियं० । [सस्मितं शकुन्तलां विलोक्य] पुनरपि वक्तुकाम इवार्यः ।

[शकुन्तला सखीमङ्गुल्या तर्जयति]

राजा । सम्यगुपलक्षितं भवत्या । अस्ति नः सुचरितश्रवणलोभादन्यदपि प्रष्टव्यम् ।

प्रियं० । तेन ह्यलं विचारितेन । अनियन्त्रणानियोगः खलु तपस्विजनः ।

राजा । एतत्पृच्छामि ।

वैखानसं किमनया व्रतमा प्रदानाद्
व्यापाररोधि मदनस्य निषेवितव्यम् ।
अत्यन्तमेव सदृशेक्षणवल्लभाभि-
राहो निवत्स्यति समं हरिणाङ्गनाभिः ॥ २६ ॥

---

…размер çloka.

…азмер vasantatilakā.

प्रियं॰ । आर्य धर्माचरणपरवशो ऽयं जनः । गुरोः पुनरस्या अनुरूपवरप्रदाने संकल्पः ।

राजा । [आत्मगतं सहर्षम्]

भव हृदय साभिलाषं संप्रति संदेहनिर्णयो जातः ।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ॥ २७ ॥

शकु॰ । [सरोषमिव] अनसूये गमिष्याम्यहम् । ।

अन॰ । किं निमित्तम् ।

शकु॰ । इमामसंबद्धप्रलापिनीं प्रियंवदामार्यायै गौतम्यै गत्वा निवेदयिष्यामि । [इत्युत्तिष्ठति]

अन॰ । सखि न युक्तमाश्रमवासिनो जनस्याकृतसत्कारमतिथिविशेषमुज्झित्वा स्वच्छन्दतो गमनम्

[शकुन्तलोत्तरमदत्त्वैव प्रस्थिता]

राजा । [अपवार्य] कथं गच्छति । [उत्थाय जिघृक्षुरिवेच्छां निगृह्य] अहो चेष्टाप्रतिरूपिका कामिजनमनोवृत्तिः । अहं हि

अनुयास्यन्मुनितनयां सहसा विनयेन वारितप्रसरः ।
स्वस्थानादचलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥ २८ ॥

प्रियं॰ । [शकुन्तलामुपेत्य] सखि चण्डि न लभ्यते ऽगन्तुम् ।

शकु॰ । [परिवृत्य सभ्रूभङ्गम्] किमिति ।

प्रियं॰ । द्वे मे वृक्षसेचनके धारयसि । ताभ्यां तावदात्मानं मोचय । ततो गमिष्यसि ।

[इति बलान्निवर्तयति]

राजा । भवति वृक्षसेचनादेवात्रभवतीं परिश्रान्तामवगच्छामि । तथा ह्यस्याः

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः ।
बद्धं कर्णशिरीषरोधि वदने घर्माम्भसा जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुला मूर्धजाः ॥ २९ ॥

तदहमेनामनृणां करोमि । [इत्यङ्गुरीयकं ददाति । सख्यौ प्रतिगृह्य नामाक्षराणि वाचयित्वा परस्परमवलोकयतः]

राजा । अलमन्यथासंभावनया । राज्ञः प्रतिग्रहो ऽयम् ।

प्रियं॰ । तेन हि नार्हतीममङ्गुरीयवियोगं कर्तुमार्यः । आर्यस्य वचनादेवानृणीया भवतु ।

अन॰ । सखि शकुन्तले मोचितास्यनुकम्पिनार्येणाथवा राजर्षिणा । तत्क्वेदानीं गमिष्यसि ।

शकु॰ । [आत्मगतम्] नैतं परिहरिष्यामि यद्यात्मनः प्रभवेयम् ।

---

२७ — размер āryā или gāthā.

२८ — размер āryā или gāthā.

२९ — размер çārdūlavikrīḍita

प्रियं॰ । किं सांप्रतं न गम्यते ।

शकु॰ । इदानीमपि किं तवायत्तास्मि । यदा मे रोचते तदा गमिष्यामि ।

राजा । [शकुन्तलां विलोकयन्नात्मगतम्] किं नु खलु यथा वयमस्यामेवमियमप्यस्मान्प्रति स्यात् । अथवा लब्धावकाशा मे मनोवृत्तिः ।

वाचं न मिश्रयति यद्यपि मद्वचोभिः
कर्णं ददात्यवहिता मयि भाषमाणे ।
कामं न तिष्ठति मदाननसंमुखीयं
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः ॥ 30 ॥

नेपथ्ये । भो भोस्तपस्विनः । तपोवनसंनिहितसत्त्वरक्षणाय सज्जीभवन्तु भवन्तः । प्रत्यासन्नः किल मृगयाविहारी पार्थिवो दुःषन्तः ।

तुरगखुरहतस्तथा हि रेणु-
र्विटपनिषक्तजलार्द्रवल्कलेषु ।
पतति परिणतारुणप्रकाशः
शलभसमूह इवाश्रमद्रुमेषु ॥ ३१ ॥

राजा । [स्वगतम्] अहो धिङ्मदन्वेषिणः सैनिकास्तपोवनमनुरुन्धन्ति ।

पुनर्नेपथ्ये । भो भोस्तपस्विनः । पर्याकुलीकुर्वन्वृद्धस्त्रीकुमारानेष प्राप्तः ।

तीव्राघातादभिमुखतरुस्कन्धभग्नैकदन्तः
प्रौढाकृष्टव्रततिवलयासङ्गमाज्जातपाशः ।
मूर्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्मारण्यं विशति गजः स्यन्दनालोकभीतः ॥ ३२ ॥

[सर्वाः श्रुत्वा ससंभ्रममुत्तिष्ठन्ति]

राजा । [स्वगतम्] अहो धिक्कथमपराद्धस्तपस्विनामस्मि । भवतु । प्रतिगच्छामि तावत् ।

सख्यौ । महाभाग अनेन हस्तिसंभ्रमेण पर्याकुलाः स्मः । तदनुजानीहि न उटजगमने ।

अन॰ । सखि शकुन्तले पर्याकुलाया गौतमी भविष्यति । तदेहि शीघ्रमेकस्था भवामः ।

शकु॰ । [गतिसंरोधं रूपयित्वा] हा धिक् हा धिक् ऊरुस्तम्भविक्लवास्मि संवृत्ता ।

राजा । धीरं धीरं गच्छन्तु भवत्यः । वयमप्याश्रमबाधा यथा न भवति तथा प्रयतिष्यामहे ।

सख्यौ । महाभाग विदितभूयिष्ठो ऽसि । ननु सांप्रतं यदुपचारमध्यस्थतयापराद्धाः स्मस्तन्मर्षयेः

---

३० – размер vasantatilakā.

३१ – размер puṣpitāgrā 2 × 16(15) + 18(17) мор.

३२ – размер mandākrāntā.

असंभावितसत्कारं भूयो ऽपि प्रत्यवेक्षणनिमित्तं सपरिहारमार्यं विज्ञापयामः ।

राजा । मा मैवम् । दर्शनेनैष भवतीनां पुरस्कृतो ऽस्मि ।

शकु° । अनसूये अभिनवकुशसूचिपरिक्षतं मे चरणं कुरुबकशाखापरिलग्नं च मे वल्कलम् । तत्प्रतिपालयतं मां यावदेनन्मोचयामि ॥

[इति राजानमवलोकयन्ती सह सखीभ्यां निष्क्रान्ता]

राजा । [निःश्वस्य] गताः सर्वाः । भवतु । अहमपि गच्छामि । शकुन्तलादर्शनादेव मन्दौत्सुक्यो ऽस्मि नगरगमनं प्रति । यावदनुयात्रिकानविदूरे तपोवनस्य निवेशयामि । न खलु शक्तो ऽस्मि शकुन्तलाव्यापारादात्मानं निवर्तयितुम् । कुतः ।

गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः ।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥ ३३ ॥

[इति निष्क्रान्ताः सर्वे]

॥ इति श्रीकालिदासकृते ऽभिज्ञानशकुन्तलानाम्नि नाटके प्रथमो ऽङ्कः ॥

# चतुर्थोऽङ्कः

[ ततः प्रविशतः कुसुमावचयं नाटयन्त्यौ सख्यौ ]

## दुर्वाससः शापः

अनसूया। प्रियंवदे, यद्यपि गान्धर्वेण विधिना निर्वृत्तकल्याणा शकुन्तलानुरूपभर्तृगामिनी संवृत्तेति निर्वृतं मे हृदयम्, तथाप्येतावच्चिन्तनीयम्।

प्रियंवदा। कथमिव।

अनसूया। अद्य स राजर्षिरिष्टिं परिसमाप्य ऋषिभिर्विसर्जित आत्मनो नगरं प्रविश्यान्तःपुरसमागत इतोगतं वृत्तान्तं स्मरिष्यति वा न वेति।

प्रियंवदा। विस्रब्धा भव। न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति। तात इदानीमिमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यत इति।

अनसूया। यथाहं पश्यामि तथा तस्यानुमतं भवेत्।

प्रियंवदा। कथमिव ?

---

[33] — размер āryā или gāthā.

अनसूया। शक्यमिदानीमाश्वसितुम्। अस्ति तेन राजर्षिणा संप्रस्थितेन स्वनामधेयाङ्कितम् अङ्गुलीयकं स्मरणीयमिति स्वयं पिनद्धम्। तस्मिन् स्वाधीनोपाया शकुन्तला भविष्यति।

प्रियंवदा। सखि, एहि। देवकार्यं तावन्निर्वर्तयावः। (इति परिक्रामतः।)

प्रियंवदा। (विलोक्य) अनसूये, पश्य तावत्। वामहस्तोपहितवदनालिखितेव प्रियसखी। भर्तृगतया चिन्तयात्मानमपि नैषा विभावयति, किं पुनरागन्तुकम्।

अनसूया। प्रियंवदे, द्वयोरेवावयोर्मुख एष वृत्तान्तस्तिष्ठतु। रक्षितव्या खलु प्रकृतिपेलवा प्रियसखी।

प्रियंवदा। को नामोष्णोदकेन नवमालिकां सिञ्चति!

---

## शकुन्तलायाः पतिगृहप्रयाणम्

(कण्वमुन्याश्रमः। शकुन्तला आसनस्था। गौतमी स्थिता। अनसूयाप्रियंवदे नाट्येन शकुन्तलाम् अलंकुरुतः।)

(ततः प्रविशति स्नानोत्तीर्णः काश्यपः।)

**काश्यपः**—यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,
कण्ठः स्तम्भित-बाष्पवृत्ति कलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥१॥

(इति परिक्रामति)

**सख्यौ**—हला शकुन्तले! अवसितमण्डनासि। परिधत्स्व साम्प्रतं क्षौमयुगलम्।

(शकुन्तलोत्थाय परिधत्ते।)

**गौतमी**—जाते! एष त आनन्दबाष्पपरिवाहिणा चक्षुषा परिष्वजमान इव गुरुरुपस्थितः। आचारं तावत्प्रतिपद्यस्व।

**शकुन्तला**—(सव्रीडम्) तात! वन्दे।

**काश्यपः**—वत्से!

ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥२॥

**गौतमी**—भगवन्, वरः खल्वेषः, नाशीः।

**काश्यपः**—(सदृष्टिक्षेपम्) क्व ते शार्ङ्गरव-शारद्वतमिश्राः?

(प्रविश्य)

अनसूया। गुणवते कन्यका प्रतिपादनीयेत्ययं तावत् तातस्य प्रथमः सङ्कल्पः। तं यदि दैवमेव सम्पादयति, नन्वप्रयासेन कृतार्थो गुरुजनः।

प्रियंवदा। एवमेतत्। (पुष्पभाजनं विलोक्य) सखि, अवचितानि बलिकर्मपर्याप्तानि कुसुमानि।

अनसूया। ननु सख्याः शकुन्तलायाः सौभाग्यदेवतार्चनीया।

प्रियंवदा। युज्यते।

(इति तदेव कर्मारभेते।)

(नेपथ्ये) अयमहं भोः!

अनसूया। (कर्णं दत्त्वा) सखि, अतिथीनामिव निवेदितम्।

प्रियंवदा। ननूटजसन्निहिता शकुन्तला। (आत्मगतम्) अद्य पुनर्हृदयेनासन्निहिता।

अनसूया। भवतु, अलमेतावद्भिः कुसुमैः।

(इति प्रस्थिते।)

(नेपथ्ये) आः, अतिथिपरिभाविनि,

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्,
कथां प्रमत्तः प्रथमं कृतामिव॥

प्रियंवदा। हा धिक्! हा धिक्! अप्रियमेव संवृत्तम्। कस्मिन्नपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला। (पुरोऽवलोक्य) न खलु यस्मिन् कस्मिन्नपि। एष दुर्वासाः सुलभकोपो महर्षिः। तथा शप्त्वा वेगबलोत्फुल्लया दुर्वारया गत्या प्रतिनिवृत्तः।

अनसूया। गच्छ। पादयोः प्रणम्य निवर्तयैनम्, यावदहमर्घ्योदकम् उपकल्पयामि।

प्रियंवदा। तथा। (इति निष्क्रान्ता।)

अनसूया। (पदान्तरे स्खलितं निरूप्य) अहो आवेगस्खलितया गत्या प्रभ्रष्टं ममाग्रहस्तात् पुष्पभाजनम्! (इति पुष्पोच्चयं रूपयति।)

प्रियंवदा। (प्रविश्य) सखि, प्रकृतिवक्रः स कस्यानुनयं प्रतिगृह्णाति? किमपि पुनः सानुक्रोशः कृतः।

अनसूया। (सस्मितम्) तस्मिन् बह्वेतदपि। तत् कथय कथं त्वया प्रसादितः।

प्रियंवदा। यदा निवर्तितुं नेच्छति तदा विज्ञापितो मया। भगवन्, प्रथम इति प्रेक्ष्याविज्ञाततपःप्रभावस्य दुहितृजनस्य भगवतैकोऽपराधो मर्षयितव्य इति।

अनसूया। ततस्ततः।

प्रियंवदा। ततो मे वचनमन्यथा भवितुं नार्हति, किन्त्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यत इति मन्त्रयमाणः स्वयमन्तर्हितः।

शिष्याः—भगवन्, इमौ स्वः ।

काश्यपः—भगिन्याः मार्गमादेशयतम् ।

शार्ङ्गरवः—इत इतो भवती ।

(सर्वे परिक्रामन्ति ।)

काश्यपः—भो भोः सन्निहितवनदेवतास्तपोवनतरवः !

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या,
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ॥
आद्ये वः कुसुमप्रवृत्तिसमये यस्या भवत्युत्सवः ।
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥३॥

(कोकिलरवं सूचयित्वा ।)

(सर्वे सविस्मयमाकर्णयन्ति ।)

गौतमी—जाते, ज्ञातिजनस्निग्धाभिरनुज्ञातगमनासि तपोवन-देवताभिः । प्रणम भगवतीः ।

शकुन्तला—(सप्रणामं परिक्रम्य । काश्यपं प्रति) तात एषोटज-पर्यन्तचारिणी गर्भमन्थरा मृगवधूर्यदा सुखप्रसवा भवति तदा मह्यं कमपि प्रियनिवेदयितृकं विसर्जयिष्यसि ।

काश्यपः—नेदं विस्मरिष्यामः ।

शकुन्तला—वत्स, किं सहवासपरित्यागिनीं मामनुसरसि । अचिर-प्रसूतया जनन्या विना वर्धित एव । इदानीमपि मया विरहितं त्वां तातश्चिन्तयिष्यति । निवर्तस्व तावत् ।

(इति रुदति, प्रस्थिता)

शार्ङ्गरवः—भगवन्, ओदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते । तदिदं सरस्तीरम् । अत्र संदिश्य प्रतिगन्तुमर्हति ।

काश्यपः—तेन हीमां क्षीरवृक्षच्छायामाश्रयामः ।

(सर्वे परिक्रम्य स्थिताः ।)

काश्यपः—शार्ङ्गरव, इति त्वया मद्वचनात्स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः—

शार्ङ्गरवः—आज्ञापयतु भगवान् ।

काश्यपः—अस्मान्साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन—

स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया,
भाग्याधीनमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥४॥

शार्ङ्गरवः—न खलु धीमतां कश्चिदविषयो नाम ।

काश्यपः—सा त्वमितः पतिकुलं प्राप्य—

शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी,
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥५॥

कथं वा गौतमी मन्यते ?

गौतमी—एतावान्वधूजनस्योपदेशः । जाते एतत्खलु सर्वमवधारय ।

काश्यपः—वत्से, परिष्वजस्व मां सखीजनं च ।

शकुन्तला—तात, इत एव किं प्रियंवदानसूये सख्यौ निर्वर्तिष्येते ।

काश्यपः—वत्से, इमे अपि प्रदेये । न युक्तमनयोरतत्र गन्तुम् । त्वया सह गौतमी यास्यति ।

शकुन्तला—(पितरमाश्लिष्य) कथमिदानीं तातस्याङ्कात्परिभ्रष्टा मलयतटोन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि ।

काश्यपः—वत्से, किमेवं कातरासि ?

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे,
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।
तनयमचिरात्प्राचीवार्कं प्रसूय च पावनं,
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥६॥

(शकुन्तला पितुः पादयोः पतति ।)

काश्यपः—यदहमिच्छामि ते तदस्तु ।

शकुन्तला—(सख्यावुपेत्य) हला । द्वे अपि मां सममेव परिष्वजेथाम् ।

सख्यौ—(तथा कृत्वा) सखि, यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत् ततस्तस्मायिदमात्मनामधेयाङ्कितम् अङ्गुलीयकं दर्शय ।

शकुन्तला—अनेन वां संदेशेन कम्पितं मे हृदयम् ।

सख्यौ—मा भैषीः । अतिस्नेहः पापशंकी ।

शार्ङ्गरवः—दूरमधिरूढः सविता । त्वरतामत्रभवती ।

(निष्क्रान्ता शकुन्तला सहयायिनश्च)

सख्यौ—(शकुन्तलां विलोक्य) हा धिक् । हा धिक् । अन्तर्हिता शकुन्तला वनराज्या ।

काश्यपः—(सनिःश्वासम्) अनसूये ! प्रियंवदे ! गतवती वां सहचारिणी । निगृह्य शोकमनुगच्छतं मां प्रस्थितम् ।

उभे—तात, शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशावः ।

काश्यपः—स्नेहवृत्तिरेवंदर्शिनी । (सविमर्शं परिक्रम्य) हन्त भोः शकुन्तलां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम् । कुतः

अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ॥७॥

( इति निष्क्रान्ताः सर्वे )

इति चतुर्थोऽङ्कः ।

# अथ
# मेघदूतम्

कश्चित्कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

तस्य स्थित्वा कथमपि पुरः केतकाधानहेतो-
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ॥

प्रत्यासन्ने नभसि दयिताजीविताालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥

धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघः
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥ ५ ॥

जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ ६ ॥

# अथ
# मेघदूतम्

कश्चित्कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

तस्य स्थित्वा कथमपि पुरः केतकाधानहेतो-
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ॥

प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥

धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघः
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥ ५ ॥

जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ ६ ॥

---

[1]Поэма написана размером mandakranta («медлнная поступь»), представляющим собой четверостишие
17 слогов в строке с цезурой после четвертого и десятого слогов.

Схема строки: ————|◡◡◡◡◡—|—◡——◡——.

संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः
संदेशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥ ७ ॥

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः ।
कः संनद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥ ८ ॥

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ ९ ॥

तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥ १० ॥

कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।
आ कैलासाद्बिसकिसलयच्छेदपाथेयवन्तः
संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ ११ ॥

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवता यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥ १२ ॥

संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः
संदेशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥ ७ ॥

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः ।
कः संनद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥ ८ ॥

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ ९ ॥

तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥ १० ॥

कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।
आ कैलासाद्बिसकिसलयच्छेदपाथेयवन्तः
संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ ११ ॥

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवता यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥ १२ ॥

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
संदेशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम् ।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपयुज्य ॥ १३ ॥

अद्रेः शृङ्गं हरति पवनः किं स्विदित्युन्मुखीभि-
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान् ॥ १४ ॥

रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता-
द्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥ १५ ॥

त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यःसीरोत्कषणसुरभिक्षेत्रमारुह्य मालं
किंचित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण ॥ १६ ॥

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यस्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥ १७ ॥

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां :
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥ १८ ॥

स्थित्वा तस्मिन्वनचरवधूभुक्तकुञ्जे मुहूर्तं
तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः ।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥ १९ ॥

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥ २० ॥

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।
दग्धारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥ २१ ॥

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान्गन्तुमाशु व्यवस्येत् ॥ २२ ॥

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥ २३ ॥

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमपि महत्कामुकत्वस्य लब्ध्वा ।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यत्त-
त्सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥ २४ ॥

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्संपर्कात्पुलकितमिव प्रौढपुष्पैः कदम्बैः ।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २५ ॥

विश्रान्तः सन्व्रज वननदीतीरजातानि सिञ्च-
न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां
छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम् ॥ २६ ॥

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः ।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥ २७ ॥

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः ।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः संनिपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥ २८ ॥

वेणीभूतप्रतनुसलिला तामतीतस्य सिन्धुः
पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः ।
सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥ २९ ॥

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धा-
न्पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥ ३० ॥

दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
सिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥ ३१ ॥

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्तोपहारः ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखिन्नान्तरात्मा
नीत्वा रात्रिं ललितवनितापादरागाङ्कितेषु ॥ ३२ ॥

भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डेश्वरस्य ।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥ ३३ ॥

अप्यन्यस्मिञ्जलधर महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः ।
कुर्वन्संध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥ ३४ ॥

पादन्यासक्वणितरशनास्तत्र लीलावधूतै
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रबिन्दू-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान् ॥ ३५ ॥

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सांध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ।
नृत्तारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥ ३६ ॥

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ॥ ३७ ॥

तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ ३८ ॥

तस्मिन्काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।
प्रालेयास्रं कमलवदनात्सोऽपि हर्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥ ३९ ॥

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या-
न्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥ ४० ॥

तस्याः किंचित्करधृतमिव प्राप्तवानीरशाखं
हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ॥ ४१ ॥

त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥ ४२ ॥

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः ।
रक्षाहेतोर्नवशशिभृता वासवीनां चमूना-
मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ॥ ४३ ॥

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ॥ ४४ ॥

आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्य-
न्स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ॥ ४५ ॥

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥ ४६ ॥

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम् ॥ ४७ ॥

ब्रह्मावर्तं जनपदमथच्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः ।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥ ४८ ॥

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे ।
कृत्वा तासामभिगममपां सौम्य सारस्वतीना-
मन्तःशुद्धस्त्वमसि भविता वर्णमात्रेण कृष्णः ॥ ४९ ॥

तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शंभोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥ ५० ॥

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।
संसर्पन्त्या सपदि भवतः स्रोतसि च्छायया सा
स्यादस्थानोपगतयमुनासंगमेवाभिरामा ॥ ५१ ॥

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥ ५२ ॥

तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै-
रापन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ॥ ५३ ॥

ये त्वां मुक्तध्वनिमसहनाः स्वाङ्गभङ्गाय तस्मि-
न्दर्पोत्सेकादुपरि शरभा लङ्घयिष्यन्त्यलङ्घ्यम् ।
तान्कुर्वीथास्तुमुलकरकावृष्टिहासावकीर्णा-
न्के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥ ५४ ॥

तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः
शश्वत्सिद्धैरुपहृतबलिं भक्तिनम्रः परीयाः ।
यस्मिन्दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः
कल्पन्तेऽस्य स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५५ ॥

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संरक्ताभिस्त्रिपुरविजयो गीयते किंनरीभिः ।
निर्ह्रादी ते मुरज इव चेत्कन्दरेषु ध्वनिः स्या-
त्संगीतार्थो ननु पशुपतेस्तत्र भावी समस्तः ॥ ५६ ॥

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषा-
न्हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ॥ ५७ ॥

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिशमिव त्र्यम्बकस्याट्टहासः ॥ ५८ ॥

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य ।
लीलामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री-
मंसन्यस्ते सति हलभृतो मेचके वाससीव ॥ ५९ ॥

हित्वा तस्मिन्भुजगवलयं शंभुना दत्तहस्ता
क्रीडाशैले यदि च विहरेत्पादचारेण गौरी ।
भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानत्वं व्रज पदसुखस्पर्शमारोहणेषु ॥ ६० ॥

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् ।
ताभ्यो मोक्षस्तव यदि सखे घर्मलब्धस्य न स्या-
त्क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः ॥ ६१ ॥

हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन्कामात्क्षणमुखपटप्रीतिमैरावणस्य ।
धुन्वन्वातैः सजलपृषतैः कल्पवृक्षांशुकानि
च्छायाभिन्नः स्फटिकविशदं निर्विशेस्तं नगेन्द्रम् ॥ ६२ ॥

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमाना
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६३ ॥

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ ६४ ॥

हस्ते लीलाकमलमलकं बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामाननश्रीः ।
चूडापाशे नवकुरवकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ ६५ ॥

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचनान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ६६ ॥

यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गिताना-
मङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधापगमविशदैश्च्योतिताश्चन्द्रपादै-
र्व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥ ६७ ॥

नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी-
रालेख्यानां सलिलकणिकादोषमुत्पाद्य सद्यः ।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालै-
र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ६८ ॥

नीवीबन्धोच्छ्वसितशिथिलं यत्र यक्षाङ्गनानां
वासः कामादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपा-
न्ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ॥ ६९ ॥

गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः स्तनपरिचितच्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥ ७० ॥

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम् ।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ ७१ ॥

तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं
दूरालक्ष्यं तदमरधनुश्चारुणा तोरणेन ।
यस्योद्याने कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ॥ ७२ ॥

वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा
हैमैः स्यूता कमलमुकुलैः स्निग्धवैडूर्यनालैः ।
यस्यास्तोये कृतवसतयो मानसं संनिकृष्टं
न ध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥ ७३ ॥

तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः ।
मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥ ७४ ॥

रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरवकवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥ ७५ ॥

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।
तालैः शिञ्जद्वलयसुभगैर्नर्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥ ७६ ॥

एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथा
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा ।
क्षामच्छायं भवनमधुना:मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् । ७७ ॥

गत्वा सद्यः कलभतनुतां शीघ्रसंपातहेतोः
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः ।
अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ ७८ ॥

तन्वी श्यामा शिखरदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ॥ ७९ ॥

तां जानीयाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥ ८० ॥

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं बहूनां
निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं त्वदुपसरणक्लिष्टकान्तेर्बिभर्ति ॥ ८१ ॥

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्य विरहतनु वा भावगम्यं लिखन्ती ।
पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥ ८२ ॥

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।
तन्त्रीरार्द्रां नयनसलिलैः सारयित्वा कथंचि-
द्भूयो भूयः स्वयमपि कृतां मूर्छनां विस्मरन्ती ॥ ८३ ॥

शेषान्मासान्विरहदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः ।
संयोगं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥ ८४ ॥

सव्यापारामहनि न तथा पीडयेद्विप्रयोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।
मत्संदेशैः सुखयितुमतः पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनासन्नवातायनस्थः ॥ ८५ ॥

आधिक्षामां विरहशयने संनिषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः ।
नीता रात्रिः क्षण इव मया सार्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् ॥ ८६ ॥

निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात्परुषमलकं नूनमागण्डलम्बम् ।
मत्संयोगः कथमुपनमेत्स्वप्नजोऽपीति निद्रा-
माकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ॥ ८७ ॥

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्तीं
गण्डाभोगात्कठिनविषमामेकवेणीं करेण ॥ ८८ ॥

पादानिन्दोरमृतशिशिराञ्जालमार्गप्रविष्टा-
न्पूर्वप्रीत्या गतमभिमुखं संनिवृत्तं तथैव ।
चक्षुः खेदात्सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥ ८९ ॥

सा संन्यस्ताभरणमबला पेलवं धारयन्ती
शय्योत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम् ।
त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥ ९० ॥

जाने सख्यास्तव मयि मनः संभृतस्नेहमस्मा-
दित्थंभूतां प्रथमविरहे तामहं तर्कयामि ।
वाचालं मां न खलु सुभगंमन्यभावः करोति
प्रत्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया यत् ॥ ९१ ॥

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥ ९२ ॥

वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-
र्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।
संभोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥ ९३ ॥

तस्मिन्काले जलद यदि सा लब्धनिद्रासुखा स्या-
दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।
मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथंचि-
त्सद्यः कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥ ९४ ॥

तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।
विद्युद्गर्भे स्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरस्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥ ९५ ॥

भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्संदेशान्मनसि निहितादागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥ ९६ ॥

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैव ।
श्रोष्यत्यस्मात्परमवहिता सौम्य सीमन्तिनीनां
कान्तोदन्तः सुहृदुपनतः संगमात्किंचिदूनः ॥ ९७ ॥

तामायुष्मन्मम च वचनादात्मनश्चोपकर्तुं
ब्रूया एवं:तव सहचरो रामगिर्याश्रमस्थः ।
अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तः
पूर्वाशास्यं सुलभविपदां प्राणिनामेतदेव ॥ ९८ ॥

अङ्गेनाङ्गं तनु च तनुना गाढतप्तेन तप्तं
सास्रेणास्रद्रवमविरतोत्कण्ठमुत्कण्ठितेन ।
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती
संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥ ९९ ॥

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्ता-
त्कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्ट-
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥ १०० ॥

श्यामास्वङ्गं चकितहरिणीप्रेक्षिते दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासा-
न्हन्तैकस्थं क्वचिदपि न ते चण्डि सादृश्यमस्ति ॥ १०१ ॥

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ॥ १०२ ॥

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥ १०३ ॥

भित्वा सद्यः किसलयपुटान्देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।
आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ १०४ ॥

संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥ १०५ ॥

नन्वात्मानं बहु विगणयन्नात्मना नावलम्बे
तत्कल्याणि त्वमपि सुतरां मा गमः कातरत्वम् ।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ १०६ ॥

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
मासानन्यान्गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ १०७ ॥

भूयश्चाह त्वमसि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा ।
सान्तर्हासं कथितमसकृत्पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव रमयन्कामपि त्वं मयेति ॥ १०८ ॥

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनादसितनयने मय्यविश्वासिनी भूः ।
स्नेहानाहुः किमपि विरहे ह्रासिनस्ते ह्यभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ १०९ ॥

कच्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि ।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ ११० ॥

एतत्कृत्वा प्रियमनुचितप्रार्थनावर्त्मनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान्देशान्विचर जलद प्रावृषा संभृतश्री-
र्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥ १११ ॥

इति कालिदासविरचितं मेघदूतं समाप्तम् ॥



# Раздел 5

# Санскрит в разных жанрах литературы последующих веков

# Раздел 5

# Санскрит в разных жанрах литературы последующих веков

В 5-м разделе Книги приведены отрывки из произведений трех писателей, представляющих древнеиндийскую литературу на ее завершающем этапе (VIII–XIII вв.)

Дандин (Dandin) жил в конце VII–VIII вв. Он известен как автор стихотворного трактата по теории поэтического искусства — «Зерцало поэтического мастерства» (Kāvyādarça) и как прозаик, автор романа «Приключения десяти юношей» (Daçakumāracarita) и повести «Красавица из Аванти» (Avantisundarīkathā). Повесть была обнаружена сравнительно недавно (20-е годы XX века) и является, видимо, более ранним произведением. Интересно, что в нем сообщается родословная Дандина. По содержанию повесть «Красавица из Аванти» тесно связана с романом «Приключения десяти юношей», который является ее своеобразным продолжением. Этот роман состоит из 3-х частей.

Роман Дандина продолжает традиции индийской повествовательной прозы, сложившейся ране и известной по сборникам «Панчатантра» и «Хитопадеша» (см. раздел III Книги). Как и в них, в романе «Приключения десяти юношей» повествование заключено в обрамляющий рассказ о борьбе царей Магадхи и Малавы. У побежденного царя Магадхи в изгнании родится сын Раджавахан. Со временем он возвращает отцу царство, а тот делает сына правителем страны. Рассказы о приключениях Раджавахана и его девяти друзей (в романе приведены восемь рассказов) и составляют содержание романа. Это небольшие рассказы, фантастические повести, эротические и авантюрные истории. «Азартная игра, насилие, обман, убийства, похищения и недозволенная любовь составляют вместе или раздельно господствующие события каждого рассказа», — пишет индийский литератор С. К. Де — «Юноши — совершенные джентлемены, но два главных мотива, определяющих их действия, — это жажда любовных наслаждений и стремление к власти; ради этих целей они используют любые средства»[1]. Как авторское произведение «Приключения десяти юношей» композиционно более стройно, чем рыхлые по составу сборники басен фольклорного происхождения. Роман Дандина написан так называемой искусственной прозой с соблюдением правил индийской поэтики и относится к разряду «больших поэм» (mahākāvya). Красота изложения достигается в нем различными стилевыми приемами, непростыми для перевода.

[1]S. K. De. Aspects of Sanskrit Literature. Calcutta, 1959

Язык произведений Дандина интересно сопоставить с языком боле ранних прозаических произведений. В качестве образцов в «Книге» приведены три рассказа.

О жизни и творчестве Дандина можно прочитать в книге И. Д. Серебрякова «Очерки древнеиндийской литературы», «Наука», М. 1971 (глава «Глоток жизни») и в книге того же автора «Литературный процесс в Индии VII–XII века», «Наука», М. 1979. Краткие сведения о романе Дандина содержит предисловие В. И. Кальянова к русскому переводу романа, сделанного академиком Ф. И. Щербатским («Наука», М. 1964 год).

# दशकुमारचरितम्

## सोमदत्तचरितम्

देव ! भवच्चरणकमलसेवाभिलाषीभूतोऽहं भ्रमन् एकस्यां वनावनौ पिपासाकुलो लतापरिवृतं शीतलं नदसलिलं पिबन् उज्ज्वलाकारं रत्नं तत्रैकमद्राक्षम्। तत् आदाय गत्वा कञ्चन अध्वानम् अम्बरमणेः अत्युष्णतया गन्तुमक्षमो वनेऽस्मिन् एव किमपि देवतायतनं प्रविष्टो दीनाननं बहुतनयसमेतं स्थविरमहीसुरमेकम् अवलोक्य कुशलम् उदितदयोऽहम् अपृच्छम्। कार्पण्यविवर्णवदनो महदाशापूर्णमानसोऽवोचत् अग्रजन्मा। 'महाभाग! सुतान् एतान् मातृहीनान् अनेकैः उपायैः रक्षन् इदानीम् अस्मिन् कुदेशे भैक्ष्यं सम्पाद्य ददत् एतेभ्यो वसामि शिवालये अस्मिन्' इति। 'भूदेव! एतत्कटकाधिपतिः राजा कस्य देशस्य, किंनामधेयः, किमत्र आगमनकारणम् अस्य' इति पृष्टोऽभाषत महीसुरः। 'सौम्य! मत्तकालो नाम लाटेश्वरो देशस्य अस्य पालयितुः वीरकेतोः तनयां वामलोचनां नाम तरुणीरत्नम् असमानलावण्यं श्रावं श्रावम् अवधूतदुहितृप्रार्थनस्य तस्य पाटलीं नाम नगरीमरौत्सीत्। वीरकेतुः अपि भीतो महत् उपायनम् इव तनयां मत्तकालाय अदात्। तरुणीलाभहृष्टचेता लाटपतिः "परिणेया निजपुर एव" इति निश्चित्य गच्छन् निजदेशं प्रति, सम्प्रति मृगयादरेण अत्र वने सैन्यावासम् अकारयत्। कन्यासारणे नियुक्तो मानपालो नाम वीरकेतुमन्त्री मानधनः चतुरङ्गबलसमन्वितः अन्यत्र रचितशिविरस्तं निजनाथावमानखिन्नमानसः अन्तर्बिभेद' इति। विप्रोऽसौ बहुतनयो विद्वान् निर्धनः स्थविरश्च दानयोग्य इति तस्मै करुणापूर्णमना रत्नमदाम्। परमाह्लादविकसिताननोऽभिहितानेकाशीः कुत्रचित् अग्रजन्मा जगाम। अध्वश्रमखिन्नेन मया तत्र निरवेशि निद्रासुखम्। तदनु पश्चात् निगडितबाहुयुगलः स भूसुरः कशाघातचिह्नितगात्रः अनेकनैस्त्रिंशिकानुयातः अभ्येत्य माम् 'असौ दस्युः' इति अदर्शयत्। परित्यक्तभूसुरा राजभटा रत्नावाप्तिप्रकारं मदुक्तम् अनाकर्ण्य भयरहितं मां गाढं निगम्य रज्जुभिः आनीय कारागारम् 'एते तव सखायः' इति निगडितान् कांश्चित् निर्दिष्टवन्तो मामपि निगडितचरणयुगलम् अकार्षुः। किंकर्तव्यतामूढेन निराशक्लेशानुभवेन अवोचि मया 'ननु पुरुषाः वीर्यपरुषाः! निमित्तेन केन निर्विशथ कारावासदुःखं दुस्तरम्! यूयं वयस्या इति निर्दिष्टम् एतैः किमिदम्' इति। तथाविधं मामवेक्ष्य भूसुरात् मया श्रुतं लाटपतिवृत्तान्तं व्याख्याय चोरवीराः पुनरवोचन्। महाभाग! वीरकेतुमन्त्रिणो मानपालस्य किङ्करा वयं तदाज्ञया लाटेश्वरमारणाय रात्रौ सुरङ्गद्वारेण तदागारं प्रविश्य तत्र राजाभावेन विषण्णा बहुधनमपहृत्य महाटवीं प्राविशाम।

अपरेद्युः च अन्वेषिणो राजानुचरा बहवोऽभ्येत्य धृतधनचयान् अस्मान् परितः परिवृत्य दृढतरं बद्ध्वा निकटमानीय समस्तवस्तुशोधनवेलायाम् एकस्य अनर्घ्यरत्नस्य अभावेन अस्मद् वधाय माणिक्यादानाय अस्मान् किल अशृङ्खलयन्' इति। श्रुतरत्नरत्नालोकनस्थानोऽहम् इदं तदेव माणिक्यमिति निश्चित्य भूदेवदाननिमित्तां दुरवस्थाम् आत्मनो जन्म नामधेयं युष्मदन्वेषणपर्यटनप्रकारं चाऽभाष्य समयोचितैः संलापैः मैत्रीमकार्षम्। ततोऽर्धरात्रे तेषां मम च शृङ्खलाबन्धनं निर्भिद्य तैः अनुगम्यमानो निद्रितस्य द्वाःस्थगणस्य आयुधजालमादाय पुररक्षकान् पुरतोऽभि-

मुखागतान् पटुपराक्रमलीलया अभिद्राव्य मानपालशिबिरं प्राविशम्। मानपालो निजकिङ्करेभ्यो मम कुलाभिमानवृत्तान्तं तत्कालीनं विक्रमं च निशम्य मामार्चयत्। परेद्युः मत्तकालेन प्रेषिताः केचन पुरुषा मानपालम् उपेत्य 'मन्त्रिन्! मदीयराजमन्दिरे बहुधनमपहृत्य चौरवीरा भवदीयकटकं प्राविशन्, तान् अर्पय नो चेन्महाननर्थः सम्भविष्यती'ति क्रूरतरं वाक्यमब्रुवन्। तदाकर्ण्य रोषारुणितनेत्रो मन्त्री, 'लाटपतिः कः? तेन मैत्री का? पुनरस्य वराकस्य सेवया किं लभ्यम्' इति तान् निरभर्त्सयत्। ते च मानपालेनोक्तं विप्रलापं मत्तकालाय तथैव अकथयन्। कुपितोऽपि लाटपतिर्दोर्वीर्यगर्वेण अल्पसैनिकसमेतो योद्धुमभ्यगात्। पूर्वमेव कृतरणनिश्चयो मानी मानपालः सन्नद्धयोधो योद्धुकामो भूत्वा निःशङ्कं निरगात्। अहमपि सबहुमानं मन्त्रिदत्तातिबहुलतुरङ्गमोपेतं चतुरसारथि रथं च दृढतरं कवचं मदनुरूपं चापं च विविधबाणपूर्णं तूणीरद्वयं रणसमुचितानि आयुधानि गृहीत्वा युद्धसन्नद्धो मदीयबलविश्वासेन रिपूद्धरणोद्युक्तं मन्त्रिणमन्वगाम्। परस्परमत्सरेण तुमुलसङ्गरकरम् उभयसैन्यमतिक्रम्य समुल्लसद्भुजाटोपेन बाणवर्षं तदङ्गे विमुञ्चन् अरातीन् प्राहरम्। ततोऽतिरयतुरङ्गमं मद्रथं तन्निकटं नीत्वा

शीघ्रलङ्घनोपेततदीयरथोऽहम् अरातेः शिरःकर्तनम् अकार्षम्। तस्मिन् निपतिते तदवशिष्टसैनिकेषु पलायितेषु नानाविधहयगजादिवस्तुजातम् आदाय परमानन्दसम्मतो मन्त्री मम अनेकविधां सम्भावनाम् अकार्षीत्। मानपालप्रेषितात् तदनुचरात् एनम् अखिलमुदन्तमाकर्ण्य सन्तुष्टमना राजा अभ्युद्गतो मदीयपराक्रमे विस्मयमानः समहोत्सवम् अमात्यबान्धवानुमत्या शुभदिने निजतनयां मह्यमदात्। ततो यौवराज्याभिषिक्तोऽहमनुदिनम् आराधितमहीपालचित्तो वामलोचनया अनया सह नानाविधं सौख्यमनुभवन् भवद्विरहवेदनाशल्यसुलभवैकल्यहृदयः सिद्धादेशेन सुहृज्जनावलोकनफलं प्रदेशं महाकालनिवासिनः परमेश्वरस्य आराधनाय अद्य पत्नीसमेतः समागतोऽस्मि। भक्तवत्सलस्य गौरीपतेः कारुण्येन भवत्पदारविन्दसन्दर्शनानन्दसन्दोहो मया लब्ध इति।

तन्निशम्य अभिनन्दितपराक्रमो राजवाहनः तन्निरपराधदण्डे दैवमुपालभ्य तस्मै क्रमेण आत्मचरितं कथयामास। तस्मिन्नवसरे पुरतः पुष्पोद्भवं विलोक्य ससम्भ्रमं निजनिटलतटस्पृष्टचरणाङ्गुलिम् उदञ्जलिममुं गाढमालिङ्ग्य आनन्दबाष्पसङ्कुलसम्फुल्ललोचनः 'सौम्य! सोमदत्त! अयं स पुष्पोद्भवः' इति तस्मै तं दर्शयामास। तौ च चिरविरहदुःखं विसृज्य अन्योऽन्यालिङ्गनसुखम् अन्वभूताम्। ततः तस्यैव महीरुहस्य छायायामुपविश्य राजा सादरहासमभाषत। 'वयस्य! भूसुरकार्यं करिष्णुः अहं मित्रगणो विदितार्थः सर्वथा अन्तरायं करिष्यति इति निद्रितान् भवतः परित्यज्य निरगाम्। तदनु प्रबुद्धो वयस्यवर्गः किमिति निश्चित्य मदन्वेषणाय कुत्र गतवान्। भवान् एकाकी क्व गन्ता?' इति। सोऽपि ललाटतटचुम्बदञ्जलिपुटः सविनयं समालपत्।

## उपहारवर्मचरितम्

एषोऽस्मि पर्यटन्नेकदा गतो विदेहेषु। मिथिलामप्रविश्यैव बहिः क्वचिन्मठिकायां विश्रमितुमेत्य कयापि वृद्धतापस्या दत्तपाद्यः क्षणमलिन्दभूमाववास्थिषि। तस्यास्तु मद्दर्शनादेव किमप्याबद्धधारमश्रु प्रावर्तत। "किमेतदम्ब, कथय कारणम्" इति पृष्ठा सकरुणमाचष्ट। "जैवातृक, ननु श्रूयते पतिरस्या मिथिलायाः प्रहारवर्मा नामासीत्। तस्य खलु मगधराजो राजहंसः परं मित्रमासीत्। तयोश्च वल्लभे बलशम्बलयोरिव वसुमतीप्रियंवदे सख्यमप्रतिममधत्ताम्। अथ तां

प्रियसखीं दिदृक्षुः प्रियंवदा वसुमतीं सह भर्त्रा पुष्पपुरमगमत्। तस्मिन्नेव च समये मालवेन मगधराजस्य महज्जन्यमजनि। तत्र लेशतोऽपि दुर्लक्षां गतिमगमन्मगधराजः। मैथिलस्तु मालवेन्द्रप्रयत्नप्राणितः स्वविषयं प्रतिनिवृत्तो ज्येष्ठस्य संहारवर्मणः सुतैर्विकटवर्मप्रभृतिभिर्व्याप्तं राज्यमाकर्ण्य स्वस्रीयात् सुह्मपतेर्दण्डाश्रयवमादित्सुरटवीपथमवगाह्य लुब्धकलुप्तसर्वस्वोऽभूत्। तत्सुतेन च कनीयसा हस्तवर्तिना सहैकाकिनी वनचरशरवर्षभयपलायिता वनमगाहिषि। तत्र च मे शार्दूलनखावलीढनिपतितायाः पाणिभ्रष्टः स बालकः कस्यापि कपिलाशवस्य क्रोडमभ्यलीयत। तच्छवाकर्षिणश्च व्याघ्रस्यासूनिषुरिष्वसनयन्त्रमुक्तः क्षणादलिक्षत्। भिल्लदारकैः स बालोऽपाहारि। सा त्वहं मोहसुप्ता केनापि वृष्णिपालेनोपनीय स्वं कुटीरमावेश्य कृपयोपक्रान्तव्रणा स्वस्थीभूय स्वभर्तुरन्तिकमुपतिष्ठासुरसहायतया यावद् व्याकुलीभवामि तावन्ममैव दुहिता सह यूना केनापि तमेवोद्देशमागमत्। सा भृशं रुरोद। रुदितान्ते च सा सार्थघाते स्वहस्तगतस्य राजपुत्रस्य किरातभर्तृहस्तगमनम्, आत्मनश्च केनापि वनचरेण व्रणविरोपणम्, स्वस्थायाश्च पुनस्तेनोपयन्तुं चिन्तितायाः निकृष्टजातिसंसर्गवैक्लव्यात् प्रत्याख्यानपारुष्यम्, तदक्षमेण चामुना विविक्ते विपिने स्वशिरकर्तनोद्यमम्, अनेन यूना यदृच्छया दृष्टेन तस्य दुरात्मनो हननम्, आत्मनश्चोपयमनमित्यकथयत्। स तु पृष्टो मिथिलेन्द्रस्यैव कोऽपि सेवकः कारणविलम्बी तन्मार्गानुसारी जातः। सह तेन भर्तुरन्तिकमुपसृत्य पुत्रवृत्तान्तेन श्रोत्रमस्या देव्याः प्रियंवदायाश्चादहाव। स च राजा दिष्टदोषाज् ज्येष्ठपुत्रैश्चिरं विगृह्य पुनरसहिष्णुतयातिमात्रं चिरं प्रयुध्य बद्धः। देवी च बन्धनं गमिता। दग्धा पुनरहमस्मिन्नपि वार्धके हतजीवितमपारयन्ती हातुं प्रव्रज्यां किलाग्रहीषम्। दुहिता तु मम हतजीविताकृष्टा विकटवर्ममहादेवीं कल्पसुन्दरीं किलाशिश्रियत्। तौ चेद्राजपुत्रौ निरुपद्रवावेवावर्धिष्येताम् इयता कालेन तवेमां वयोऽवस्थामस्प्रक्ष्यताम्*। तयोश्च सतोर्न दायादा नरेन्द्रस्य प्रसह्यकारिणो भवेयुः।" इति प्रमन्युरभिरुरोद।

---

* मुद्रितेषु हस्तलिखितेषु च पुस्तकेषु सर्वत्र 'अस्प्रक्ष्येताम्' इति पाठ उपलभ्यते। स च मन्येऽहमेव लिपिकरप्रमादकृतः। 'अवर्धिष्येताम्' इत्यत्रैकारोऽस्ति, अत एव 'अस्प्रक्ष्येताम्' इत्यत्रापीकारेण भवितव्यमित्यभूद्भ्रमः।

श्रुत्वा च तापसीगिरम् अहमपि प्रवृद्धबाष्पो निगूढमभ्यधाम्। "यद्येवमम्ब समाश्वसिहि। नन्वस्ति कश्चिन्मुनिस्त्वया तदवस्थया पुत्राभ्युपपादनार्थं याचितस्तेन स लब्धो वर्धितश्च। वार्तेयमतिमहती। किमनया। सोऽहमस्मि। शक्यश्च मयासौ विकटवर्मा यथाकथञ्चिदुपश्लिष्य व्यापादयितुम्। अनुजाः पुनरतिबहवः। तैरपि घटन्ते पौरजानपदाः। मां तु न कश्चिदिहत्य ईदृक्तया जनो जानाति। पितरावपि तावदित्थं न संविदाते, किमुतेतरे। तमेनमर्थमुपायेन साधयिष्यामि।" इत्यगादिषम्।

सा तु वृद्धा सरुदितं परिष्वज्य मुहुः शिरस्युपाघ्राय प्रस्नुतस्तनी सगद्गदमगदत्। "वत्स, चिरं जीव। भद्रं तव। प्रसन्नोऽद्य भगवान् विधिः। अद्यैव प्रहारवर्मण्यधि विदेहा जाताः, यतः प्रलम्बमानपीनबाहुर्भवानपारमेतच्छोकसागरमुत्तारयितुं स्थितः। अहो महद्भागधेयं देव्याः प्रियंवदायाः।" इति हर्षनिर्भरा स्नानभोजनादिना मामुपाचरत्। अशिश्रियं चास्मिन्मठैकदेशे निशि कटशय्याम्।

## निम्बवतीकथा

अस्ति सौराष्ट्रेषु वलभी नाम नगरी। तस्यां गृहगुप्तनाम्नो गुह्यकेन्द्रतुल्यविभवस्य नाविकपतेर्दुहिता रत्नवती नाम। तां किल मधुमत्याः समुपागम्य बलभद्रो नाम सार्थवाहपुत्रः पर्यणैषीत्। ततश्च नववध्वां द्वेषमल्पेतरं बबन्ध। न तां पुनर्द्रष्टुमिष्टवान्। तद्गृहागमनमपि सुहृद्वाक्यशतातिवर्ती परिजहार। तां च दुर्भगां तदाप्रभृत्येव, "नेयं रत्नवती निम्बवती चेयम्" इति स्वजनः परिजनश्च परिबभूव। गते च कस्मिंश्चित् कालान्तरे सा त्वनुतप्यमाना "का मे गतिः" इति विमृशन्ती कामपि वृद्धपरिव्राजिकां मातृस्थानीयां देवशेषकुसुमैरुपस्थितामपश्यत्। तस्याश्च पुरो रहसि सकरुणं रुरोद।

तयाप्यश्रुमुख्या बहुप्रकारमनुनीय रुदितकारणं पृष्टा त्रपमाणापि कार्यगौरवात् कथञ्चिदब्रवीत्। "अम्ब, किं ब्रवीमि? दौर्भाग्यं नाम जीवन्मरणमेवाङ्गनानाम्, विशेषतश्च कुलवधूनाम्। तस्याहमस्म्युदाहरणभूता। मातृप्रमुखोऽपि ज्ञातिवर्गो मामवज्ञयैव पश्यति। तेन सुदृष्टां मां कुरु। न चेत् त्यजेयमद्यैव निष्प्रयोजनान् प्राणान्। आ विरामाच्च मे रहस्यं नाश्राव्यम्।" इति पादयोः पपात। सैनामुत्थाप्योद्बाष्पोवाच। "वत्से, मास्माध्यवस्यः *साहसम्। इयमस्मि त्वन्निदेशवर्तिनी। यावन्मयोपयोगस्तावति भवाम्यनन्याधीना। यद्येवासि निर्विण्णा तपश्चर त्वं मदधिष्ठिता पारलौकिकाय कल्याणाय। नन्वयमुदर्कः प्राक्तनस्य दुष्कृतस्य, यदनेनाकारेणेदृशेन शीलेन जात्या चैवंभूतया समनुगता सत्यकस्मादेव भर्तृद्वेष्यतां गतासि। यदि कश्चिदस्त्युपायः पतिद्रोहप्रतिक्रियायै, दर्शयामुम्, मतिर्हि ते पटीयसी" इति।

---

* 'माध्यवस्य साहसम्' इति निर्णयसागरपुस्तके पाठः, 'माध्यवसः साहसम्' इति पुनः पुष्पपत्तनपुस्तके पाठः। उभावेव दुष्टौ, अस्यैव षष्ठोच्छ्वासस्य प्रारम्भे 'मा स्म भाव मत्कृतेऽध्यवस्यः साहसम्' इति ग्रन्थवाक्यस्योपलम्भात्। यद्यप्यर्वाचीनैर्वैयाकरणैः क्रियं कामं भावलभ्य भामाकीभिर्दं परिकल्प्य माङि लुङिति सूत्रस्य कार्यतो वैकल्पिकत्वं संसाध्य पाणिनिसूत्रस्य पावित्र्यं परिरक्ष्यते तथापि मार्य पन्था दण्डिनानुसृत इति दशकुमारचरितस्य दण्डिविरचितभागस्य पर्यालोचनेन प्रतीयते।

Кшамендра (kşemendra) — кашмирский поэт XI века, автор ряда произведений на клас…ическом санскрите. Разнообразие жанров и тематики произведений Кшемендры пока…ывают широту его творческого диапазона. Среди его произведений и переложения древ…их эпических сюжетов (например, о Раме), и сказания о Вишну, о Будде, и произведения …о вопросам политики, поэтики, вплоть до сатирических повествований (например, «Нар…амала» — «Венок шуток»).

Заметное место среди произведений Кшемендры занимают сочинения дидактического …арактера. Всего их восемь. В них с помощью назидательных рассуждений и историй Кше…ендра-моралист стремится показать, что бессмысленно кичиться богатством, красотой, …еройством, щедростью...Он говорит об иных, истинных жизненных ценностях: «Будьте …ысокоморальными людьми, добрыми ко всем существам, правдивыми, незлобливыми, …ежадными, независимыми, общайтесь с добрыми, держите свои чувства под контролем, …риобщайтесь к знаниям»...

К произведениям дидактического характера относится и Darpadalanam («Разоблаче…ие самодовольства»), начальные строки которого и отрывок Dānavicaraḥ («Рассуждение …дарении») приведены в Книге.

О Кшемендре на русском языке см. в книге И. Д. Серебрякова «Очерки древнеиндий…кой литературы». Издательство «Наука», Москва, 1971 год (глава «Сатира борется за че…овека».) и в книге того же автора «Литературный процесс в Индии VII–XIII вв.», «Наука», …И., 1979.

प्रशान्तशेषविघ्नाय दर्पसर्पापसर्पणात् ।
नमः शमनिधानाय सुप्रकाशविकासिने *) ॥ १ ।

संसारव्यतिरेकाय कृतोत्सेकाय चेतसः ।
प्रशमामृतसेकाय विवेकाय नमो नमः *) ॥ २ ॥

क्षेमेन्द्रः सुहृदां प्रीत्या दर्पदोषचिकित्सकः ।
स्वास्थ्याय कुरुते यत्नं मधुरैः सूक्तिभेषजैः ॥ ३ ॥

कुलं वित्तं श्रुतं रूपं शौर्यं दानं तपस्तथा ।
प्रधान्यतो मनुष्याणां सप्तैते मदहेतवः ॥ ४ ॥

अहंकाराभिभूतानां भूतानामिव देहिनाम् ।
हिताय दर्पदलनं क्रियते मोहशान्तये ॥ ५ ॥

जगल्लोको भद्रद्विरद इव दानार्द्रसरणिः
प्रशस्तो निःस्वानामहमभिमतानां फलतरुः ।
इति त्यागोदग्रं वहति किल दर्पं मनसि यः
तदुद्भूतं सर्वं सुकृतमपहाय व्रजति सः ॥ १ ॥

स्वर्गादिसंभोगफलाभिलाषात्
पात्राय पर्णां प्रतिपाद्यते यत् ।
धर्मार्थपण्यक्रयविक्रयोऽसौ
नास्तेन दानप्रभवोऽभिमानः ॥ २ ॥

गाढ्यादिगुणोत्कर्षविशेषपरितोषितैः ।
दीयते प्रीतिधनयोः स पण्यक्रयविक्रयः ॥ ३ ॥

लोकप्रसिद्धिसिद्ध्यै यः प्रयच्छति गुणस्तवैः ।
करोति वित्तयशसोः स सदा क्रयविक्रयम् ॥ ४ ॥

स्नानपानकृतं यच्च दत्तमश्रद्धया धनम् ।
ऊषरे निष्फलं बीजं शिलागलितमेव तत् ॥ ५ ॥

त्यागिनोऽन्यस्य संघर्षे कीर्त्युत्कर्षाभिलाषया ।
दत्ते कारणभूतस्य तस्यैवात्र फलप्रदम् ॥ ६ ॥

परार्तिशमनं वित्तमज्ञातमनुदीरितम् ।
अफलाकाङ्क्षया दत्तं प्रयात्यल्पमनल्पताम् ॥ ७ ॥
कुरुक्षेत्रादिदेशेषु कालेष्वर्कग्रहादिषु ।
आत्मोपकारमात्रेण पात्रे दानेन किं मदः ॥ ८ ॥
देशकालक्रियापात्राण्यविचार्यैव केवलम् ।
परेषामार्तिशमनं दयार्द्रं दानमुच्यते ॥ ९ ॥
रक्षायै संपदां पुत्रकलत्रसुखसिद्धये ।
दीयते यत्प्रयत्नेन लोभदानेन तेन किम् ॥ १० ॥
यत्पुष्पधूपतिलकप्रतिपत्तिप्रदर्शितम् ।
दत्तमत्यल्पनिःसारं दम्भदानेन तेन किम् ॥ ११ ॥
त्यक्ताशागतमत्यर्तं पूर्णायाभ्यर्थ्य दीयते ।
यत्तदुत्क्रोशसंतप्तं दग्धदानेन तेन किम् ॥ १२ ॥
अन्यदाभाषितं पूर्वं दत्तमन्यत्ततोल्पकम् ।
यत्सदोषमयोग्यं वा कूटदानेन तेन किम् ॥ १३ ॥
चिरसेवानुरोधेन लोभकृच्छ्रादनिच्छया ।
अप्रसादेन दत्तं यद्बलाद्दानेन तेन किम् ॥ १४ ॥
प्रभूतभारसंभारं राजचौरादिविप्लवे ।
दत्वा यद्दृष्टमुत्सृष्टं शल्यदानेन तेन किम् ॥ १५ ॥
अनास्वाद्यमविक्रेयमनादेयमनीप्सितम् ।
दत्वा निरुपकारं यद्वन्ध्यदानेन तेन किम् ॥ १६ ॥
ऋणवच्चिरसंशोध्यं वचसा प्रतिपादितम् ।
यन्नित्ययाचनद्वेषं याच्ञादानेन तेन किम् ॥ १७ ॥
एकस्मै पूर्णमन्यस्मै कृशं तुल्यगुणोदये ।

मदाद्यद्दर्पितं      रागद्वेषदानेन तेन किम् ॥ १८ ॥
न परस्यार्तिशमनं नात्मनः पुण्यकारणम् ।
दत्त्वाल्पमूल्येनाल्पं यत्स्वल्पदानेन तेन किम् ॥ १९ ॥
दुर्यज्ञेषु विरुद्धेषु दशापाकेतिदारुणे ।
दीयते दोषशान्त्यै यद्ग्रहदानेन तेन किम् ॥ २० ॥
गुरुर्मुमूर्षुस्त्यक्तसर्वाशः शयनस्थो ददाति यत् ।
मूर्च्छास्थानेन मनसा मोहदानेन तेन किम् ॥ २१ ॥
दत्तं प्रियवियोगोत्थशोकशल्यार्तचेतसा      ।
यत्पश्चात्तापजननं बाष्पदानेन तेन किम् ॥ २२ ॥
पुरोहिताय गुरवे शान्तिस्वस्तिविधायिने ।
दीयते यत्प्रसङ्गेन      स्तुतिदानेन तेन किम् ॥ २३ ॥
यत्संत्यक्तफलस्पृहं यदुचितं सत्त्वस्वभूतं च यत्
नान्यायेन यदर्जितं परधनस्पर्शेन शस्तं न यत्      :
दत्त्वा दुःखकृतं न यत्स्ववचसा पश्चान्न यत्तापते
तद्दानं धनबीजवापनिपुणः शेषः ''' प्रकारः कृषेः ॥ २४ ॥
प्राप्तुं स्वर्गवराङ्गनास्तनयुगस्पर्शातिरिक्तं      सुखम्
दत्तो मेरुरपि प्रयाति तृणतामात्मोपकारेप्सया ।
आपन्नार्तिविलोकने करुणया श्रद्धासुधापूरितम्
सत्त्वोत्साहसमर्पितं तृणमपि त्रैलोक्यदानाधिकम् ॥ २५ ॥
अश्वमेधे विधानेन वर्तमाने महाक्रतौ ।
युधिष्ठिरस्य भूभर्तुः पुरा कनकवर्षिणः ॥ २६ ॥
सत्रासु रत्नभोज्यासु      त्रिविधास्वन्नपालिषु      ।
अनिशं रत्नपात्रेषु भुक्तवत्सु द्विजेषु च ॥ २७ ॥
विप्रेषु पूर्यमाणेषु मणिकाञ्चनशासनैः      ।
उच्छिष्टभूमिं नकुलः स्वबिलात्समुपाययौ ॥ २८ ॥
दीप्तकाञ्चनरम्येण      , पार्श्वेनैकेन शोभितः ।
अपरेणासुवर्णेन वितीर्णजनकौतुकः      ॥ २९ ॥

सोऽभ्येत्य तूर्णमुच्छिष्टहेमपात्रच्युतेऽम्भसि ।
लुलोठ शफरोत्फालपरिवर्तविवर्तनैः ॥ ३० ॥
सुवर्णपार्श्वं नकुलं दृष्ट्वा सर्वे कुतूहलात् ।
मज्जन्तमुच्छिष्टजले क्षितिपाय न्यवेदयन् ॥ ३१ ॥
प्राप्तेन भूभुजा दृष्टा दृष्ट्या पृष्ट इवेक्षया ।
सोऽवदद्विस्मयभुवा स्पष्टाक्षरया गिरा ॥ ३२ ॥
राजन्नस्यातिदानस्य न पश्याम्युचितं फलम् ।
अस्मात्प्रभूतसंभारात्सक्तुमात्रं वरं वरम् ॥ ३३ ॥
प्रवृत्तेऽस्मिन्महादाने महतस्ते महीपते ।
वित्ते वृत्ते च चित्ते च शुद्धिं को वेद तत्त्वतः ॥ ३४ ॥
संभारोऽयं भुवनभवनव्याप्तिपर्याप्तभोगः
सर्वाशाप्रततजनतापूरणात्यन्ततुङ्गः ।
आपन्नार्तिप्रशमनविधौ सत्त्वशुद्धिप्रदाने
संनद्धानामपि तृणकणः काञ्चनाद्रिर्लगेति ॥ ३५ ॥
श्रूयतां भूपते दृष्टं यन्मया स्वयमद्भुतम् ।
तदित्युदीरिते यस्मिन्काये रोमाञ्चकञ्चुकः ॥ ३६ ॥
शिलोञ्छवृत्तिना पूर्वं विप्रेण व्रतचारिणा ।
उपवासकृशेनाप्तं प्रस्तोकं कलत्रिणा ॥ ३७ ॥
सक्तुमात्रे ततः सिद्धे कृतदेवपितृक्रियः [106) ।
जायासुतविभागेन स्वं भागं भोक्तुमुद्ययौ ॥ ३८ ॥
स प्राणाहुतितोयार्थी ददर्शातिथिमागतम् ।
क्षुत्क्षामकुक्षिसंक्षिप्तसर्वाङ्गकुटिलाकृतिम् ॥ ३९ ॥
तस्मै विहितसत्कारः सप्रसादेन चेतसा ।
श्रद्धासुधावसिक्तं तत्स ददौ निजभोजनम् ॥ ४० ॥

निगीर्णेतिथिना तस्मिन्नक्षीणक्षुद्द्विजदारिका ।
गर्भार्ताप्यादरवती तस्मै स्वमशनं ददौ ॥ ४१ ॥
तेनाप्यतृप्तमालोक्य तत्पुत्रः श्रद्धयातिथिम् ।
स्वभोजनेन विदधे संपूर्णाशननिर्वृतिम् ॥ ४२ ॥
गते तुष्टातिथौ तस्मिन्नुपवासकृशो द्विजः ।
सत्त्वोत्साहगुणस्तस्थौ क्लान्तोपि निशि निर्व्यथः ॥ ४३ ॥
अथाहं सक्तुगन्धेन निर्गतस्त्वरितो बिलात् ।
प्राप्तस्तत्पर्णपुटिकामुत्सृष्टोच्छिष्टवर्तिनीम् ॥ ४४ ॥
तत्राचमनतोयेन [102]) स्पृष्टमात्रस्य मे नृप ।
यस्येदं दक्षिणं पार्श्वं जातं हेममयच्छवि ॥ ४५ ॥
तत्राहं वामपार्श्वस्य हेमच्छायाशये सदा ।
निर्निद्रश्चिन्तया यातः कृशतामेव केवलाम् ॥ ४६ ॥
यद्यत्प्राप्नोति पुरुषः कर्मयोगात्समीहितम् ।
तत्तत्संपूर्णतायैव याति चिन्ताविधेयताम् ॥ ४७ ॥
अधुना वर्तमानेऽस्मिन्नश्वमेधे तव क्रतौ ।
हेमपार्श्वाशया यातो विप्रोच्छिष्टमहीमहम् ॥ ४८ ॥
रत्नकाञ्चनपूर्णाम्बुसिक्तस्य लुठतश्चिरम् ।
मम कान्तिलवोऽप्यङ्गे न किंचिदिह दृश्यते ॥ ४९ ॥
सर्वथा तस्मै शुद्धाय दानायातिलघीयसे ।
नमो महाफलायैव न भोगाङ्गप्रसङ्गिने ॥ ५० ॥
इत्युक्त्वा नकुले याते तत्तथेति युधिष्ठिरः ।
विचिन्त्य संततोच्छ्वासः क्षणं स्तिमिततां ययौ ॥ ५१ ॥
तस्मात्सुवर्णाम्बररत्नभूमिदानैर्न दर्पः पुरुषेण कार्यः ।
भवत्युदारं करुणार्द्रसत्त्वं दाने मनः कस्यचिदेव पुण्यैः ॥ ५२ ॥

Гитаговинда (gītagovinda) — «Песнь о пастухе»[1] лирико-драматическая поэма на к
сическом санскрите. Автором ее является бенгальский поэт XII века Джайядева (jayade
«Песня» состоит из двенадцати глав (sargāḥ) и представляет собой восхваление бога В
ну в его земном воплощении (avatāra) в образе пастуха Кришны. Начинается поэма с
торского монолога-славословия самому поэту, восхваления пяти поэтов и бога Виш
далее следуют хвалебные слова, обращенные к Кришне. После такого вступления разв
тывается незамысловатый сюжет поэмы — рассказ о пламенной любви пастушки Ра
к Кришне. Радха разгневана на Кришну за его вольные игры с другими пастушками. С
дует расставание влюбленных, их страдания в разлуке, тоска, примирение и, наконец, л
бовная встреча. Переживания влюбленных выражены в лирических монологах, преим
щественно в монологах Радхи и ее подруги. Эти монологи, как свидетельствуют авторск
ремарки, представляют собой песни, сопровождавшиеся, видимо, танцами. Авторское п
вествование связывают лирические монологи-песни. Каждая песня заканчивается хвал
бога Хари (Вишну), что придает всему произведению характер религиозного «действа
Эта чисто народная форма сохранилась до сих пор в Бенгалии и в Пенджабе в виде пол
импровизированных представлений во время религиозных празднеств.

В поэме «Гитаговинда » чисто народная форма выражена автором в прекрасных сти
хах, изобилующих изображением красот природы, яркими сравнениями и поэтическим
приемами изысканной поэзии (kavya) на санскрите. Все это можно увидеть и почувство
вать только прочитав текст в подлиннике. В Книге приведены первые пять глав поэмы.

Творчеству Джаядевы посвящен ряд исследований как за рубежом, так и в России
Из работ на русском языке можно ознакомиться со статьей С. Д. Серебряного «Гитаго
винда» Джаядевы в Индии и на Западе». — Классические памятники литератур Востока
М., 1985.

Автором нескольких статей о «Гите» является А. Я. Сыркин. Ему же принадлежит полный перевод памятника на русский язык с обстоятельной вступительной статьей, с которой полезно ознакомиться (особенно стр. 33–36) — см. Джаядева Гитаговинда. Перевод с санскрита, вступительная статья, комментарий и приложения А. Я. Сыркина. Изд. фирма «Восточная литература» РАН, М., 1995.

[1] букв. «Воспетый Говинда»

श्रीजयदेवकविविरचितं—

# गीतगोविन्दकाव्यम्

## प्रथमः सर्गः ॥ १ ॥

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥ १ ॥

वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्ती ।
श्रीवासुदेवरतिकेलिकथासमेत-
मेतं करोति जयदेवकविः प्रबन्धम् ॥ २ ॥

यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम् ।
मधुरकोमलकान्तपदावलीं शृणु तदा जयदेवसरस्वतीम् ॥ ३ ॥

वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः ।
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धन-
स्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः ॥४॥

प्रलयपयोधिजले धृतवानसि वेदम्, विहितवहित्रचरित्रमखेदम् ।
केशव धृतमीनशरीर, जय जगदीश हरे ॥ ध्रु० ॥ १ ॥

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे, धरणिधरणकिणचक्रगरिष्ठे ।
केशव धृतकच्छपरूप, जय जगदीश हरे ॥ २ ॥

वसति दशनशिखरे धरणी तव लग्ना शशिनि कलङ्ककलेव निमग्ना ।
केशव धृतसूकररूप, जय जगदीश हरे ॥ ३ ॥

तव करकमलवरे नखमद्भुतशृङ्गं दलितहिरण्यकशिपुतनुभृङ्गम् ।
केशव धृतनरहरिरूप, जय जगदीश हरे ॥ ४ ॥

छलयसि विक्रमणे बलिमद्भुतवामन, पदनखनीरजनितजनपावन ।
केशव धृतवामनरूप, जय जगदीश हरे ॥ ५ ॥

क्षत्रियरुधिरमये जगदपगतपापं स्नपयसि पयसि शमितभवतापम् ।
केशव धृतभृगुपतिरूप, जय जगदीश हरे ॥ ६ ॥
वितरसि दिक्षु रणे दिक्पतिकमनीयं दशमुखमौलिबलिं रमणीयम् ।
केशव * धृतरघुपतिरूप, जय जगदीश हरे ॥ ७ ॥
वहसि वपुषि विशदे वसनं जलदाभं हलहतिभीतिमिलितयमुनाभम् ।
केशव धृतहलधररूप, जय जगदीश हरे ॥ ८ ॥
निन्दसि यज्ञविधेरहह श्रुतिजातं सदयहृदय दर्शितपशुघातम् ।
केशव धृतबुद्धशरीर, जय जगदीश हरे ॥ ९ ॥
म्लेच्छनिवहनिधने कलयसि करवालं धूमकेतुमिव किमपि करालम् ।
केशव धृतकल्किशरीर, जपजगदोश हरे ॥ १० ॥
श्रीजयदेवकवेरिदमुदितमुदारं शृणु सुखदं शुभदं भवसारम् ।
केशव धृतदशविधरूप, जय जगदीश हरे ॥ ११ ॥
वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यान् दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥१२॥
श्रितकमलाकुचमण्डल धृतकुण्डल ए ।
कलितललितवनमाल जय जयदेव हरे ॥ ध्रु० ॥ १ ॥
दिनमणिमण्डलमण्डन भवखण्डन ए ।
मुनिजनमानसहंस जय जय देव हरे ॥ २ ॥
कालियविषधरगञ्जन जनरञ्जन ए ।
यदुकुलनलिनदिनेश जय जय देव हरे ॥ ३ ॥
मधु-मुर-नरक-विनाशन गरुडासन ए ।
सुरकुलकेलिनिदान जय जय देव हरे ॥ ४ ॥
अमलकमलदललोचन भवमोचन ए ।
त्रिभुवनभवननिधान जय जय देव हरे ॥ ५ ॥
जनकसुताकृतभूषण जितदूषण ए
समरशमितदशकण्ठ जय जय देव हरे ॥ ६ ॥
अभिनवजलधरसुन्दर धृतमन्दर ए
श्रीमुखचन्द्रचकोर जय जय देव हरे ॥ ७ ॥
तव चरणे प्रणता वयमिति भावय ए
कुरु कुशलं प्रणतेषु जय जय देव हरे ॥ ८ ॥

श्रीजयदेवकवेरिदं कुरुते मुदम् ए।
मङ्गलमुज्ज्वलगीतं जय जय देव हरे ॥ ९ ॥

पद्मापयोधरतटीपरिरम्भलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य ।
व्यक्तानुरागमिव खेलदनङ्गखेदस्वेदाम्बुपूरमनुपूरयतु प्रियं वः ॥१०॥

वसन्ते वासन्तीकुसुमसुकुमारैरवयवै-
र्भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम् ।
अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया
वलद्बाधां* राधां सरसमिदमूचे सहचरी ॥ १ ॥

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे ।
विहरति हरिरिह सरसवसन्ते नृत्यति युवति-
जनेन समं सखि विरहिजनस्य दुरन्ते ॥ ध्रु० ॥२॥

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे ।
अलिकुलसंकुलकुसुमसमूहनिराकुलबकुलकलापे ॥ विह०॥३॥

मृगमदसौरभरभसवशंवदनवदलमालतमाले ।
युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ॥ विह०॥४॥

मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकासे ।
मिलितशिलीमुखपाटलिपटलकृत*स्मरतूणविलासे ॥ विह०॥५॥

विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे ।
विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरिताशे ॥विह०॥६॥

माधविकापरिमलललिते नवमालतिजातिसुगन्धौ ।
मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ ॥विह०॥७॥

स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते ।
वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते ॥ विह० ॥ ८ ॥

श्रीजयदेवभणितमिदमुदयतु हरिचरणस्मृतिसारम् ।
सरसवसन्तसमयवनवर्णनमनुगतमदनविकासम् ॥ विह० ॥९॥

दरविदलितवल्लीमल्लिचञ्चत्पराग-*
प्रकटितपटवासैर्वासयन् काननानि ।
इह हि दहति चेतः केतकीगन्धबन्धुः
प्रसरदसमबाणप्राणवद्गन्धवाहः ॥ १० ॥

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ।

नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥११॥

अनेकनारीपरिरम्भसम्भ्रमस्फुरन्मनोहारिविलासलालसम् ।
मुरारिमारादुपदर्शयन्त्यसौ सखी समक्षं पुनराह राधिकाम् ॥ १ ॥

❀ चौथा प्रबन्ध । रामकरीरागेण रूपकताले गीयते ❀

चन्दनचर्चितनीलकलेवरपीतवसनवनमाली ।
केलिचलन्मणिकुण्डलमण्डितगण्डयुगः स्मितशाली ॥
हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे ॥ध्रु०॥२॥

पीनपयोधरभारभरेण हरिं परिरभ्य सरागम् ।
गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम् ॥ हरि० ॥३॥

कापि विलासविलोलविलोचनखेलनजनितमनोजम् ।
ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम् ॥ हरि० ॥४॥

कापि कपोलतले मिलितालपितुं किमपि श्रुतिमूले ।
चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले ॥ हरि० ॥५॥

केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले ।
मञ्जुलवञ्जुलकुञ्जगतं विचकर्ष करेण दुकूले ॥ हरि० ॥६॥

करतलतालतरलवलयावलिकलितकलस्वनवंशे ।
रासरसे सह नृत्यपरा हरिणा युवतिः प्रशशंसे ॥ हरि० ॥७॥

श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामाम् ।
पश्यति सस्मितचारुतरामपरामनुगच्छति वामाम् ॥हरि० ८॥

श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरहस्यम् ।
वृन्दावनविपिने ललितं वितनोतु शुभानि यशस्यम् ॥हरि०॥९॥

विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम् ।
स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति ॥१०॥

अद्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलं
प्रालेयप्लवनेच्छयाऽनुसरति श्रीखण्डशैलानिलः ।
किञ्च स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदया-
दुन्मीलन्ति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः ॥११॥

रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा-
मभ्यर्णे परिरभ्य निर्भरमुरः प्रेमान्धया राधया ।
साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति-
व्याजादुद्भटचुम्बितस्मितमनोहारी हरिः पातु वः ॥ १२ ॥

इति श्रीजयदेवकविविरचिते गीतगोविन्दकाव्ये प्रथमः सर्गः ॥ १ ॥

## द्वितीयः सर्गः ॥ २ ॥

विहरति वने राधा साधारणप्रणये हरौ
विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः ।
क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली–
मुखरशिखरे लीना दीनाऽप्युवाच रहः सखीम् ॥१॥

अथ पाँचवाँ प्रबन्ध गुर्जरी राग रूपक ताल ।

सञ्चरदधरसुधामधुरध्वनि मुखरितमोहनवंशम् ।
चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम् ॥
रासे हरिमिह विहितविलासं स्मरति
मनो मम कृतपरिहासम् ॥ ध्रु० ॥ २ ॥

चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम् ।
प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरसुवेशम् ॥ रासे० ॥३॥
गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभम् ।
बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम् ॥ रासे० ॥४॥
विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रम् ।
करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रम् ॥ रासे० ॥ ५ ॥
जलदपटलचलदिन्दुविनिन्दकचन्दनतिलकललाटम् ।
पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटम् ॥ रासे० ॥ ६ ॥

मणिमयकरमनोहरकुण्डलमण्डितगण्डमुदारम् ।
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम् ॥ रासे॰ ॥ ६ ॥

विशदकदम्बतले मिलितं कलिकलुषभयं शमयन्तम् ।
मामपि किमपि तरलतरङ्गमनङ्गदृशा मनसा रमयन्तम् ॥रासे॰॥

श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम् ।
हरिचरणस्मरणं प्रति संप्रति पुण्यवतामनुरूपम् ॥ रासे॰ ॥ ९ ॥

गणयति गुणग्रामं भामं भ्रमादपि नेहते
वहति च परितोषं दोषं विमुञ्चति दूरतः ।
युवतिषु चलत्तृष्णे कृष्णे विहारिणि मां विना
पुनरपि मनो वामं कामं करोति करोमि किम् ॥ १ ॥

अथ षष्ठः प्रबन्धः ।

मालवरागेण एकतालीताले गीयते—

निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तम् ।
चकितविलोकितसकलदिशारतिरभसभरेण हसन्तम् ॥
सखि हे केशिमथनमुदारं रमय मया सह
मदनमनोरथभावितया सविकारम् ॥ ध्रु॰ ॥ २ ॥

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलम् ।
मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम् ॥ सखि॰ ॥३॥

किसलयशयननिवेशितया चिरमुरसि ममैव शयानम् ।
कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानम् ॥ सखि॰ ॥४॥

अलसनिमीलितलोचनया पुलकावलिललितकपोलम् ।
श्रमजलसिक्तकलेवरया* वरमदनमदादतिलोलम् ॥सखि॰॥५॥

कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारम् ।
श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम् ॥सखि॰॥६॥

चरणरणितमणिनूपुरया परिपूरितसुरतवितानम् ।
मुखरविशृङ्खलमेखलया सकचग्रहचुम्बनदानम् ॥सखि॰॥७॥

रतिसुखसमयरसालसया दरमुकुलितनयनसरोजम् ।
निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजम् ॥सखि॰॥८॥

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम् ।
सुखमुत्कण्ठितराधिकया ऽकथितं वितनोतु सलीलम् ॥सखि॰॥९॥

अधुनाऽत्युत्कण्ठया सख्या नीयमाना सा गोपीगणावृतं
कृष्णं दृष्ट्वा परावृत्य सखीमाह—

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवी-
वृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्डस्थलम् ।
मामुद्वीक्ष्य विलज्जितं स्मितसुधामुग्धाननं कानने
गोविन्दं व्रजसुन्दरीगणवृतं पश्यामि हृष्यामि च ॥१०॥

पुनः विभावयन्नाह—

दुरालोकः स्तोकस्तवकनवकाशोकलतिका-
विकासः कासारोपवनपवनोऽपि व्यथयति ।
अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल-
प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥११॥

साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासित-
भ्रूवल्लीकमलीकदर्शितभुजा[1]-मूलोर्ध्वहस्तस्तनम् ।
गोपीनां निभृतं निरीक्ष्य [2]ललितां काञ्चिच्चिरं चिन्त-
यन्नन्तर्मुग्धमनोहरो हरतु वः क्लेशं नवः केशवः ॥१२॥

इति श्रीजयदेवकविविरचिते गीतगोविन्दकाव्ये द्वितीयः सर्गः ।

## तृतीयः सर्गः ॥ ३ ॥

मुग्धमधुसूदनः ।

कंसारिरपि संसारवासनाबद्धशृङ्खलाम् ।
राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥ १ ॥

इतस्ततस्तामनुसृत्य राधिका-
मनङ्गबाणव्रणखिन्नमानसः ।
कृतानुतापः स कलिन्दनन्दिनी-
तटान्तकुञ्जे निषसाद[1] माधवः ॥ २ ॥

मामियं चलिता विलोक्य वृतं वधूनिचयेन ।
सापराधतया मयापि न वारिताऽतिभयेन ॥
हरिहरि हतादरतया गता सा कुपितेव । ध्रु०॥ ३ ॥

किं करिष्यति किं वदिष्यति सा चिरं विरहेण ।
किं जनेन धनेन किं मम[1] जीवितेन गृहेण ॥ हरिहरि० ॥४॥

चिन्तयामि तदाननं कुटिलभ्रु रोषभरेण ।
शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण ॥ हरि० ॥ ५ ॥

तामहं हृदि संगतामनिशं भृशं रमयामि ।
किं वनेऽनुसरामि तामिह किं वृथा विलपामि ॥ हरि० ॥६॥

हृदि सङ्गतां तां प्रत्याह—

तन्वि खिन्नमसूयया हृदयं तवाकलयामि ।
तन्न वेद्मि कुतो गतासि नतेन तेऽनुनयामि ॥ हरि० ॥७॥

दृश्यसे पुरतो गतागतमेव मे विदधासि ।
किं पुरेव ससंभ्रमं परिरम्भणं न ददासि ॥ हरि० ॥ ८ ॥

क्षम्यतामपरं कदापि तवेदृशं न करोमि ।
देहि सुन्दरि दर्शनं मम मन्मथेन दुनोमि ॥ हरि० ॥ ९ ॥

वर्णितं जयदेवकेन हरेरिदं प्रणतेन ।
किन्दुबिल्वसमुद्रसम्भवरोहिणीरमणेन ॥ हरि० ॥ १० ॥

इदानीं काम एव मे दुःखं प्रयच्छतीति तमेवोपालम्भेनाह—

हृदि बिसलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः ।
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्यानङ्ग क्रुधा किमु धावसि ॥११॥

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय
क्रीडानिर्जितविश्वमूर्च्छितजनाघातेन किं पौरुषम् ।
तस्या एव मृगीदृशो मनसिजप्रेङ्खत्कटाक्षानल-
ज्वालाजर्जरितं मनागपि मनो नाद्यापि सन्धुक्षते ॥१२॥

भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि बाणा गुणः श्रवणपालिरिति स्मरेण ।
तस्यामनङ्गजयजङ्गमदेवतायामस्त्राणि निर्जितजगन्ति किमर्पितानि ॥ १३ ॥

अधुना हृद्गतां राधामाह—

भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां
श्यामात्मा कुटिलः करोतु कबरीभारोऽपि मारोद्यमम् ।
मोहं तावदयं च तन्वि तनुतां बिम्बाधरो रागवान्
सद्वृत्तः स्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति ॥१४॥

सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि मन्मानसं
तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं वर्धते ॥१५॥

तिर्यक्कण्ठविलोलमौलितरलोत्तंसस्य वंशोच्चरद्-
गीतिस्थानकृतावधानललनालक्षैर्न संलक्षिताः ।
संमुग्धे मधुसूदनस्य मधुरे राधामुखेन्दौ मृदुं
स्पन्दं कन्दलिताश्चिरं ददतु वः क्षेमं कटाक्षोर्मयः ॥ १६ ॥

इति श्रीजयदेवकविविरचिते गीतगोविन्दकाव्ये तृतीयः सर्गः ॥ ३ ॥

## चतुर्थः सर्गः ॥ ४ ॥

---

यमुनातीरवानीरनिकुञ्जे मन्दमास्थितम् ।
प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी ॥ १ ॥

उक्तश्लोकार्थं गीतेनाह—

अथ अष्टमप्रबन्धः कर्णाटकरागेण एकतालीतालेन गीयते—

निन्दति चन्दनमिन्दुकिरणमनुविन्दति खेदमधीरम् ।
व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम् ॥
माधव मनसिजविशिखभयादिव भावनया त्वयि लीना ।
सा विरहे तव दीना ॥ ध्रु० ॥ २ ॥

अविरलनिपतितमदनशरादिव भवदवनाय विशालम् ।
स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालम् ॥३॥

कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम् । व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयम् ॥ सा वि० ॥ ४ ॥

वहति च चलितविलोचनजलभरमाननकमलमुदारम् । विधुमिव विकटविधुन्तुददन्तदलनगलितामृतधारम् ॥ सा वि० ॥ ५ ॥

विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम् । प्रणमति मकरमधो विनिधाय करे च शरं नवचूतम् ॥ सा वि० ॥ ६ ॥

ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापम् ।
विलपति हसति विषीदति रोदिति चञ्चति मुञ्चति तापम् ॥ सा० ॥७॥

प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहम् ।
त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम् ।सावि०॥८॥

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयम् ।
हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयम् ।।सा वि०॥९॥

आवासो विपिनायते प्रियसखीमालापि जालायते
तापोऽपि श्वसितेन दावदहनज्वालाकलापायते ।
सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयञ्छार्दूलविक्रीडितम् ॥ १० ॥

अथ नवमः प्रबन्धो देशाख्यरागेण एकतालीतालेन गीयते—

स्तनविनिहितमपि हारमुदारम् ।
सा मनुते कृशतनुरिव भारम् ॥ १ ॥
राधिका विरहे तव केशव ॥ ध्रु० ॥

सरसमसृणमपि मलयजपङ्कम् ।
पश्यति विषमिव वपुषि सशङ्कम् ॥ राधिका० ॥ २ ॥

श्वसितपवनमनुपमपरिणाहम् ।
मदनदहनमिव वहति सदाहम् ॥ राधिका० ॥ ३ ॥

दिशि दिशि किरति सजलकणजालम् ।
नयननलिनमिव विगलितनालम् ॥ राधिका० ॥ ४ ॥

त्यजति न पाणितलेन कपोलम् ।
बालशशिनमिव सायमलोलम् ॥ राधिका० ॥ ५ ॥

नयनविषयमपि किसलयतल्पम् ।
कलयति विहितहुताशविकल्पम् ॥ राधिका० ॥ ६ ॥

हरिरिति हरिरिति जपति सकामम् ।
विरहविहितमरणेव निकामम् ॥ राधिका० ॥ ७ ॥

श्रीजयदेवभणितमिति गीतम् ।
सुखयतु केशवपदमुपनीतम् ॥ राधिका० ॥ ८ ॥

सा रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति
ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि ।
एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसात्
स्वर्वैद्यप्रतिम प्रसीदसि यदि त्यक्तोऽन्यथा हस्तकः ॥ ९ ॥

पुनरुपेन्द्रवज्रावृत्तेनाह—

स्मरातुरां दैवतवैद्यहृद्य त्वदङ्गसङ्गामृतमात्रसाध्याम् ।
विमुक्तबाधां कुरुषे न राधामुपेन्द्र वज्रादपि दारुणोऽसि ॥ १० ॥

एवंविधापि राधा त्वच्चिन्तनेनैव जीवतीत्याह—

कन्दर्पज्वरसञ्ज्वराकुलतनोराश्चर्यमस्याश्चिरं
चेतश्चन्दनचन्द्रमःकमलिनीचिन्तासु सन्ताम्यती ।
किन्तु क्षान्तिवशेन शीतलतनुं त्वामेवमेकं प्रियं ध्यायन्ती
रहसि स्थिता कथमसौ क्षीणा क्षणं प्राणिति ॥ ११ ॥

पुनरपि उद्दीपनविभावेन विरहोद्रेकं पुष्पिताग्रावृत्तेनाह—

क्षणमपि विरहः पुरा न सेहे नयननिमीलनखिन्नया यया ते ।
श्वसिति कथमसौ रसालशाखां चिरविरहेण विलोक्य पुष्पिताग्राम् ॥ १२ ॥

वृष्टिव्याकुलगोकुलावनरसादुद्धृत्य गोवर्धनं
बिभ्रद्वल्लववल्लभाभिरधिकानन्दाच्चिरं चुम्बितः ।
दर्पेणैव तदर्पिताधरतटीसिन्दूरमुद्राङ्कितो
बाहुर्गोपतनोस्तनोतु भवतां श्रेयांसि कंसद्विषः ॥१३॥

इति श्रीजयदेवकविविरचिते गीतगोविन्दकाव्ये चतुर्थः सर्गः ॥ ४ ॥

## पञ्चमः सर्गः ॥ ५ ॥

अहमिह निवसामि याहि राधामनुनय मद्वचनेन चानयेथाः ।
इति मधुरिपुणा सखी नियुक्ता स्वयमिदमेत्य पुनर्जगाद राधाम् ॥१॥

अथ दशमप्रबन्धो वराडीरागेण रूपकताले गीयते—

वहति मलयसमीरे मदनमुपनिधाय ।
स्फुटति कुसुमनिकरे विरहिहृदयदलनाय ॥ १ ॥
तव विरहे वनमाली सखि सीदति ॥ ध्रु० ॥

दहति शिशिरमयूखे मरणमनुकरोति पतति ।
मदनविशिखे विलपति विकलतरोऽति ॥ तव वि० ॥ २ ॥

ध्वनति मधुपसमूहे श्रवणमपिदधाति ।
मनसि कलितविरहे निशि निशि रुजमुपयाति ॥तव वि०॥३॥

वसति विपिनविताने त्यजति ललितमपि धाम ।
लुठति धरणिशयने बहु विलपति तव नाम ॥तव वि०॥४॥

रणति पिकसमुदाये प्रतिदिशमनुयाति ।
हसति मनुजनिचये विरहमपलपति नेति ॥तव वि०॥५॥

स्फुरति कलरवरावे स्मरति भणितमेव ।
तव रतिसुखविभवे बहुगणयति सुगुणमतीव ॥तव वि०॥६॥

त्वदभिधशुभदमासं वदति नरि शृणोति ।
तमपि जपति सरसं परयुवतिषु न रतिमुपैति ॥ तव वि० ॥ ७ ॥

भणति कविजयदेव इति विरहविलसितेन ।
मनसि रभसविभवे हरिरुदयतु सुकृतेन ॥ तव वि० ॥ ८ ॥

पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धय-
स्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः ।
ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं
भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति ॥ ९ ॥

अथ एकादशः प्रबन्धः केदाररागेण एकतालीताले गीयते—

रतिसुखसारे गतमभिसारे मदनमनोहरवेशम् ।
न कुरु नितम्बिनि गमनविलम्बनमनुसर तं हृदयेशम् ॥१॥
धीरसमीरे यमुनातीरे वसति वने वनमाली ।
गोपीपीनपयोधर-मर्दनचञ्चलकरयुगशाली ॥ ध्रु० ॥

नामसमेतं कृतसङ्केतं वादयते मृदु वेणुम् ।
बहुमनुतेऽतनु ते तनुसङ्गतपवनचलितमपि रेणुम् ॥ धीर०॥२॥

पतति पतत्रे विचलति पत्रे शङ्कितभवदुपयानम् ।
रचयति शयनं स चकितनयनं पश्यति तव पन्थानम्॥धीर०॥३॥

मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिसुलोलम् ।
चल सखि कुञ्जं सतिमिरपुञ्जं शीलय नीलनिचोलम् ॥धीर०॥४॥
उरसि मुरारेरुपहितहारे घन इव तरलबलाके ।
तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके ॥ धीर० ॥५॥
विगलितवसनं परिहृतरशनं घटय जघनमपिधानम् ।
किसलयशयने पङ्कजनयने निधिमिव हर्षनिदानम् ॥धीर०॥६॥
हरिरभिमानी रजनिरिदानीमियमपि याति विरामम् ।
कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम् ॥धीर०॥७॥

श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयम् ।
प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयम् ॥धीर० ॥८॥

विकिरति मुहुः श्वासानाशाः पुरो मुहुरीक्षते
प्रविशति मुहुः कुञ्जं गुञ्जन् मुहुर्बहु ताम्यति ।
रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते
मदनकदनक्लान्तः कान्ते प्रियस्तव वर्तते ॥ १ ॥

त्वद्वाक्येन समं समग्रमधुना तिग्मांशुरस्तङ्गतो
गोविन्दस्य मनोरथेन च समं प्राप्तं तमःसान्द्रताम् ।

कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना
तन्मुग्धे विफलं विलम्बनमसौ रम्योऽभिसारक्षणः ॥ २ ॥

यतः अभिसारे रसाधिक्यं भवतीत्याह—

आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्त-
जात् प्रोद्बोधादनु सम्भ्रमादनु रतारम्भादनु-

प्रीतयोः । अन्यार्थं गतयोर्भ्रमान्मिलितयोः संभाष-
णैर्जानतोर्दम्पत्योर्निशि[2] को न को न तमसि व्रीडा-
विमिश्रो रसः ॥ ३ ॥

इदानीं त्वल्लाभात्कृष्णः कृतार्थो भवत्वित्याह—

सभयचकितं विन्यस्यन्तीं दृशं[1] तिमिरे पथि
प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम् ।
कथमपि रहः प्राप्तामङ्गैरनङ्गतरङ्गिभिः
सुमुखि सुभगः पश्यन् स त्वामुपैतु कृतार्थताम् ॥ ४ ॥

कविः सर्गान्ते भक्तजनमाशिषाभिनन्दति—

राधामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौलिस्थली-
नेपथ्योचितनीलरत्नमवनीभारावतारक्षमः[2] ।
स्वच्छन्दं व्रजसुन्दरीजनमनस्तोषप्रदोषश्रियं[3]
कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः ॥ ५ ॥

॥ इति श्रीजयदेवकवि विरचिते गीतगोविन्दे पञ्चमः सर्गः ॥ ५ ॥



* * *

В книге «Открытие Индии» в главе «Живучесть и стойкость санскрита» Джавахарлал Неру писал: «Книги на санскрите на самые разнообразные темы...продолжали появляться на протяжении всего средневековья и вплоть до настоящего периода. Время от времени такие книги, а также журналы на санскрите выходят и сейчас. Однако уровень их невысок, и они не добавляют к санскритской литературе ничего ценного». К этому времени относится начало развития литератур на новоиндийских языках. «Но нас поражает, – пишет далее Неру, – что санскрит в состоянии оказывать такое влияние на протяжении всего этого долгого периода: иногда даже речи на публичных собраниях произносятся на санскрите; правда, аудитория в этих случаях бывает более или менее избранная»[1]. Роль санскрита в современной Индии заслуживает особого рассмотрения, что, однако, уже выходит за рамки задач предлагаемой Книги. Ограничимся лишь несколькими образцами современного санскрита, приводимыми в Приложении.

[1] Дж. Неру «Открытие Индии». Книга первая, М., 1989, с. 259.

# Приложение

# Образцы современных текстов на санскрите

*СОДЕРЖАНИЕ*

**Очерк об Индии.** . . . . . . . . . . 226
**Биография Махатмы Ганди.** . . . . . . . . . . 232
**Образцы писем на санскрите (переписка на санскрите распостранена)** . . . . . . 234
**Материалы V Международной санскритологической конференции** . . . . . . . . . . 236
Приветствие Индиры Ганди участникам конференции . . . . . . . . . . 236
Тезисы четырех докладов из сделанных на санскрите . . . . . . . . . . 237
**О городе Варанаси (Бенаресе), центре паломничества и главном месте изучения санскрита в современной Индии.** . . . . . . . . . . 240




## भारतवर्षम्

पुरा भरतनाम्ना चक्रवर्तिना परिपालनादस्य देशस्य भारतवर्षमिति व्यपदेशः सिद्धः। यदधुना 'इन्द्य' इति व्याहरन्ति तदस्य वैदेशिकैः कल्पितं नामधेयम्। भारतवर्षमिदं यद्यप्येष्याखण्डस्यैकदेशत्वेन विभक्तं तथाप्यतिविशालतया देशान्तरेभ्यो विश्लिष्टतया च खण्डान्तरत्वेन विभागमर्हति।

तदिदं पूर्वतो वङ्गाब्धिना, दक्षिणतो भारतमहासागरेण, सिन्धुनदारभसमुद्राभ्याम्, उत्तरतो हिमालयश्रेण्या च परिगतं प्रायेण त्रिकोणाकारं भवति ॥

भारतखण्डस्यास्य दैर्घ्यं काश्मीरदेशात् कन्याकुमारीपर्यन्तं पञ्चाशदुत्तरनवशतं (९५०) क्रोशाः विस्तारः, सिन्धुमुखात् गङ्गामुखपर्यन्तं नवशतं (९००) क्रोशाश्च भवन्ति। इदं च भारतवर्षम् 'उत्तरापथः, इति 'दक्षिणापथः' इति च द्वेधा विभज्यते। आलेख्यं पश्यत—भारतवर्षस्य मध्यभागे पूर्वापरायतस्तिष्ठति। हिमाद्रेर्विन्ध्याद्रेश्चान्तराले भाग उत्तरापथः। विन्ध्याद्रिमारभ्य दक्षिणतः भागो दक्षिणापथः ॥

उत्तरापथः प्रायेण समभूभागः। हिमालयादुद्भूय बह्व्यस्तरङ्गिण्यो भूभागेऽस्मिन् प्रवहन्ति। तासु गङ्गाब्रह्मपुत्राभिधाने नद्यौ सिन्धुसमाख्यो नदश्च प्रधानभूताः। गङ्गासिन्धू हिमाद्रेरुद्भवतः। ब्रह्मपुत्रा तु हिमाचलगतां सुरङ्गामार्गमाश्रित्य तिबेतदेशात् प्रवहति। उत्तरापथोऽयं विविधानां पुण्यतीर्थानां पुण्यक्षेत्राणां चायतनत्वात् पुण्यभूमिरिति, आर्याणामधिवासत्वादार्यावर्त इति च व्यपदिश्यते ॥

दक्षिणापथः पर्वतैर्नदीभिश्चाकीर्णः सस्याढ्यो देशः। मुम्बापुरादारभ्य कन्याकुमारीपर्यन्त पश्चिमपर्वतावलिः तत्पूर्वतः पूर्वपर्वतावलिश्च सन्तिष्ठते। पश्चिमपर्वतावलेः पश्चिमतः

समुद्रपर्यन्तमायतो भागः परशुरामक्षेत्रमित्याख्यायते । दक्षिणापथेऽस्मिन् प्रधानभूता नद्यः—महानदी, गोदावरी, कृष्णा, कावेरी च । एताः सर्वाः पूर्वसागरमभिधावन्ति ॥

भारतवर्षमिदं पुरा भरतभगीरथदशरथप्रभृतयस्ततो हर्षशोकप्रभृतयश्च हैन्दवा राजानः परिपालयामासुः । ततः क्रमेण ग्रीस्देशीया पोर्तगीस्देशीयाः फ्रान्स्देशीयाश्च जैत्रयात्राप्रसङ्गादभ्येत्य राज्यमिदं स्वायत्तीकर्तुं बहुतरमयतन्त । किन्तु तेषां यत्ना मुधाऽभूवन् । तदनु मुसल्मानाः समेत्य राज्यमिदं कञ्चित्कालमबिभरुः । परन्त्वन्तत इदमाङ्गलाधिपतेर्वशमयासीत् । तस्य शासनमनुरुन्धानाः शताधिका हैन्दवा मुसल्मानाश्च सामन्तास्तत्तद्देशस्याधिपत्यं अभजन् ॥

अथ चिरम् आङ्गलाधिपतेः शासने परतन्त्राः प्रजाः महता क्लेशेन १९४७ आगस्ट् १५ दिने प्रजाधिपत्यं स्वायत्तीचक्रुः । प्रजायत्तस्वाराज्यभरणे प्रथमः जनाधिपतिः श्रीमान् बाबु राजेन्द्रप्रसाद् महाशयः सर्वासां प्रजानां प्रीतिपात्रं चकास्ति ॥

भारतवर्षेऽस्मिन्नद्यत्वे परश्शतानि नगराणि विद्यन्ते । तेषाम् अष्टसप्ततिर्नगराणि लक्षार्धाधिकैः, एकोनत्रिंशन्नगराणि लक्षाधिकैश्च जनैरध्युष्यन्ते । तत्रापि डिल्लीपुरं कालिघट्टपुरं मुम्बापुरं मद्रपुरं चेति चत्वारि नगराणि प्रधानतमानि । आहत्य भारतवर्षवासिनां जनानां सङ्ख्या मा किं षट्त्रिंशत्कोटिरित्याहुः ॥

भारतखण्डेऽस्मिन् प्रधानभूता वृत्तिः कृषिः । अत्रस्थानां जनानां त्रिषु द्वौ भागौ कृषिकर्मणैव जीविकां निर्वर्तयतः । अत्र प्राधान्येन संवर्ध्यमानानि धान्यानि प्रियङ्गुः शालिर्गोधूमश्च । माषमुद्गादीन्यपि धान्यानि तत्र तत्राभिवर्ध्यन्ते । कार्पासीनीलीप्रभृतयस्तन्तूपयुक्ता ओषधयोऽप्यदभ्रतया प्ररोप्यन्ते । वाणिज्यम् अपि भारतीयैः साधारण्येनाभ्युपगता वृत्तिः । अथापि नैषा वृत्तिस्तेषां मध्ये लब्धोपचया दृश्यते ॥

विविधासु कलासु च भारतीयाः प्रावीण्यमभजन्त । वयने सीवने चित्रलेखने शिल्पकलायां च नितरां निपुणा अभूवन् । भारतीयैः पुरा मसृणमसृणान्यंशुकानि निरमायिषत । इतराण्यपि लोकयात्रापेक्षितान्युच्चावचानि वस्तून्युदपादिषत । परन्त्विदानीं विदेशीयानां वस्तूनामभियोगेन भूयस्यो भारतवर्षीया वृत्तयः कथावशेषतामगमन् ॥

विद्यायां विषये भारतवर्षमिदं खण्डान्तराण्यतिशेते । अस्मिन्नेव भारतवर्षे अपौरुषेयाः अनादयः चत्वारो वेदाः अद्य यावत् अध्ययनक्रमेण अभ्यस्यमानाः चकासति । पुराकल्प एवात्र जना व्युत्पन्नमतयोऽभूवन् । तत्फलत्वेन च तैर्वेदाङ्गानि शास्त्राणि पुराणानि इतिहासानि काव्यान्यन्यानि च विविधानि ग्रन्थरत्नानि विरचय्य गुरुशिष्यपरम्परायां परिपाल्यन्ते । सम्प्रति जगत्युपलभ्यमानेषु ग्रन्थेषु वैदिकग्रन्था एव प्राचीनतमाः । खण्डान्तरेषु पुनः प्राक्कालभावानां ग्रन्थानां वार्ताऽपि

न श्रूयते। व्याकरणे गणिते ज्योतिषे साहित्ये अश्ववेदे धनुर्वेदे च भारतीया लोकोत्तरं वैचक्षण्यं प्राचकटन् ॥

किं बहुनोक्तेन। सर्वविधानां सम्पदामाकरभूतमिदं भारतवर्षं समुत्कृष्टत्वेन गणनीयेषु मातृकादेशेष्वन्यतमं भवति। सैषा भारतभूमिः भूमण्डलमण्डनायमाना भूतात्मनो देवदेवस्य हृदयकमलमिव बाभाति ॥

सैषा भारतभूमिरतिशयेनास्माकम् आदरणीया — तथा चोक्तम्—

जननी जन्मभूमिश्च जाह्नवी च जनार्दनः।
जनकः पञ्चमश्चैव जकाराः पञ्च दुर्लभाः ॥
अपि च—
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ॥



सत्यमेव जयते

# राष्ट्रपिता महात्मा गांधी:



अस्य महापुरुषस्य जन्म १८६९ ईस्वीये अक्तूबरमासस्य द्वितीय-तिथौ काठियावाडस्य पोरबन्दरे देशेऽभवत्। अनेन प्रारम्भिकशिक्षा राजकोटस्य ग्रामपाठशालायां सम्पादिता। त्रयोदशे वर्षे अस्य विवाहः कस्तूरबया सह सम्पन्नः। उच्चशिक्षार्थं विदेशं गतः। तत्र "बैरिस्टर" पदवीम् अलभत। कस्मिंश्चिद् विवादप्रसंगे यदा स दक्षिण-अफ्रीकादेशं गतः तदा तत्र भारतदेशीयजनान् प्रति राज्यस्य दुर्व्यवहारं दृष्ट्वा अति-दुःखी अभूत्। स तन्निरोद्धुं सत्याग्रहमार्गम् अनुसृतवान्। राजकीय-नियमान् उल्लंघितवान्। स तत्र मुहुर्मुहुः अपकृतोऽपि जयमविन्दत। अस्मात् कारणात् अस्य यशः संसारे विस्तृतम्।

स्वदेशे प्रत्यागते स देशस्य स्वातन्त्र्य प्रति दृढनिश्चयः सञ्जातः। लोकमान्यतिलकेन दर्शितं मार्गम् अवलम्ब्य सोऽपि "स्वातन्त्र्यम् अस्माकं जन्मसिद्धोऽधिकारोऽस्ति" इति मतम् उदैरयत्।

स सत्यपालकः नेताऽऽसीत्। १९२० ईस्वीये असहयोगान्दोलनं, १९३० ईस्वीये लवणनियमभङ्गकरणं, १९४२ ईस्वीये 'भारतं त्यज' इति प्रस्तावस्य समर्थनं कृत्वा सत्याग्रहस्य महदायुधेन विरोधं प्रारभत। समये समये उपवासाः च अनुष्ठिताः।

जीवनपर्यन्तं स भारतसमाजे ये ये दोषाः तान् तान् दूरीकर्तुंमनाः आसीत्। अस्पृश्यतादोषनिवारणार्थं स प्रयतितवान् उत्साहेन। हिन्दु-मुस्लिम-ऐक्य-स्थापने स आजीवनं सन्नद्धः वरीवर्ति स्म। देशहिताय विदेश-वस्तु-बहिष्करणं स्वदेशोत्पादित-वस्तु-स्वीकरणं च तस्य जीवनस्य लक्ष्यमभूत्।

सोऽहिंसामार्गम् अवलम्बितवान्। तं मार्गम् आरूढे सति तस्मिन् अयं देशः १९४७ ईस्वीये अगस्तमासस्य पञ्चदशतिथौ स्वतन्त्रः समभवत्।

वयं स्वराज्यं प्राप्तवन्तः परन्तु दुर्भाग्यतः देशस्य पाकिस्तान-हिन्दुस्तानौ द्वौ भागौ कृतौ। हिन्दू-मुस्लिमविवादः प्रावर्तत। भारतीयानामस्माकं या जुगुप्सा घृणाभावः वा यवनेभ्यः आसीत् तं दूरीकर्तुं स महात्मागांधीः अतिमात्रमयतत। निर्भयं स "तस्य परमात्मनः एव ईश्वरश्च अल्लाहश्च पृथक् पृथक् द्वे नाम्नी स्तः" इति मतं प्रचारितवान्। हिन्दुत्वस्य संकीर्णभावनया प्रेरितेन एकेन उन्मत्तेन पुरुषेण स उदाराशयः, मानवधर्मप्रवर्तकः, सत्याहिंसापालकः, राजनीतौ अपि अध्यात्मवादनिर्देशकः १९४८ ईस्वीये जनवरीमासस्य त्रिंशत्तिथौ हतः।

भो बालकाः यूयमपि तस्य महात्मनः निर्दिष्टान् विचारान् पालयित्वा तस्य अवशिष्टं कार्यं कुर्यात। अस्पृश्यतादोषं निर्मूलं छित्वा, समाजस्य कुत्सिताचारान् अपाकृत्य भारतीयसंस्कृतिं न केवलं भारते देशे अपितु समस्तसंसारे प्रसार्य भारतदेशं पुनरुच्चशिखरं नीत्वा च तस्य महात्मनः आत्मनः प्रसादाय शुभम् आचरेत। वस्तुतः महात्मागांधीः अस्माकं राष्ट्रपिता। तस्मै महात्मने नमः। तस्य विचारान् कार्यरूपेण सम्पाद्य तं प्रति श्रद्धाञ्जलिम् अर्पयत।

स्वदेशे प्रत्यागते स देशस्य स्वातन्त्र्य प्रति दृढनिश्चयः सञ्जातः । लोकमान्यतिलकेन दर्शितं मार्गम् अवलम्ब्य सोऽपि "स्वातन्त्र्यम् अस्माकं जन्मसिद्धोऽधिकारोऽस्ति" इति मतम् उदंरयत् ।

स सत्यपालकः नेताऽऽसीत् । १९२० ईस्वीये असहयोगान्दोलनं, १९३० ईस्वीये लवणनियमभङ्गकरणं, १९४२ ईस्वीये 'भारतं त्यज' इति प्रस्तावस्य समर्थनं कृत्वा सत्याग्रहस्य महदायुधेन विरोधं प्रारभत । समये समये उपवासाः च अनुष्ठिताः ।

जीवनपर्यन्तं स भारतसमाजे ये ये दोषाः तान् तान् दूरीकर्तुमनाः आसीत् । अस्पृश्यतादोषनिवारणार्थं स प्रयतितवान् उत्साहेन । हिन्दु-मुस्लिम-ऐक्य-स्थापने स आजीवनं सन्नद्धः वरीवर्ति स्म । देशहिताय विदेश-वस्तु-बहिष्करणं स्वदेशोत्पादित-वस्तु-स्वीकरणं च तस्य जीवनस्य लक्ष्यमभूत् ।

सोऽहिंसामार्गम् अवलम्बितवान् । तं मार्गम् आरूढे सति तस्मिन् अयं देशः १९४७ ईस्वीये अगस्तमासस्य पञ्चदशतिथौ स्वतन्त्रः समभवत् ।

वयं स्वराज्यं प्राप्तवन्तः परन्तु दुर्भाग्यतः देशस्य पाकिस्तान-हिन्दुस्तानौ द्वौ भागौ कृतौ । हिन्दू-मुस्लिमविवादः प्रावर्तत । भारतीयानामस्माकं या जुगुप्सा घृणाभावः वा यवनेभ्यः आसीत् तं दूरीकर्तुं स महात्मागांधीः अतिमात्रमयतत । निर्भयं स "तस्य परमात्मनः एव ईश्वरश्च अल्लाहश्च पृथक् पृथक् द्वे नाम्नी स्तः" इति मतं प्रचारितवान् । हिन्दुत्वस्य संकीर्णभावनया प्रेरितेन एकेन उन्मत्तेन पुरुषेण स उदाराशयः, मानवधर्मप्रवर्तकः, सत्याहिंसापालकः, राजनीतौ अपि अध्यात्मभावनिर्देशकः १९४८ ईस्वीये जनवरीमासस्य त्रिंशत्तिथौ हतः ।

भो बालकाः यूयमपि तस्य महात्मनः निर्दिष्टान् विचारान् पालयित्वा तस्य अवशिष्टं कार्यं कुर्यात । अस्पृश्यतादोषं निर्मूलं छित्वा, समाजस्य कुत्सिताचारान् अपाकृत्य भारतीयसंस्कृतिं न केवलं भारते देशे अपितु समस्तसंसारे प्रसार्य भारतदेशं पुनरप्युच्चशिखरं नीत्वा च तस्य महात्मनः आत्मनः प्रसादाय शुभम् आचरेत । वस्तुतः महात्मागांधीः अस्माकं राष्ट्रपिता । तस्मै महात्मने नमः । तस्य विचारान् कार्यरूपेण सम्पाद्य तं प्रति श्रद्धाञ्जलिम् अर्पयत ।

# पत्रम्

आयुष्मन् ! स्वस्ति !

प्रियसुहृदं सत्यकीर्तिशर्माणं सत्यमूर्तिः प्रणिपत्य विज्ञापयति । भोः ! प्रियसुहृत् ! सर्वे वयं कुशलिनः । शुश्रूषामहे च भवद्गतं कुशलम् ॥

अस्माकं परीक्षायाः फलमद्य विद्यालये प्रकाशितं मया दृष्टम् । भवान् प्रथमत्वेनोत्तीर्णः । अहं तु द्वितीयत्वेन । भवतः संसर्गेणैव मया द्वितीयं स्थानमधिगतम् । तेन भवते बहु धारयाम्यहम् । सम्प्रति भवतो विरहेण नितरां दूयते मे हृदयम् । अतोऽविलम्बितेन प्रत्युत्तरेण मां प्रीणयितुमर्हति भवान् ॥

अपरं च, भवतो व्यवसायं विनयमुत्साहं परोपकारितां सत्यशीलतां मितभाषितां सामयिकतां च बहुभिनन्दन्ति मे पितृपादाः । तत्तदवसरे मामुपदिशन्तस्ते भवन्तमेव निदर्शनतया दर्शयन्ति । यथापूर्वमागामिन्यपि वर्षेऽध्ययनार्थं भवतः धनसाहाय्यं ते करिष्यन्ति । अतः पुनरध्ययनारम्भकालेऽवश्यमेव भवता समागन्तव्यम् । वर्धतां नौ सौहार्दम् ॥

इति भवदीयं मित्रम्,

सत्यमूर्तिः ॥

श्रीयुत सत्यकीर्तिः,

नं ६४ संस्कृत कलाशाला वीथी

मैलापूर्, मद्रास्-६०० ००४.

# वसन्तस्य पत्रम्

श्री :

अयि प्रिय सुहृत्सोम !

स्वस्ति प्रियवयस्याय । भवदीयं पत्रं मया सोमवासरे लब्धम् । प्रमुदितं च मे मनः जातम् । ज्ञात मया यत् त्वं दशमीपरीक्षाम् उत्तीर्य महाविद्यालयं प्रवेक्ष्यसि । तत्र के विषया : अध्ययनार्थं वरणीयाः इति ते समस्या उदेति । हिन्दी च आंगलभाषा च अवश्यं पठनीये । वैकल्पिकेषु विषयेषु त्वया संस्कृतम् एव अध्येतव्यम् कुतः यत्संस्कृतभाषा अस्माकं सर्वासां भाषाणां जननी । संस्कृतम् आश्रित्य एव तासां विकासः संभवति । इयं गीर्वाणभारती एव अस्माकं भारतीयानां संस्कृतिं सभ्यतां च दधाति । अस्याम् एव सर्वाणि काव्यानि, शास्त्राणि, दर्शनानि, वेदवेदांगानि च उपनिबद्धानि । कालिदासस्य शाकुन्तले कस्य मनो न रमते । उपनिषत्सु कः न शान्तिम् आनन्दं च विन्दति । संस्कृतं विना भारतीयानां कोऽपि संस्कारः जातकर्मादिमृत्युपर्यन्तं भवति किम् । अतः संस्कृतम् अवश्यं पठ इति मे मतिः अभिलाषश्च । अस्य साहित्यं विहाय कुत्रापि न स आनन्दसंदोहः प्राप्यते ।

सर्वसुहृन्मण्डलं मां स्मारय । पत्रमिदं कृपया प्रतिपत्रयितव्यम् । शमन्यत् ।

बुधवासरे<br>
फाल्गुन-सुदि दशम्याम्<br>
वि० स० २०१४

स्नेहशीलस्य<br>
वसन्तस्य

क्षेम

सविधे<br>
श्रीयुक्तस्य सोमस्य

कमलानगरम्

कमलानेहरूमार्गः दिल्ली—६ ।

# पञ्चमं विश्वसंस्कृतसम्मेलनम्

## BANARAS HINDU UNIVERSITY
### VARANASI, INDIA

### प्रधानमन्त्रिमहोदयानां शुभसन्देशः

विश्वसंस्कृतसम्मेळनं नाम महत्त्वपूर्णोऽयम् अवसरः । नाहं संस्कृतविदुषी, तथापि संस्कृतम् अस्माकं सांस्कृतिकनिधेर्मूलं, वयं च सर्वे नितरां प्रभाविता अनेन । संस्कृतमस्ति जननी भूयसीनां भाषाणां, सजीवमनुपमं साधनञ्च लोकव्यवहाराणामिदानीमपि । कस्य न स्पृशति हृदयं कं वा न मुग्धीकरोति माधुर्यं लाघवं चास्य ? इदमस्ति कोषोऽक्षय्यः साहित्यस्य बहुभूमिकस्य, सामाजिक-प्राकृतिक-धार्मिकदार्शनिकज्ञान-विज्ञानानां च ।

नाहं सम्मेलनेऽस्मिन् सम्मिलिता भवामीति खिद्ये । सफला भवन्तु कार्यक्रमाः सम्मेलनस्येति मम शुभकामनाः ।

Indira Gandhi

नई दिल्ली

इन्दिरा गाँधी

१८ अक्तूबर, १९८१

# रामायणे निसर्गोल्लासः

**Jayashree Chattopadhyaya**

"नोदिता कविता लोके यावज्जाता न वर्णना।" रामायणमादिभूता कविता। अत्रापि वेगावदा वर्णना नायिकामिव निसर्गप्रकृतिं बहु मन्यते। अतश्च नगनदीनगरी-शोभिता सञ्चाररम्या प्रकृतिर्नायिकेव नवरसरुचिरा रामायणे विलसति। यद्यपि रामायणे मूलोपाख्यानस्याङ्गरूपेण निसर्गप्रकृतीनामवस्थानमनुमन्यते तथापि जडप्रकृतिरत्र स्वकीयेन स्वातन्त्र्येण चरित्रमेवापरं रामायणमलंकरोति। वस्तुतस्तु निसर्गचित्रणमन्तरेण रामायणस्य रसो नीरसो, मलीमसो जायते महाकवेर्महिमा। निश्चेतना निष्प्राणा जड-प्रकृतिरत्र कविहृदयोन्मथितममृतमापीय भयविलासविभ्रमचकिता रमणवसतिर्भवति रसिकानाम्। विषादे इयमश्रुमुखी, हर्षे च लास्योच्छला कवेः सुकवित्वमेवाविरलविषयं जनयति। रामायणे निसर्गप्रकृतिषु मानवप्रकृतीनां, मानवप्रकृतिषु निसर्गप्रकृतीनां समारोपः कवेरविनश्वरं महिमानमुपैति यदाह —

भावानचेतनानपि चेतनवच्चेतनानचेतनवत्।
व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया॥

न केवलं नायकनायिकानां रूपकल्पसमुन्मेषे प्रकृतिरियं लब्धावसरा, तेषां जीवने मरणे विरहे सङ्गमे इयमविच्छेद्या नर्मसहचरी। रामवियोगादयोध्या एकवेणीधरा। 'सर्वं पर्याकुलं जगत्।' शीते सीतेवातपश्यामा प्रकृतिर्वर्षासु मुक्तच्छन्दा रामस्य शोकानुशोकपरम्परया हृदयमावर्जयति। शरदि वधूमुखानीव नदीमुखानि दृष्ट्वा मन उन्मनायते। प्रकृतिकन्या सीता। तस्याश्च हरणशङ्कया 'स्तिमितं गन्तुमारेभे भयाद् गोदावरी नदी।' सीताहरणादनन्तरमुद्यतबाहोररण्यस्य हाहाकारः खिन्नार्तरामहृदयेन एकात्मतामधिगच्छन्ननन्यसामान्यचमत्कारितया रामायणमखण्डं पुण्यानां फलमुपपादयति। वनोन्मत्ता मैथिली दोहदवासनायामपि वनविहाराभिलाषं दातुमशक्ता। प्रकृतिकन्या सा प्रकृतिमेवान्ते आलिङ्गति। किं बहुना, मानवनिसर्गयोश्चेतनाचेतनयोर्यः सम्बन्धो मधुरतमाय कल्पते रामायणे तस्यैव गरिमा शाश्वतिकः प्रतीयते।

## पाणिनिपतञ्जल्योः मतभेदाः

**K. A. Krishnamacharya**

श्रीमन्तः पाणिनिकात्यायनपतञ्जलयः भारतीयव्याकरणशास्त्रस्य मूलस्तम्भायमानाः इति सर्वसम्प्रतिपन्नः परमार्थः। तैः स्वीयेषु ग्रन्थेषु प्रतिपादितानेव बहुविधान् विषयान् विविधैः दृक्कोणैः सविमर्शं परामृश्य भाषास्वरूपविषये भाषातत्त्वनिर्णयविषये च कैयट-नागेश-भर्तृहरिप्रभृतिभिर्महद्भिः निरूपिताः केचनावान्तरमतभेदा विलसन्ति खलु क्षोदक्षमाः। प्रधानं च कारणं तेषां तत्तद्व्याख्यातृभिः स्वप्रतिभाविशेषैर्मुनित्रयग्रन्थाशयाविष्करणे दृश्यमाना अर्थविशेषा एव।

न केवलं तत्तद्व्याख्यातृभिः प्रतिभासमुन्मिषिता एव मतभेदाः किन्तु पाणिनि-कात्यायन-पतञ्जलीनामपि स्वतो विद्यमानाः केचनाभिप्रायभेदाः प्रदर्शिताः सन्ति तत्र तत्र ग्रन्थकर्तृभिः। यथा-- 'न बहुव्रीहौ' इति पाणिनीयसूत्रव्याख्यावसरे वैयाकरण-सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन त्वकं पिता यस्य सः इत्यर्थे त्वत्कपितृक इति च रूपे पाणिनिमतानुसारेण प्रदर्श्य "भाष्यकारस्तु त्वकत्पितृको मकत्पितृक इति रूपे इष्टापत्तिं कृत्वैतत्सूत्रं प्रत्याचख्यौ" इति निरूप्य यथोत्तरं मुनीनां प्रामाण्यमित्युक्त्वा पतञ्जलि-सम्मतरूपयोरेव साधुत्वप्रामाण्यं निर्णीतवान्। एवं तत्र तत्र पाणिनि-पतञ्जल्योर्मध्ये वर्तमानान् अभिप्रायभेदानुद्धृत्य तन्मूलग्रन्थपरामर्शपूर्वकमस्मिन् निबन्धे प्रदर्शयितुं यत्नः क्रियते।

## किरातार्जुनीये कालिदासस्य छाया

**Chittaranjan Mishra**

संस्कृतसाहित्ये महर्षिवाल्मीकिः वेदव्यासश्च सर्वेषां कवीनां मार्गदर्शकौ इति सुविदितमस्ति । लौकिकवाङ्मयस्याधारशिलायाः संस्थापकत्वात् प्रातःस्मरणीयस्य वाल्मीकेस्ततः परं व्यासस्य च स्थानं विराजते। अनेन महर्षिद्वयेन प्रणीते रामायण-महाभारते उपजीव्यकाव्ये स्तः। तदनन्तरं बहवो महाकवयः सञ्जाताः। येषु निर्विवादं कालिदासः श्रेष्ठः वर्तते। उत्तरवर्तिषु सर्वेषु महाकाव्येषु व्यास-वाल्मीक्योः छाया अवलोकनीया। अस्मिन् सन्दर्भे कालिदासस्य प्रभावोऽपि परवर्तिमहाकाव्येषु द्रष्टव्यः प्रतिभाति।

सर्वोऽपि परेभ्य एव व्युत्पद्यते इति राजशेखरोक्त्या परवर्तिषु पूर्ववर्तिनां छाया सर्वथा स्वाभाविकी।

संस्कृतसाहित्यस्य सुप्रसिद्धेषु पञ्चसु महाकाव्येषु किरातार्जुनीयमप्येकम् अस्ति। प्रस्तुतमहाकाव्यं भारवेर्वैदुष्यस्य परिमापकम्। कालिदासं सम्यगधीतवतः अस्य महाकवेः कृतौ कालिदासस्य नैसर्गिकप्रसादः सर्वत्र विराजते। परन्तु भारविणा युगप्रभावात् महाकाव्यस्य क्षेत्रे एकस्याः नूतनायाः शैल्याः उद्भावनं कृतम्। अस्याः शैल्याः परवर्तिभिः महाकविभिरपि अनुसरणं कृतम्। अस्य शोधपत्रस्य विवेच्यविषयोऽस्ति यत् भारविः स्वकीये महाकाव्ये कालिदासेनैव प्रभावितः प्रतीयते। तस्य महाकाव्ये कालिदासस्य कोमलकल्पनायाः, वृत्तयोजनायाः, अलङ्कारविन्यासस्य, प्रकृतिचित्रणस्य, जनजीवनस्य च छायाः द्रष्टव्याः।

## मेघदूते कालिदासस्य सङ्गीतविद्यावैदुष्यम्

**Sushama Kulashreshtha**

"जायन्ते कति जज्ञिरे कति जनिष्यन्ते कतीह क्षितौ
स्रष्टारो नितरामिदं तु कविभिर्निर्मत्सरैः कथ्यताम्।
आपूर्वापरदक्षिणोत्तरहरित्साहित्यसिंहासन-
स्वैरारोहपराक्रमं भजतु कः श्रीकालिदासात्परः॥"

संस्कृतसाहित्याप्रतिमकवेः कालिदासस्य ग्रन्थेषु तस्य विविधशास्त्रविषयकं पाण्डित्यं परिलक्ष्यते। व्याकरणदर्शनायुर्वेदवनस्पतिशास्त्रेषु सङ्गीतादिललितकलासु च कविः परमनिष्णात आसीत्। 'गीतं वाद्यं तथा नृत्यं त्रयं सङ्गीतमुच्यते'। सङ्गीते गायनस्य वादनस्य, नृत्यस्य च त्रयाणामेव परिगणनं क्रियते। वस्तुतस्तु त्रयमेतत् सङ्गीतस्य स्वतन्त्रास्तिस्रः विधाः सन्ति। तिसृणामेतासामनेकविधा उल्लेखाः कालिदासस्य सर्वासु कृतिषूपलभ्यन्ते। कालिदाससाहित्यस्यानुशीलनसमये पाठक इयान् रससिक्तः संजायते यत्तस्य साहित्ये कस्य शास्त्रस्य कस्या विद्याया वा कति उल्लेखाः सन्ति— इदं तु तस्य दृष्टिपथं नावतरति किन्तु यदा केवलं सङ्गीतशास्त्रदृशा कालिदाससाहित्याध्ययनं विधीयते तदा ज्ञायते यत् सङ्गीतकलायाः यावन्त उल्लेखाः कालिदासकृतिषु सन्ति, तावन्तः कस्याप्यन्यस्य संस्कृतकवेः साहित्ये न प्राप्यन्ते। एते सर्वे साङ्गीतिकोल्लेखास्तस्य काव्येषु न केवलं निरर्थकं प्रयुक्ता अपि तु कविना तेषामौचित्यपूर्णः सरसश्च प्रयोगो विहितः।

मेघदूतस्य प्रायः सप्तत्रिंशत् पद्येषु गायनस्य, वादनस्य, नृत्यस्य वा उल्लेखाः समुपलभ्यन्ते।

प्रस्तुते शोधपत्रे मेघदूतस्य पद्येषु कवेः सङ्गीतप्रयोगदक्षतां प्रदर्शयितुं प्रयासो विहितः।



वाराणसीक्षेत्रम्

सन्ति खलु भारतवर्षे तत्र तत्र बहूनि तीर्थक्षेत्राणि। तेषु अयोध्या, मथुरा, माया, काशी, काञ्ची, अवन्तिका, द्वारवतीत्येतानि प्रधानभूतानि। तत्रापि वाराणसी पुराणेष्वतिशयेन वर्ण्यमानमनुत्तमं पुण्यक्षेत्रम्। सैव काशीत्युच्यते। सैषा भारतवर्षस्य पूर्वोत्तरभागेऽवतिष्ठते; यस्याः परिसरे पुण्यसलिला भागीरथी प्रवहति॥

गङ्गायां स्नानेन तत्तोयपानेन वा जनाः पूतात्मानो मुक्तिं प्राप्नुवन्तीति वेदाः पुराणानि चोद्घोषयन्ति॥

उक्तं च 'भजगोविन्दे' श्रीशङ्करभगवत्पादैः—

भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता।
सकृदपि येन मुरारिसमर्चा क्रियते तस्य यमेन न चर्चा॥

अतो भारतवर्षस्य सर्वाभ्यो दिग्भ्यः सर्वेभ्यो देशेभ्यश्च स्त्रियः पुरुषा बाला वृद्धाश्च गङ्गास्नानार्थं काशीं गच्छन्ति। गत्वा च तत्र नद्यां स्नात्वा भगवन्तं श्रीज्योतिर्लिंगमूर्तिं विश्वनाथं पश्यन्ति अर्चन्ति च॥

गङ्गायास्तीरे निबद्धाः सुन्दराः सुविशालाश्च तीर्थशिलाः सततं जनैराकीर्णा उपलभ्यन्ते। एकत्र वैष्णवाः, अन्यत्र शैवाः, अपरत्र मतान्तरीयाश्च स्वस्वचिह्नानि धरन्तः कुशहस्ताः पञ्चपात्रपाणयो जपन्तो ध्यायन्तश्च तीर्थशिलामलङ्कुर्वन्ति। अन्यत्र केचिदूर्द्ध्वबाहवः पादाग्रेण तिष्ठन्त उद्यन्तं सूर्यमेकाग्रेण मनसा ध्यायन्ति। अपरे केचन कृतप्राणायामाः पशुपतिं ध्यायन्ति। इत्थमेषा वाराणसी सत्कर्मणामायतनं धर्माणामावासभूमिश्च दृश्यते॥

वाराणस्येषा बहुभूमिकैरत्युच्छ्रितैर्मन्दिरैः संशोभते। विशेषतश्च नद्यास्तीरे सुप्रतिष्ठिता गृहपङ्क्तिः महतीं शोभां बिभर्ति। नगरमिदं पुरा हाटकमयं बभूवेति श्रूयते। इदानीं तु केवल शिलामयं दृश्यते। गङ्गा च स्नानघट्टानामग्रतः परः सहस्रैर्बाष्पप्रवहणैः महानौकाभिश्चाभिव्याप्ता विलसति। काशीनगरस्य सुषमा नदीगतं प्रवहणमारूढैर्निरीक्षणीया॥

काशीक्षेत्रमिदं भारतीयविद्यायाः कुलभवनमिवाभाति । यतो ह्यत्र वेदाः पुराणानि शास्त्राणि च यथापुरमद्यत्वेऽपि सश्रद्धमधीयन्ते हिन्दुमहाविश्वविद्यालये जनैः । पण्डित श्रीमदन-मोहन माळवीयमहाशयैः प्रतिष्ठापितः हिन्दु महाविश्वविद्यालयः अत्र सुतरां चकास्ति । अत्रत्यं विद्यापीठमधिरूढो जनः समस्तविद्यापारगत्वेन परिगण्यते । अत्र जनानां जीवितान्तिमक्षणे भगवान् विश्वनाथः कर्णे तारकमन्त्रम् उपदिशति, येन ते मुक्तिभाजो भवन्ति इत्यहो वाराणसीक्षेत्रमहिमा ॥



# ПОЯСНЕНИЯ К ИЛЛЮСТРАЦИЯМ

стр. 22 — Пещера Вьяса, где, по преданию, была задумана «Махабхарата» 3000 лет том назад.

стр. 34 — Храмовый комплекс «Вирупакша», около VI века (штат Карнатака). Храм изобилует скульптурными композициями, передающими сцены из «Махабхараты» и «Рамаяны».

стр. 56 — Храм Ченнакешава («Звездный храм»). Ряды искусно вырезанных фигу на стенах храма представляют героев «Махабхараты» и «Рамаяны».

стр. 66 — Храм в окрестностях Тируччираппалли (центральный Тамилнаду), покрытый «повествовательными рельефами».

стр. 76 — Деталь храмового комплекса «Вирупакша» (см. пояснения к стр. 34).

стр. 194 — Якшини, около 200 г. до н. э. (Бхархут, штат Мадхья Прадеш).

стр. 222 — Радха и Кришна. Миниатюра XVII в. Музей Панджаба.

стр. 231 — «Львиная капитель», воздвигнутая в III в. до н. э. императором Ашокой, является государственным гербом Индии. Он символизирует приверженность Индии своим вековым принципам мира во всем мире. Под гербом надпись на санскрите सत्यमेव जयते «побеждает лишь истина».

стр. 240 — Паломники на берегу Ганга, Варанаси.

стр. 242 — Главное здание колледжа Banaras Hindu University, центра изучения санскрита в современной Индии.

*Кочергина Вера Александровна*

КНИГА ДЛЯ ЧТЕНИЯ НА САНСКРИТЕ

Рецензенты: доктор филилогических наук В. В. Ветроградова,
профессор Б. А. Захарьин

Оригинал-макет подготовлен издательством «Добросвет»

Формат 60×88 1/16.
Объем 15.5 печ. л.
Тираж 1000 экз.

Издательство «Добросвет».
109147, Москва, Ж-14,Марксистская ул.,
9 – 505.

«Издательство "КДУ"», 119234, Москва а/я 587.
тел./факс: (495) 939-40-51, 939-57-32.
e-mail: kdu@kdu.ru, http://www.kdu.ru

Отпечатано в типографии «КДУ»
тел./факс: (495) 939-40-36 e-mail: press@kdu.ru